॥इतिश्रीपंचपादिकाविवरणप्रारंभः॥ ॥

११७

श्रीगणेशाय नमः ॥ ॥ पालने विमलसत्त्वहृन्नये जन्मकर्म्मणि रजोजुषे लये ॥ तामसाय जगतः पराकृतद्वैत
१ जालवपुषे नमः सते । १ । यस्याः प्रसादमवलंब्य जगद्गुरूणामप्यस्खलद्गुणगुणाः प्रसरंति वाचः सा वे
दशास्त्रपरिनिर्मितवंद्यदेहा भूयात्समग्रवरदेव सरस्वती नः २ विघ्नाभितापमयहृत्यमदीयहृत्य
बीजं प्ररूढमदनुग्रहवर्षपातैः संप्रार्थितः सितनतोपि गणेशमेघः सिंचन्नभीष्टफलमंकुरयत्वमोघं
३ श्यामोपि श्रुतिकमलावबोधरागः शांतः सन्नयति नमो विनाशमंतः नीरूपं प्रथयति योपि गोपस्
त्रीणां ... मिवाब्जे रालिंगिता । अखिलजग
द्रूपस्त्रैवैसंव्यासं नमन जगत्प्रमत्तर्वभानुं ४ उद्धृत्य वेदपयसः कमलामिवाब्जेरालिंगिता । अखिलजग
त्प्रभवैकमूर्तिम् विद्यामशेषजगतां सुखदाम दाद्यस्तं शंकरं विमलभाष्यकृतं नमामि ५ वंदे तमात्मसं
वुद्धस्फुरद्बुल्लावबोधनः अर्थतोपि न नाम्नैव यो नन्यानुभवो गुरुः प्रकाशात्मा यतिः सम्यक् प्राप्तवि
याशुशुत्सया यथाश्रुतं यथाशक्ति व्याख्यास्ये यं च यादिकां ७ विदितसकलवेद्यैर्नप्रशांतिलोके

राम: १

ग्रथितमपि महद्भिः किंपुनर्माद्दशेन इति विफलसमेस्मिन्वाग्व्ययेद्दंभवृत्तः स्वमतिविमलनायैषंतुम
र्हंति संतः । ८ । प्रारिप्सितस्य ग्रंथस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभि
लाषितदेवतापूजा नमस्कारः कर्त्तव्यः शास्त्रार्थश्च तत्त्वंपदार्थविवेको पालयभ्यः प्रत्यक्ब्रह्मणोरेकत्वलक्ष
णः संक्षेपतो दर्शनीयः कृत्स्नस्य भाष्यस्य तत्रतात्पर्यकथनायेति तदुभयं श्रुत्यर्थाभ्यां संक्षेपतो दर्शयति । अ
नाद्यानंदकूटस्थज्ञानानंतसदात्मने । अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः । कृत्स्नस्य भाष्यस्य ब्रह्मा
त्मैकत्वे तात्पर्यमत्र दर्शितमुत्तरत्र विभज्य तात्पर्यदर्शनादत्र देवतागुरुविषया पूजा नमस्कारूपं हृदिताभा
क्तिर्वृत्कुरुकृप्रयोजनसंपादित्यपि श्रोतृणामपि विद्यांगभावं प्रतिपद्यत इति वाङ्मनःकायप्रणिधानैर्गुरू
नभिपूजयति । नमः श्रुतिः शिरःपद्मषंडमार्त्तंडमूर्त्तय इत्यादिभिस्त्रिभिः श्लोकैर्यत्कार्यमुद्दिश्य मंगलाचर
णं संपादितं तन्निर्दिशति । परादिवृत्तभारेणेति । ननु नेदं भाष्यं व्याख्यानपदवीमुपारोढुमर्हति । भाष्यकृ

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

क्षणाभावात्। सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति भा
२ ष्यलक्षणं वदंति। तत्राथातो ब्रह्मजिज्ञासा इति सूत्रेऽनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्धये च कर्तव्येति
पदमध्याहर्तव्यं। तत्र जिज्ञासापदेनांतर्नीतं विचारमुपलक्ष्यानुष्ठानयोग्यसाधनचतुष्टयसंपन्नस्य ब्रह्म
ज्ञानाय विचारः कर्तव्य इति सूत्रवाक्यश्रौतोऽर्थः संपद्यते। अथोदधिकारिविशेषणमोक्षसाधनं ब्रह्मज्ञानमि
ति सिध्यति सन्निधानाच्च वेदांतवाक्यविचार्य इति श्रुत्यर्थाभ्यां साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञा
नाय वेदांतवाक्यविचारः कर्तव्य इति सूत्रवाक्यस्य तात्पर्येण प्रतिपाद्योऽर्थो युगतः। तत्रेदं भाष्यं न सूत्रार्थकला
मपि प्रतिपादयत्यतो न व्याख्यानार्हमित्येवं शंकितं दोषं परिहरन् भाष्यस्य स्वं सूत्रेणार्थादुपात्तविषयप्र
योजनप्रतिपादने तात्पर्यं दर्शयति। युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं लो राम:
कव्यवहार इत्यंतं भाष्यमस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदांता आरभ्यंत इत्यनेन भा २

ष्येणापर्यवस्यतत्शास्त्रस्य विषयः प्रयोजनं चार्थात्प्रथमसूत्रेण सूचितं प्रतिपादयतीति। तत्र नैसर्गिको
यं लोकव्यवहार इत्यंतं भाष्यमिति पथः शास्त्रस्य विषयः प्रयोजनं च प्रतिपादयतीत्यनंतरेण संबध्यते। ननु क
थं भाष्यद्वयमेव विषयप्रयोजने प्रतिपादयति। शास्त्रारंभनिमित्तविषयप्रयोजनसिद्धिहेतोरध्यासस्योप
स्थापकत्वादिति ब्रूमः॥ ॥हेतुवचनं हि प्रतिज्ञातार्थमेव साधयति। तथाथैतच्छास्त्रमारंभणीयं। संभावि
तविषयप्रयोजनत्वात्कृष्याद्यारंभवत्। शास्त्रं संभावितविषयप्रयोजनमविद्यात्मकबंधप्रत्यनीकत्वात्तजा
ग्रद्बोधवदिति। तदेवं शास्त्रस्यारंभनिमित्तविषयप्रयोजनवत्त्वप्रत्यनीकस्य बंधस्याविद्यात्मकत्वं निर्दि
शद्भाष्यद्वयं विषयप्रयोजने प्रतिपादयतीति। ननु बंधस्याविद्यात्मकत्वलक्षणो हेतुरसिद्धः कथमसिद्धम
सिद्धेन साध्यत इत्यत आह। सर्वे वेदांता आरभ्यंत इत्यनेन भाष्येण पर्यवस्यदिति विषयादिसिद्धिहे
तोरध्यासस्य सिद्धिहेतुभूतानि लक्षणसंभावनासद्भावप्रमाणानि प्रतिपादयता भाष्येण सहलक्षणे

दिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजनं साधयतीत्यर्थः। अत एव व्यवधानाव्यवधानाभ्यां विषयादेः सा
२ धकत्वादेतदृतमनेन पर्यवस्यदितिभाष्यस्य विभागेन नोपादानं कृतं। ननु तर्हि सर्वलोकप्रत्यक्षत्वादित्यनेन पर्य
वस्यदिति वक्तव्यं। सत्यं। अस्यानर्थहेतोरितिभाष्यस्य विषयप्रयोजनयोर्वेदांतवाक्यसंबंधकथनद्वारेण वि
चारशास्त्रसंबंधप्रतिपादनपरत्वात्। विचारशास्त्रीयविषयप्रयोजनसाधने सव्यवधानत्वसाम्येन पूर्वभा
ष्येण सहोपादानं कृतं। नन्वेवमपि असूत्रसंबंधिनी विषयप्रयोजने किमिति प्रतिपाद्येते इत्यत आह। विषयः प्रयो
जनं चार्थात्प्रथमसूत्रेण सूत्रिते इतीति। इतिशब्दो हेतौ यस्मात्प्रथमसूत्रेणार्थात्सूत्रिते तस्मात्प्रतिपाद्यत इति।
कः पुनरस्य सूत्रस्य प्रसंग इति॥ ॥उच्यते॥ ॥नित्येनैवाध्ययनविधिनाधीतस्वाध्यायो वेदान्तवाक्येष्वापात
दर्शनेनेदमवगच्छति आत्मनस्तु कामाय सर्वं प्रियं भवतीत्युपक्रमात्सर्वतो विरक्तस्यात्मप्रेप्सोरात्मनि विज्ञाते राम॰
सर्वमिदं विज्ञातमेतावदरे खल्वमृतत्वमिति उपसंहारात्। अमृतत्वसाधनमात्मदर्शनं द्रष्टव्य इत्यनेन २

यतादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यंगाभ्यां सह श्रवणं नामांगी विधीयत इतीति। स च तत्र किं यद्विष
णपर्यंतोधिकारी किं प्रमाणकश्च को वासौ वेदांतवाक्यविचारोन्यतः प्राप्तोऽप्राप्तो वा कथं वात्मज्ञानं मोक्षसाध
नं किं प्रमाणं न तत्किं वा न दात्मतत्त्वं किं प्रमाणकं चेति जिज्ञासते। तं च जिज्ञासुं पुरुषार्थकाममुपलभमानो भगवा
न्बादरायणः साधनचतुष्टयसंपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारं विदधतो विधेरपेक्षिता
धिकारिविषयफलानुबंधत्रयमागमिकमपि न्यायेन निर्णेतुं सूत्रयामास अथातो ब्रह्मजिज्ञासेति श्रुतिसूत्र
योरैकरूप्यावगमात्मनननिदिध्यासनयोश्च श्रवणांगत्वमुत्तरत्र वक्ष्यामः। ननु श्रोतव्य इति विधिमेक्षितसाध
नब्रह्मात्मज्ञानाय वेदांतवाक्यविचारं साधनचतुष्टयसंपन्नस्य विधातुं न शक्नोति। श्रवणादीनां विषयाव
गमं प्रत्यन्वयव्यतिरेकसिद्धसाधनत्वात्। न ह्यवघातादिवदुन्नयार्थता संभवति दृष्टादृष्टप्रकारद्वयसा
ध्यापूर्ववदिहादृष्टसाध्यस्याभावादात्मागमस्य दृष्टोपायमात्रसाध्यत्वादिति नेतत्सारं। आत्मनत्वापरोक्ष

४ स्य सर्वादृष्टस्याध्यत्वस्य वक्ष्यमाणत्वाद्दवयातादिवदुभयार्थतया विधानोपपत्तेः। ननु विधिपरत्वे वेदांतानां
निष्टतया ब्रह्मस्वरूपस्यासिध्यादिदोषप्रसंगात्। नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितंस
त्यं। ज्ञानविधिस्तत्र निराकृतो न श्रवणादिविधिस्तत्रोक्तदोषप्रसंगाभावात्। कथं दर्शनविधाने हि ब्रह्मक
र्मतया गुणभूतं प्रसज्येत। ब्रह्मदर्शनमुद्दिश्य विचारविधाने तु स्वप्रधानफलभूतदर्शनविशेषणतया ब्रह्मा
पि स्वप्रधानं भवति। ननु गुणभूतमिति वेदांतैर्ब्रह्मणि स्वप्रधाने प्रतिपाद्यमाने तद्दर्शनाय श्रवणादिविधानं न
विरुध्यते। नन्वेवमप्युपक्रमोपसंहाराभ्यामेकस्मिन्नात्मप्रतिपादनपरे वाक्ये कथमवांतरवाक्यैः श्रवणा
दिविधानं कल्पनमिति। अवांतरवाक्यभेदेन विविदिषंतीतियज्ञादीनां ज्ञानसंयोगविधानवत्। उपरि
हि देवेभ्य इत्यपरिधारणविधानवत्। मलवद्वाससो व्रतकलापविधानवच्चेति ब्रूमः। अथवा तस्माद् राम॰
ब्राह्मणः पांडित्यं निर्विद्येत्यादिवाक्यं श्रवणादिविधायकमस्तु नस्य न सरलास्तत्र कोरेणाव वक्ष्यमाण ४

त्वात्सर्वथा तावन्मननिदिध्यासनाभ्यामंगभूताभ्यां सह श्रवणविधानमस्त्येव। अतस्तदनुपेक्षितानुबं
धत्वयनिर्णयायन्यायसूत्रमारब्धं। कर्तव्ये चाधिकारिणो मोक्षसाधनब्रह्मात्मज्ञानाय वेदांतवाक्यविचा
रे प्रथमसूत्रेण प्रतिपादिते स च कर्तव्यो विचारो जन्मादिसूत्रमारभ्य प्रवर्तिष्यत इति। तत्र विध्यपेक्षिते
ष्वधिकारिविषयफलानुबंधेषु विषयफलयोरूपपादनाय बंधस्य मिथ्यात्वमत्र वर्ण्यत इति सूत्रसंगतमे
वेदं भाष्यं व्याख्येयमिति। ननु यद्यर्थाद्विषयप्रयोजने सूचिते तर्हि भाष्यकारेण सूत्रस्य तत्र व्यापारं द
र्शयित्वा आक्षेपसमाधानपूर्वकं साक्षादेव प्रतिपादनीये विषयप्रयोजने अन्यथा सूत्रकारभाष्यकार
योस्तत्र तात्पर्याभावप्रसंगादिति। तत्राह। एवं च तस्माद्ब्रह्म विजिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं भा
ष्यकारेणोक्तमिति प्रतिपादयिष्याम इत्यध्याहारः। प्रथमग्रंथोक्तमेवार्थमाक्षेपसमाधानपूर्वकमतित
रां स्पष्टीकर्तुं चोदयति। अत्राह यद्येवमिति। नन्वस्यानर्थहेतो रिति भाष्यवत्सूत्रभाष्यमपि विषयादि

५ क्रमेव प्रतिपादयति। कुतस्तर्हि पर्यनुयोग इति नेत्याह। अहं मनुष्य इति देहेंद्रियादिष्वित्यादिना। अत्र विचारक-
र्त्तव्यताविषयप्रयोजनाध्यासानामुत्तरोत्तरेण पूर्वपूर्वसाध्यत्वस्य सूत्रेणैव सूत्रितत्वादध्याससाधनद्वा-
रेण विषयप्रयोजने साधयित्वा विचारकर्त्तव्यता साधनीयेति क्रमनियमं विवक्षन्नाह। उच्यत इत्यारभ्य
वक्ष्यति चैतदित्यतः प्राक्तनेन ग्रंथेन। ननु ब्रह्मज्ञानप्रयोजनं विचारकर्त्तव्यतां सूचयता सूत्रेण कथं बंधनि-
वृत्तिर्विचारविज्ञानयोः प्रयोजनत्वेन सूत्रितेति तत्राह। ब्रह्मज्ञानं हि सूत्रितं अनर्थहेतुनिबर्हणमिति।
विचारसाध्यज्ञानस्यस्य प्रयोजनमाकांक्षन् विचारविधिरर्थादधिकारिविशेषणं मोक्षप्रयोजनत्वेन प्र-
मिमीत इत्यर्थः। ननु अनर्थो नरकयातनादिलक्षणोऽन्य एव। शरीरादिप्रतिभासस्य च मिथ्यात्वं साध्यत इ-
ति किं केन संगतमिति नेत्याह। अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्वमिति। निवर्त्यतां नाहि ज्ञा-
नेन वस्तुभूतमेव प्रमातृत्वकर्तृत्वभोक्तृत्वमिति नेत्याह। तद्यदि वस्तुकृतमिति। तथाहि। चित्रावयविनि

MEMORIA

नीलविशिष्टद्रव्यज्ञानं स्वविषयं वा स्वविषयसमवेतं वा रसादिकं विरोधिनं वा पीतिगुणं न निवर्त्तयति। स्व-
विषयानुच्छेदे बाध एव केवलस्तेन न निवर्त्यते स्वाश्रयगतं वस्तु ज्ञानेन निवर्त्तत इति चेन्न घटादिज्ञानेनात्म-
गतधर्माधर्मादिगुणानिवृत्तेर्न चाश्रयविषयोभयसंबंधिवस्तु ज्ञानेन निवर्त्यते आत्मनः शरीरविष-
यज्ञानेन देहात्मसंबंधाद्यनिवृत्तेरिति। ननु न दृष्टसामर्थ्यात् ज्ञानाद्बंधनिवृत्तिर्येनाविद्यात्मकत्वं वर्ण्ये-
त। किं त्वागमएव ज्ञानाद्बंधनिवृत्तिं श्रावयति। ननु श्रुतोपपत्त्यर्थमेवं बंधस्याविद्यात्मकत्वं वर्णनीयमेवा
यथाग्नेयादीनां षण्णां यागानामधिकारापूर्वविषयतया पूर्वकरणभावे श्रुतेऽपि कालान्तरभाविप्रधाना-
पूर्वसाधनत्वोपपत्त्यर्थं क्रमभाविनि यागकर्मजन्यानि मध्यवर्त्तीन्यवान्तराणि अपूर्वाणि कल्प्यंते। यथा वा
श्रुतस्यैव स्वर्गसाधनत्वस्योपपत्तये पूर्वं कल्प्यते तद्वत्। ननु तत्र क्षणिकानां कर्मणां कालान्तरभावि-
फलसाधनत्वाभावव्याप्तिनियमाल्लोके वेदे स्वर्गापूर्वसिद्धौ मध्ये पूर्वोत्तराणि कल्प्यंते श्रुतोपपत्तय इति।

६ तर्हीदमा नर्हि इहापि व्याप्तिनियतिरस्तीत्याह। यतो ज्ञानमज्ञानस्यैव निवर्त्तकमिति। अतः सूत्रस्यैव बंधस्या
विघातकत्वे व्यापारात्सूत्रार्थविचारकर्त्तव्यतोपपत्तेर्थप्रयोजनसाधनायाध्यासो वर्णनीय इत्याह। तद्य
त्यादिना सूत्रार्थोपि प्रयोगितयेत्यं तेन ग्रंथेन। ननु सूत्रेणाप्रथमप्रतिपन्नं प्रतिपाद्यमर्थमुल्लंघ्य किमि
तिचरमं प्रतिपन्नमार्थिकमेवार्थं भाष्यकारः प्रथमं वर्णयतीति। तत्राह सकल तत्रोपोद्घात इति प्रतिपाद्य
मर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थांतरवर्णनमुपोद्घातः प्रतिपाद्यं बहिरेव प्रतिज्ञाप्यप्रभ्रांतसिद्धिहेतुरु
पवर्णनं प्रातिपादनमिति विभागः। तत्रमिति। तंत्रार्थो ब्रह्मात्वैकत्वमुच्यते। ननु भवतु प्रयोजनसिद्धिहे
तुरध्यासः कथं तंत्रार्थसिद्धिहेतुरित्याशंक्य तत्कथनाय तंत्रार्थं प्रथमं कथयति। तथा चास्य शास्त्रस्ये
त्यादिऐदंपर्यं प्रतिपादितमित्यनंतरेण संबंधस्तदेवैदंपर्यं दर्शयति। सुखैकतानेत्यादिना अयमर्थः। राम:
ब्रह्मैकत्वे वेदांताः पर्यवस्यंतीति यदिदं वेदांतशास्त्रस्यैदंपर्यं तत्सूत्रभाष्याभ्यां प्रतिपादितमिति। ६

श्री।

तंत्रार्थं प्रदर्श्य तस्याध्यासः सिद्ध्यधीनतयाध्यासस्य प्रथमं वर्णनीयतां दर्शयति। तत्राहं कर्त्ता सुखी दुःखीति।
ननु शास्त्रमेव प्रत्यक्षाभिमतमपि बंधमाभासीकृत्य ब्रह्मात्मैकत्वं प्रतिपादयिष्यति किं पृथगध्यासवर्णनेनेति
तत्राह। तावत्जरद्गवादिवाक्यवदिति। ननु शास्त्रसिद्धिरध्यासपराधीना चेत्स एव तर्ह्यध्यासः सूत्रकारेण
मुखतो वर्णनीयः तस्य प्राधान्यादन्यथा तत्रातात्पर्यप्रसंगादिति तत्राह। वक्ष्यति चेतदिति। तर्ह्युपोद्घात
त्वात्प्रथमेवाध्यासविषयं सूत्रं प्रणेतव्यमिति चोदयति। यद्येवमिति। अर्थनिर्णयप्रधानत्वात् वादकथा
लक्षणायां प्रतिपादनप्रक्रियायां प्रवृत्तः सूत्रकारो नोपोद्घातप्रक्रियायामिति परिहरति मैवमर्थविशेषो
पन्नेरिति तर्हि भाष्यकारेणापि यथासूत्रक्रममेव प्रवर्त्तितव्यं। ननु सूत्रमतिलंघ्येति भाष्यकारास्विति।
सुखप्रतिपत्त्यर्थप्रवृत्तसंगभाबायेत्यर्थः। एवमपि नव्यारब्धेयमिदं भाष्यं शास्त्रारंभमंगलाचरणाभावात् वि
घ्नोपसंसृष्टतया शास्त्रार्थप्रतिपत्त्यनन्यथाप्रतिपत्तिविप्रतिपत्तिसंभवात् शिष्टाचारपरिपालनहीन

७ तथाचानासप्रणीतत्वप्रसंगादिति द्योतयति। ननु ग्रंथकरणादिकार्यारंभ इति। ननु शिष्टानां निष्ठीवनादिप्रवृत्तिः
किमन्यनानुसरणीयेति नेत्याह। शिष्टाचारश्चेतः प्रमाणमित्याचारो धर्म्म इत्येवानुष्ठीयमानं कर्म प्रमाणं कर्त्तव्य
मित्यर्थः। ननु प्रयोजनाभावात्किं मंगलाचरणेनेति नेत्याह। प्रसिद्धं च मंगलाचरणस्येति। नन्वत्र विघ्न एव नास्त्यना
रंभत्वादिति नेत्याह। म तिचेति। ननु संभावनाभावान्न प्रवृत्तिर्विघ्नोपशांतये किंतु निश्चयादित्यत्राह। प्रसिद्ध
चेति। ननु लोकप्रसिद्धिर्निर्मूला न विघ्ननिश्चयहेतुरित्यत आह। विज्ञायते चेति॥ ॥उपसंहरति। न कथमिति
सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवान्मंगलायतनं हरिरिति स्मृतेः। शिष्टाचारपरिपालनी
यविघ्नोपशांतये च विशिष्टदेवतानुस्मरणलक्षणं मंगलाचरणं कृतमित्याह। अतोच्यनरति। किंनु प्रमाणमि
त्यत आह। श्रुष्ठीनाति। इत्यं तु भाष्यं प्रमाणमित्यर्थः। मंगलाचरमितिवा कथमिदं विशिष्टदेवतानुस्मरणं ग रामः
मयतीति तत्राहास्य चायमर्थ इति। ननु नेह विशुद्धात्मतत्त्वं देवतानुस्मर्यते किं तथा सा भावो वर्ण्यते इति। ७

तत्संतादर्थेन तत्त्वमप्यनुस्मर्यत इत्याह। तत्कथं चेनेति। ननु तन्यपरत्वाद्देवतानुस्मृतिराविवक्षितानका
र्यकरीति नेत्याह। तदन्यपरतादेवेति अन्यार्थमपि देवतानुस्मरणं स्वभावादेवविघ्नोपप्लवं वक्ष्यति धूमार्थ
इव भक्तिस्तृणादिकमित्यभिप्रायः। व्याख्येयत्वं प्रतिपादितमुपसंहरति तस्मादिति। अध्यार्थप्रवृत्तेन
युष्मदस्मदित्यादिपदद्वयं आर्थाद्व्याख्यानमुत्तरपदं व्याख्यातुं भाष्यमाददाति विषयविषयिणोरित्या
दिना। तत्र द्विविधो विरोधो हि द्विविधाचेतरेतरभावानुपपत्तिः कथं द्वयोः पदार्थयोरेकदेशकालावस्थानसाम
र्थ्याभावः पदार्थधर्म्मो विरोधः। तन्निमत्तोवस्थानलक्षणकार्याभाव इतरेतरभावानुपपत्तिरित्येकः स्कंधः।
अपरस्तु पदार्थयोरितरेतरात्मतासामर्थ्याभावः पदार्थधर्मो विरोधः। तन्निमित्त इतरेतरात्मतालक्षणका
र्याभावोनुपपत्तिरित्युतो द्वैविध्यमास्थयति। कोयं विरोध इत्यादिना। तत्र प्रथमं पक्षं दूषयति। यदि तावदित्यादि
नासहावस्थानमुक्तं वेदितव्यमित्यं तेनयं थेनं तत्र तमःप्रकाशशब्दाभ्यां छायातपशीतोष्णग्रहणमंगीकृत्य

८ तत्रापि सहावस्थानमुक्तं वेदितव्यं। इदानीं द्वितीयं पक्षमवलंबते। उच्यते। परस्यरानासलक्षण इत्यादिना। न
नु तमो नामालोकाभावमात्रं केचिद्रूपदर्शनाभावमात्रमित्येतत् कथं द्वयोरविरूपयोरिदं दृष्टांततयोपा
दीयत इति उच्यते। उपयोर्नेपच यायद्वस्थाभेदविशेषविशिष्टरूपविन्तया चोपलभ्यमानं तमः कथं द्वयीमभा
विधामासीदत्। उल्लालोकविततेपि देशे निमीलितनयनस्य गोलकांतरवर्त्ति तमोदर्शनमंधकारोपलब्धिः पि
हितकर्णपुटस्यांतरशब्दोपलब्धिवन्न विरुध्यते। आलोकविनाशिनस्य च तमसः पुनर्मूलकरणादेव उदिति
महाविद्युदादिजन्मवज्जन्म सिध्यति। ननु रूपवतो द्रव्यस्य स्पर्शस्यैवत्वनियमात्। तद्रहितं तमः कथं रूपवद्द्र
व्यमवगम्यते। नैष दोषः। वायोरन्यत्र स्पर्शवद्द्रव्यस्य रूपवत्वनियमेपि रूपरहितस्य स्पर्शवतो वायोरभ्युपग
मात्। तद्वद्रूपनियमादेव स्पर्शहीनस्य रूपवत्तमसः सिद्धेः। धूमस्य च स्पष्टस्पर्शवतश्च लघुः प्रदेशादन्यत्र स्पर्शा राम
नुपलब्धेः तद्वत्सर्वस्पर्शहीनं तमः किं न स्यात् सवितृकिरणसंतते देशे प्रदीपालोकजन्मविनाशयोः आगमा ८

वपध्वंसाभावेतरेतराभावेषु तमो बुध्यदर्शनान्नालोकाभावमात्रं तमः। सर्वालोकाभावश्चेत् रूपदर्शने न सदाय वर
कांतस्तमो दर्शनात् रूपदर्शनाभावमात्रं तम इत्यलमतिप्रसंगेन। ननु दृग्दृश्ययोरितरेतरभावानुपपत्तिः तयोर्विभ्र
मनिमित्तं तादात्म्यावभासनविरुणद्धि शुक्तिरजतयोरपि तादात्म्यहीनयोरेकविभ्रमनिमित्ते काधिकरण्यमवभा
सने तद्वदिहापि स्यादिति चोदयति। कथमिति। सत्यं। इदमंशमात्रस्याधिष्ठानस्य रजतस्य चाप्यस्य कुचित्तादात्म्यम् २
स्यैव तत्राधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य कचित् सामान्यविशेषभावेन गुणगुणिभावेन वा समाधि
नोक्तत्स्यान्यत्रान्यतरांशवतः पदार्थस्य दर्शनादन्यतरांशाध्यासो विभ्रमो दृष्टः। न तद्वदिहाधिष्ठानस्याविततोध्य
स्यमानस्य चानात्मनो नास्तीत्याह। स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसंभव इत्यादिना। अयमाशयः
इह रचिदंशः स्वाभाविको वास्यादागंतुको वेति। न स्वाभाविक इत्याह। स्वत इति। चेत्यं हि जडं च नन्यस्य कर्म
कारकयोर्न तत्त्वभासते। तत्कथमेकस्यां क्रियायां कर्तुर्विपरीतस्थानगतं कर्मकारकमात्मा स्यादित्यभिप्रायः। आग

६ तुकं चेत् सहेतुरहेतुर्वा निर्हेतुश्चेत् तत्राह परिणामित्वादिति। न हि निरवयवं वस्तु स्वतः सावयवाकारेण परिणममानं
दृष्टमित्यभिप्रायः। न सहेतुरित्याह निरंजनत्वादिति। न हि निरवयवमाकाशं हेतूपरागात् परिणममानं दृष्टमित्यर्थः।
नर्ते नामैवाधिष्ठानमात्मनो माशात्मकं किंचित् दृष्टमिति नेत्याह विषयस्यापीति। समत्वादित्ययमर्थः। यथा द्रष्टुर्द्रष्टृत्व
न प्रत्यक्षगोचरोऽनुमेयमेव न तदेवं विषयोऽपि स्यादिति परतोऽपि नात्मनः। चिदाकारस्य परिणामो जडोपादानस्यापि विष
यस्य जडत्वात्। न ह्यात्मचैतन्यमेवानात्मा स्वांशत्वेन स्वीकरोतीति चेत्तत्राह। चितेरप्रतिसंक्रमत्वादिति। तस्मात् किंचि
पिनाद्यात्मादर्शनादन्यत्रान्यतरांशदर्शनेनान्यतरांशाध्यासो नोपपद्यत इति तद्धर्माणामपि किंतरामित्यारभ्यथा
व एवाध्यासस्य युक्त इत्यतः प्रोक्तो ग्रंथः स्पष्टार्थः। ननु अहंकारादिषु शरीरांतेष्वहमित्येव प्रत्ययो न त्विदमिति कथम
षां युष्मत्प्रत्ययगोचरमिति तत्राह तद्बलनिर्भासितत्वेनेति। तस्यास्मत्प्रत्ययगोचरस्य चैतन्यस्य बलेन निर्भास्यत्वा रामः
दहंकारादेः प्रतिभासतो युष्मदर्थत्वाभावेऽप्यपरोक्षतया स्वभावस्य चेतनलक्षणेन युष्मदर्थभावो युज्यत इत्यर्थः। चैतन्या ६

त्पृथगिवावभासंत इति अंतःकरण इत्युपाधौ नेनेवावभासंत इत्यर्थः। भूयोऽवयवसामान्यसादृश्याभावादात्मनि कर्तृत्वादेर
हंकाराद्युपाधिनिमित्तभ्रमत्वेऽपि शरीराद्यध्यासस्य सोपाधिकभ्रमत्वाभावात् तद्दृष्टार्थाहंकारादिशरीरान्तपदार्थाध्या
सस्यासंभवमप्रामभंगीकरोति यद्यप्येवमिति। निरुपाधिकभ्रमकार्यदर्शनमेव गुणावयवसामान्याभावेऽपि केतकीग
न्धसदृशः सर्पगंधः रतिवत्सादृश्यांतरं वा शंखपीतिमादाविव कारणांतरं वा कल्पयतीत्याह। तथापीत्यादिना एवमध्या
सस्यापीत्यभिप्राय इत्यनेन नैसर्गिकशब्दार्थमाह। प्रत्यक्चैतन्यसत्तामात्रानुबंधीति। कथमात्मनि कर्तृत्वभोक्तृत्व
दोषसंयोगा एवाध्यासः। तत्र भोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते। अकर्तुर्भोगिभावात्। कर्तृत्वं वा रागद्वेषसंयोगा
ध्यासमपेक्षते न ह्यनिस्यकर्तृत्वाभावाद्दोषसंयोगश्च भोक्तृत्वमपेक्षते अनुपभुक्तो तत्ज्ञातीये वा रागाद्यनुपपत्तेरे
वं बीजांकुरवद्धेतुपरंपरयानादित्वादध्यासस्य नैसर्गिकत्वमिति। लोकव्यवहारशब्दोऽध्यासाभिधायीति दर्शयति। लो
क इति मनुष्योऽहमित्यादिना। व्यवहाराभिज्ञाभिवदनमुपादानमर्थक्रियेत्येतच्चतुर्विधो मनुष्योऽहमिति ज्ञानाभिधाने व्यव

१० तारशब्द मर्ह इतिभावः। अन्यस्यान्यस्मिन्नावभासो विवेयत्युक्ते शुक्तौ घटइत्यादिप्रत्ययानामविद्यात्वप्रसंगो माभूदितिसत्य
स्यवस्तुने। मिथ्यावस्तुसंभेदावभासो विवेय इति स्वसिद्धांतमंगीकृत्य सत्यानृते मिथुनीकृत्येत्युक्तं। तथा चष्टे। सत्यमनिय
चैतन्यमित्यादिना। ननु प्रत्ययोपादानादर्थतः क्रियाभेदः पूर्वापरीभावश्चांगीकर्तव्यः तत्कथमध्यासमिथुनीकरणलोकव्यव
हाराणामेकार्थत्वमिति नेत्याह। अध्यस्यमिथुनीकृत्येत्यादिना। ननु किमिति स्वरूपमात्रपर्यवसानं क्रियाभेदक्त्वाप्रत्ययसामर्थ्या
दुपादीयतामिति नेत्याह उपसंहारेणेति। नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थो नैसर्गिकगुणविशिष्टो विशेष्यपदार्थोध्यासउपक्रमो
पसंहारयोर्भत्तुं युक्तइत्यभिप्रायः। किं तर्हि क्त्वाप्रत्ययालंबनमिति। प्रतिपत्तिः क्रियाभेदपूर्वापरीभावावित्याह। तथैव तत्प्रयुक्त
स्वरूपमिति वत्व्यपदेशमात्रमुपचारमात्रमित्यर्थः। कथमेवोक्तोध्यासोन्योन्यात्मतासत्यानृते अहमिदंममेदमितिविशे
शेषणभेदाद्विशिष्टोध्यासः परोपाधोभिधीयते विशिष्टार्थप्रत्ययाश्च तत्तुः क्रमेणस्वं नीतिप्रतिपत्तिनः पूर्वापरीभावं विशेष शिम
णभेदाच्च विशिष्टक्रियाभेदं चांगीकृत्य क्त्वाप्रत्ययइति न त्वाज्ञानमिथ्याज्ञानाभावमात्रमुक्तं स्यात्। मिथ्येत्युक्ते भ्रांतिज्ञानमिति स्यात्तदुभयव्यावृत्त्यर्थं १०

निरूप्यपदार्थौ दर्शयति। मिथ्याच तदज्ञानं चेत्यादिना। ननु कथं मिथ्याज्ञानमध्यासस्योपादानं। तस्मिन्सत्यध्यासोदयादसति चानु
दयादिति ब्रूमः। नन्वध्यासस्य प्रतिबंधकं तत्त्वज्ञानं तदभावश्चाज्ञानमिति प्रतिबंधकाभावविषयतयाज्ञानस्याध्यासेनान्वय
व्यतिरेकावन्यथासिद्धाविति न सारं पुष्कलकारणे हि सति कार्योत्पादविरोधि प्रतिबंधकं। न चाध्यासपुष्कलकारणे सति तत्त्वज्ञान
कार्यप्रतिबंधकतयाजायते। किंतु सत्येवाध्यासकारणे न तत्त्वज्ञानोदयः। तस्मान्नाज्ञानान्वयव्यतिरेकौ प्रतिबंधकाभावविष
यौ। तथापि विरोधिसंसर्गाभाव इति चेन्न कार्यस्य कारणापेक्षा हि प्रथमं उत्पद्यते न विरोधिसंसर्गाभावापेक्षा तस्मात्प्रथमापे
क्षितकारणमिति। सत्यं निमित्तं न तदुपादानापेक्षायामज्ञानमनुविशति सर्वं कार्यं सोपादानं भावकार्यत्वात् घटादिवदि
त्यनुमानात्। क्रियागुणादेरपि साश्रयस्यैवोत्पत्तेः उत्पद्यमानाश्रयस्यैवोपादानत्वात्। न त्वात्मांतःकरणं भ्रांतिज्ञानोपादानं
भविष्यति नानोपरिणामित्वादंतःकरणस्येंद्रियसंयोगादिसापेक्षित्वान्मिथ्यार्थप्रत्ययमात्रविपरिवर्तिनिलदयोगात् अ
धिष्ठानस्फुरणेन्यथासिद्धत्वादन्वयव्यतिरेकयोरंतःकरणस्य च जत्वात् अज्ञातत्वादात्मनो भ्रांतत्वप्रसंगाच्च। तस्मान्मि
+कृत्तिमेवान्वयव्यतिरेकौ न्यायसहितौ कुर्वते। ननु कृत्स्नविषये द्वियादि+ दोष कारण+ शोध ६

११ र्थार्थतज्ज्ञानात्मकमिथ्याभूतमध्यासमुपादानकारणसाक्षिरूपे प्रत्यग्नाश्रयस्थानतया काचादिनिमित्तकारणेषु विद्यमानेषु मि
थ्याभूतस्यैव सर्वकार्यस्वभावानुकूलस्य सर्वत्रानुगमात्। अज्ञानस्यात्माश्रयतया भ्रांतिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्या
ज्ञानमिवाध्यासोपादानं नात्मान्तःकरणवादिदोषा इति सूक्तं। आत्माश्रयाध्यासस्य शुक्तिकासंसर्गो विभ्रम इति वक्ष्यते। एक
स्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति चोदयति। कथं पुनरिति। तत्र प्रथमं तावदध्यासप्रवाहजन्मनोपादान
कारणरूपेण नैसर्गिकत्वं कार्यव्यक्तिरूपेण नैमित्तिकत्वमित्यविरोधं दर्शयितुमात्मनि भावरूपमज्ञानं साधयति। अवश्य
मेषाविद्याशक्तिरिति। अवश्यमिषेति प्रमाणद्वयं वक्तुमाह। प्रत्यक्षं तावदहमज्ञो मामन्यं च न जानामीति अपरोक्षावभासदर्श
नात्। ननु ज्ञानाभावविषयोयमवभासः नापरोक्षावभासत्वादहं सुखीतिवत्। अभावस्य षष्ठप्रमाणगम्यत्वात्स्व
ज्ञानाभाववादिनोपि नात्मनि ज्ञानाभावावगमः संभवति। मयि ज्ञानं नास्तीति प्रतिपत्तावात्मनि धर्म्मिणि प्रतियोगिनि चार्था राम
वगते तत्र ज्ञानसद्भावात्। ज्ञानाभावप्रतिपत्त्ययोगादनवगतेपि धर्म्यादौ सुतरामभावानवगमा ११

त्। षष्ठप्रमाणगोचरे फललिंगाभावानुपेयेपि ज्ञानाभावे आत्मादाववगते। नवगते व्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगादिह
तदुक्तमर्थसंख्यावाशास्त्रार्थं वा न जानामीति विषयव्यावृत्तमज्ञानमनुभूयत तत्कुण दोषप्रवृत्तेने। भावरूपाज्ञानप्रत्य
क्षवादे तु सत्यप्याश्रयप्रतियोगिज्ञाने तज्ज्ञानाभावस्यैव भावांतरस्यापि नानुपपत्तिरित्थं नु शक्यते। न चाश्रयप्रतियो
गिज्ञानभूतमपि साक्षिचैतन्यं भावांतरस्याज्ञानस्य निवर्त्तकं तस्याज्ञानविषयप्रतिभासत्वान्नहि स्वज्ञाने नैव स्व
यं निवर्त्यते। नन्वज्ञानस्य व्यावर्त्तको विषयः कथं साक्षिचैतन्येनावभास्यते प्रमाणायत्तत्वाद्विषयसिद्धेरिति। उच्य
ते। सर्ववस्तु ज्ञाततया वाज्ञाततया साक्षिचैतन्यस्य विषय एव। तत्र ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षते। अन्यत्सा
मान्याकारेण विशेषाकारेण वाज्ञानता व्यावर्त्तकतया सदावभास्यत इत्युपपत्तिसिद्धमज्ञानं प्रत्यक्षं भावरूपमेवात्म
न्यज्ञानं गमयतीति सिद्धं। अनुमानमपि। विवादगोचरापन्नं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्तस्वविषयावरण
स्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति। अप्रकाशितार्थप्रकाशकत्वादंधकारे प्रथमोत्पन्नप्रदीपप्रभावदि

ति। ततश्च ज्ञानेन समानाश्रयविषयं भावरूपमज्ञानं सिद्धं। शक्तिरित्यात्मपरतंत्रतयात्मनः सर्वकार्योपादानत्वस्यतिर्वोढत्व-
माह। तत्स्वरूपमात्मतत्त्वं तत्सत्तामात्रानुसंबंधिनीत्यर्थः। किं त्वार्थापत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणमित्याह। अन्य-
थामिथ्यार्थावभासानुपपत्तेरिति। विशुद्धब्रह्मात्मनि शुक्तिकायां चाहंकाररजताद्यध्यासस्यार्थज्ञानात्मकस्य मि-
थ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानमन्वेषणीयं। सत्योपादानत्वे कार्यस्य कारणस्वभावतयाध्यासस्यापि सत्यत्व-
प्रसंगात्। तस्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानांतरकल्पनाप्रसंगादनाद्येव तन्मिथ्योपादानं कल्पनीयं। यच्चा-
नादि स्वयं मिथ्या मिथ्योपादानमात्मसंबंधित्वं तदज्ञानमिति मिथ्याध्यास एव तथाविधाज्ञानोपादानकारणमंतरेणानुप-
पद्यमानस्तत्कल्पयतीत्युक्तं। ननु येन स्वाश्रयत्तिशय उत्पद्यते स तस्य विषयः न चाज्ञानेनात्मनि कश्चिदावरणातिशयजन्म प्रमा-
णाभावात्। अर्थानुपपत्तेश्च। न तावदवगते नीलार्थे तत्रावरणकृत्यमवगंतुं शक्यते अनवगते तु न तरां। नन्ववगते सति पूर्वमावृतत्वमि- राम:
त्यवगम्यतां न धारावाहिकविज्ञानगम्येऽर्थे पूर्वमवगतस्यापि पश्चादवगमदर्शनान्न निदानीमिवावगतत्वं पूर्वमनवगतिं साधयति। १२

न पूर्वानवगतिमविज्ञायेदानीमेवावगतमित्यवधारणायोगात्। ननु पूर्वापरप्रत्याभिज्ञायां मध्येऽनवगतिरवगम्यत इति चेत्। न प्रत्यभि-
ज्ञानुपपत्तिर्मध्येऽनवगतिं साधयति धारावाहिकेऽप्यात्मनि सदावगते तद्दर्शनान्मध्ये ज्ञानस्मृत्यभावादनवगतिरवगम्यत इति चे-
त्। नावगतेऽपि स्मृतिनियमाभावात्। तथापि विषयानवगतिः प्रतीयत इति चेत् सत्यं विषयैः सह अज्ञानस्य साक्षिचैतन्येऽध्या-
सात् प्रतिभासः न चाध्यस्तस्यावरणमिति। रूप्यादिवदध्यस्तस्य प्रमाणगम्यभावात्तस्मान्नास्यानात्मन्यावरणे प्रमाणं।
न च स्वयमेव प्रकाशहीनस्य जडस्यावरणार्थोऽपि संभवति तस्मादतिशयाभावान्नाज्ञानविषयोऽनात्मेति तत्राह सा च नज-
डेष्वपि वस्तुषु तत्स्वरूपावभासं प्रबध्नातीति। किं त्वन्यदेवानात्मन्यतिशयकार्यं कृत्वा तद्विषयमज्ञानमिति वक्ष्यत इत्यभिप्रा-
यः। तत्र हेतुः प्रमाणवैकल्यादेवेति। अथवा चैतन्यप्रकाशेन जडानां नित्यवदन्वयानां नित्यवत्प्रकाशप्राप्तिसंभवे सैवाना-
त्मस्यावरणकृत्यमित्याशंक्याह। प्रमाणवैकल्यादेवेति। अनात्मप्रमाणस्य चैतन्यवैकल्यादावरणादेवाविषयानवगतिसि-
द्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः। इतश्च नानात्मन्यावरणमित्याह रज्ज्वज्ञानप्रतिभासादिति। यद्यात्माश्रयमज्ञान-

पं॰वि॰

१३ मत्वात्मावरणं स्यान्न तदावरणविनाशमंतरेण विषयावभासायोगात्। विषयज्ञानेनात्मन्यज्ञानं विवर्त्यते नतः सत्यामेवा
त्मन्यविद्यायां त्रिषुपि कालेषु विषयस्वरूपप्रतिभासदर्शनान्नानात्मावरणमज्ञानमिति भावः। ननु शुक्तिकाविषयमज्ञा
नमन्यदेव तद्ब्रह्मज्ञानं निवर्त्तते। अन्यच्चात्मविषयमज्ञानमात्मनि दृश्यमानमिति। तत्राश्रयमात्मविषयं वाज्ञानमंतरेण
नात्मसत्प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावाद्विषयाग्रहणस्य प्रमाणवैकल्यादप्युपपत्तेः। किंच तर्हि अनिर्व
मज्ञानजन्यमाश्रित्य बाह्याध्यात्मिकेषु वस्तुषु इत्यनात्मविषयमज्ञानं दर्शितमिति तदाह। भ्रान्तस्तत्त्वरूपानवभास
हेतुरेव केवलं। न चात्राप्यनिर्वृत्तिः समाना। कथं शुक्तिकाज्ञानं हि रूप्यान्तरावभासं निवर्त्तयत् तदुपादानमज्ञानमपि नि
वर्त्तयतीति नेमतं तत्र कथं शुक्तिकाज्ञानान्ब्रह्मज्ञाने नाध्यासे निवर्त्तमाने पुनरात्मन्यज्ञानं दृश्येतातः प्रतिविषयम
ज्ञानभेदोऽध्यासस्याज्ञानानुपादाननिवृत्तिमंतरेणाध्यासनिवृत्तिर्वा समाश्रयणीयेति। उच्यते। अस्मिन्पक्षे शुक्ति राम॰
कादिज्ञानेरजताद्यध्यासानां स्वकारणे प्रविलयमात्रं क्रियते। मुसलप्रहारेणेव घटस्याथवा मूलाज्ञानस्यैवावस्थाभेदा १३

रजताद्युपादानाच्छुक्तिकादिज्ञानैः सहाध्यासेन निवर्त्यंत इति कल्प्यतां। कथं पुनर्लोके सह ज्ञानेनाध्यासस्य तत्त्वज्ञानान्निवृत्ते
रवगतिपत्तौ ब्रह्मज्ञानात्सहाज्ञानेनाध्यासस्य निवृत्तिदृष्टद्वारेण कल्प्यत इति नैष दोषः तत्त्वावभासविरोधिनोऽग्रहणमिथ्याज्ञा
नादेस्तत्त्वज्ञानेन निवृत्तिदर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात्तस्य ब्रह्मज्ञानान्निवृत्तेरु
पपत्तेः। न चावरणपक्षोक्तदोषप्रसंगः विषयव्यावृत्तरूपानन्तरस्यात्मनि ज्ञानेनावगमात्। न चैवमप्यात्मन्यज्ञाननिर्मितमावर
णत्वं नास्ति। कथं। न तावदावरणं प्रकाशविलोपः स्वरूपस्यानपायात्। नापि सत एव प्रकाशस्य कार्यप्रतिबंधः ज्ञानस्य विषया
वभासात्मनोऽनादित्वस्य स्वकार्ये प्रतिबंधप्रतीक्षयोरभावात्। तस्मान्नैवात्मन्यपि भावरूपमज्ञानमनुपयोगादिति। तत्राह। प्र
सगात्मनि रुचिस्वभावत्वात् स्वयंप्रकाशमान इत्यादिना तस्यानवभासः इत्यंतेन ग्रंथेनायमर्थः। अस्ति प्रकाशत इत्यादिभि
शादिव्यवहारपुष्कलकारणे सति नास्ति न प्रकाशत इति योयमात्मनत्वावलंबनो व्यवहारः स भावरूपेणकेनचिदात्मन्यावरण
मंतरेण नोपपद्यते। सति पुष्कलकारणे सति वारणे सन्निहिते घटे प्रकाशत इत्यादिव्यवहारदर्शनात् तो नास्ति न स्फुरति न प्रकाशते

पं·वि·

१४ नेति व्यवहारोऽन्यथानुपपत्त्याभावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुदायार्थः। नन्वभिव्यक्त्यर्थमात्मनि प्रकाशनद
त्यादिव्यवहारं प्रति पुष्कलकारणतां दर्शयति। चितिस्वभावत्वादिति। किं तर्हि आवरणमिति। तत्राह। ब्रह्मस्वरूपानवभास
स्येति। नास्ति प्रकाशत इति व्यवहारालंबनयोऽपुत्वस्य व्यवहारकार्यदर्शनादेव कल्प्यमानत्वादित्यर्थः। न चाधिष्ठानप्रतिबंध
मंतरेण तत्त्व+विपर्ययकार्यमुपपद्यते। विद्यासंबंधादेवावरणस्यानिरूपितात्कारतानव युक्तेति भावः। ननु प्रमाणाभावेऽप्यादेवा
त्राप्यग्रहणमिति नेत्याह। अनन्यमितित्वादिति। अतो नावभासात् पुष्कलकारेसतिपरिशेषादिदमायातमित्याह। तद्धत
निसर्गसिद्धाविद्याशक्तिप्रतिबंधादेव तस्यानवभास इति। मूर्त्तद्रव्यांतरस्यासंभवादिति भावः। अंतःकार्यदर्शनोन्नेयमाव
रणं तत्त्वं विपर्ययं वात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या कल्प्यत इत्याह। जनः साप्रत्यक्षिती
निनत्त्वग्रहणमिथ्याज्ञानतत्संस्कारेभ्योऽन्यदज्ञानं नाम न पश्याम इति। तदेव च जीवस्य स्वयंप्रकाशमपि ब्रह्मस्वरूपावभा राम·
संप्रतिबध्नातीति नेत्याह सुषुप्ताद्येचेति। तत्राप्यविद्याशक्तिः संस्कारशेषं तिष्ठति न संस्कारादयएवाज्ञानमित्यर्थः। कथं। तत १४

प्रसुप्तादौ स्वयंप्रकाशब्रह्मस्वरूपानवभासः पुरुषांतरसंवेदनवद्दृष्टिर्भिन्नत्वादिति शक्यं वक्तुं। एकत्वश्रुतेः। नापि भ्रमि
थ्याज्ञानप्रतिबंधान्न तत्र तस्याभावात्। नापि तत्संस्कारप्रतिबंधात्। भ्रांतिसंस्काराणां तत्त्वावभासप्रतिबंधकत्वाभावा
सत्स्वपि रजतभ्रमसंस्कारेषु शुक्तिकावबोधदर्शनान्नाप्यग्रहणप्रतिबंधात् स्वरूपग्रहणस्य नित्यत्वात् स्वयंप्रकाशमा
नेसंवेदने तद्विषयकाराचित्काग्रहणस्याप्रतिबंधकत्वान्नापि कर्म्मणां स्वरूपावभासविरोधिता सर्वदाणुमात्रस्यापि
चैतन्यस्यानवभासप्रसंगात्। ज्ञानेपि तु अमितिचेत्। न तस्य स्वविषयत्वेनान्यावभासप्रति अप्रतिबंधकत्वात्। न चा
ज्ञानस्यैव कर्म्मणां नित्यत्वसाक्षित्वेनान्येनावभास्यता येन तदवभासकतया साक्षित्वेनान्यमप्रतिबद्धप्रकाशेत। न च क
र्माणि स्वाश्रयावभासविरोधीनीति प्रमाणमस्ति। संस्कारत्वाच्च कर्म्मणां भ्रांतिसंस्कारवदप्रतिबंधकता। तस्मात्सुषुप्त्या
दौ स्वरूपानवभासो व्यवहाराग्रहणमिथ्याज्ञानतत्संस्कारकर्म्मभ्योऽन्यदेव किंचित्प्रतिबंधकमज्ञानं कल्पयतीत्यर्थः।।
ननु द्रव्यांतरमेव प्रतिबंधकं कल्प्यतां किमज्ञानकल्पनयेति। नेत्याह। ज्ञानाप्रतिबंधनिवृत्तिमंतरेण स्वविषयावभास

पं·वि०

१५

योगात्। ज्ञाननिवर्त्यस्य चाज्ञानत्वादत्र कश्चिद्दृष्टाभ्यां सर्वसंकरवादी वेदान्तार्थग्रहणसंप्रदायहीनो दुर्ज्ञेनमरणीयां वाचं ज
ल्पति। न किल ग्रहणमिथ्याज्ञानतत्संस्कारेभ्योऽन्यत्सकलसंसारबीजभूतमवस्त्वत्र येऽप्यनपाय्यासंसारविमोक्षाद्दृश्य
मानमज्ञानं नामास्ति। किं तु भ्रान्तिज्ञानग्रहणं चाज्ञानमिति। अयं प्रष्टव्यः। केयं भ्रान्तिरिति। अहंकारादिशरीरपर्यन्ते
नात्मन्यात्मबुद्धिरिति चेदहो विस्मरणशीलता सर्वत्र संकीर्णचेतसः खण्डो गौरित्यादिभेदाभेदप्रत्ययं प्रमाणमुपयन्नहं म
नुष्य इति प्रत्ययं भेदाभेदविषयं किमित्युपेक्षसे। नाहं मनुष्यो ब्रह्मास्मीति प्रत्ययसामर्थ्यादिति चेन्न। नायं खण्डो गौः किं तु
मुण्डो गौरिति प्रत्ययेऽपि खण्डमुण्डाभ्यां गोत्वस्याभेदवत् शरीरब्रह्मभ्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः इदं रजतव
द्भ्रान्तिरिति चेत्। न खण्डो गौरित्यत्रापि तथाप्रसंगात्। नायं खण्डो गौः किं तु मुण्ड इति व्यस्तं न खण्डस्य गोत्वापायो निषेधप्र
त्ययसामर्थ्यात्तत्र व्यवहारानुच्छेदात्प्रामाण्यमिति चेत्। तदहं मनुष्य इत्यत्रापि तुल्यं मोक्षावस्थायामपि सर्वात्मत्वानु रामः
त्तव सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात्। जातिव्यक्तिगुणगुणिकार्यकारणविशिष्टस्वरूपांशांशिसंबंधाय त्रयि १५

तेन त्वभेदाभेदो न शरीरात्मनोस्तेषामभावादिति चेत्। तर्हि शरीरशरीरिसंबंधोऽपि गुणगुण्यादिवद्भेदनिमित्तं किं न स्यादन्य
था सर्वसंकरवादितया क्षपणकशिष्यता चिरकालसमुपार्जिता बाध्येत। अस्मिंश्च चेतनस्वरूपशरीरयोः कार्यकारणभाव
श्चेतनस्वरूपांशस्य ब्रह्मत्वादतो न तेभ्रान्तिरस्ति। किं च भ्रान्तिज्ञानमन्तःकरणपरिणामश्चेतनादात्माश्रया विद्या न स्यादन्तःकरण
परिणाम एवात्मनि भ्रमरूप इति चेत्तथाप्यन्यथाख्यातिवादिनः संसर्गस्य शून्यत्वादात्मविद्यासंबंधो न स्यान्न चात्मपरिणामोऽन्त
तिः अपरिणामित्वान्न च ज्ञानगुणस्य द्रव्यस्य पुनर्ज्ञानगुणान्तराकारेण परिणामसंभवस्तत्त्वान्तरजातीयस्यैकस्मिन्द्रव्ये गुण
द्वयस्य युगपत्समवायायोगात् न हि पृथिवी रूपद्वयं युगपत्समवैति तस्मादनादिसिद्धमिथ्याज्ञानानभ्युपगमेन काचित्सर्वस
फरवादिनो विद्यासंभवस्यानादिमिथ्याज्ञानसंबंधोऽप्यात्मनि अज्ञानवत्कालानिकत्वादाकाशकाशवदात्मनः कूटस्थता
न विहन्तीत्यलमतिप्रसंगेन विरेण। अत्र प्रसक्तानुमानार्थापत्तयो नादिभावरूपाज्ञाने प्रमाणत्वेनोपन्यस्ताः तत्रैवं भूतेन
कारणरूपेण कार्यरूपेण च नैमित्तिकत्वनैसर्गिकत्वेन विरुद्धमित्युपसंहरति। अतो नैसर्गिकोऽयमहंकारोति। अन्योन्यधर्माश्च या

वि॰
१६ उत्तरिदं रजतमिति वदध्यासे द्वैरूप्यमहमित्यत्रापि वक्तव्यमिति तिमेहेत्वैकरूपेणावभासते न तेनाध्यास इति चोदयति। शोधय
दिरध्यासस्वरूपदर्शयतीत्यंतो ग्रंथः स्पष्टार्थः। निष्कलंकश्चैतन्यैकतानं निरंशानंदैकरसे ऽज्ञानादिसाक्षिण्यनादिसिद्धेप्य ज्ञानाध्या
सिकाहंवित्कमध्यासमंगीकृत्याह। इमिति। तावत्प्रथमोध्यास इतीति नन्वहमिति निरंशं चैतन्यमात्रमिति। यथाद्वैरूपेणाध्यास
भवस्तथावक्तव्यत इत्याह। यथाध्यस्तांशांतर्भाव इति। नन्वंतःकरणेंद्रियाणामात्मनः पृथक्त्वेनोपलंभाभावाद्ध्यस्ततयैव
सिद्धेरात्मत्वात्ताववबोधेन च स्वरूपतो विलयप्रवणा स्वरूपेण स संश्चरूपेण चात्मन्यध्यस्ततया सिद्धिरस्तु शरीरं पुनरिं
द्रियैरिदंबुद्धिग्राह्यं नतत्केवलसाक्षिवेद्यताभावादुत्क्रांतेप्यात्मानि पृथगुपलब्धेः मृतेषु लयप्रवणाच्च नाध्यस्ततया सिद्धमि
ति चोदयति। ननु शरीरमित्यहं कर्तुरिति। शरीरव्यतिरिक्तं मम बुद्धिग्राह्यं तं स्वतन्त्रामतध्यस्तमित्याह मम इदमिति चेति। शरीरा
दिपदार्थस्वरूपस्य मिथ्याकल्पितकर्तृभोक्तृप्रमातृदोषसंयुक्तात्मार्थतयैव कार्यतया भोग्यतया प्रमेयतयोपलभ्यमाना
दृश्येन वैस्पष्टत्वात्स्वरूपेणापि मिथ्यात्वं स्वप्नदृष्टानेनानुमातुं शक्यत इत्याह। उच्यते यदेवाहं कर्तेत्यादिना दार्ष्टांतिकं दर्शय राम॰
ति। एवमहं कर्तृत्वप्रमुखवद् इति दृष्टिदृश्यावभासस्याविद्याध्यासत्वे शास्त्रीयविषयप्रयोजनसिद्धिः फलिष्यतीत्याह। अतस्तादृक १६

प्रत्यगात्मानुभवपर्यंतादिति। नाहंरूपप्रत्यगात्मानुभवो बंधनिवृत्तिश्चोपपद्यत इत्यर्थः। विषयप्रयोजनसिद्धौ किमायातमि
ति शास्त्रारंभकर्तव्यतासिद्धेत्याह। तदर्थविषयवेदांतमीमांसारंभ इति। ते एव प्रत्यगात्मानुभवबंधनिवृत्ती इत्यर्थः। प्रयो
जनविषयश्चयस्य वेदांतमीमांसारंभस्येति विग्रहः। सर्वलोकप्रत्यक्ष इत्यंतस्योत्तरभाष्यस्य तात्पर्यमाहाहंकोयमिति।
इदानीं विभज्यावांतरतात्पर्यं कथयति। तत्रापीति। लक्षणसंभावनापरं भाष्यमाक्षिपति। यद्येवमिति। किमिति लक्षणसं
भावने नापेक्षेते इति तत्राह। तस्य नितरांतरूपमिति। प्रमाणमेव हि प्रमेयमन्यस्यान्यात्मनावभासमध्यासं व्यवस्थापय
तु स्वदेशकालोपाधौ संभावितरूपं सद्दृष्टान्तो व्यावृत्तासाधारणरूपं व्यवस्थापयति किं पृथग्लक्षणसंभावनोपन्यासेने
त्यर्थः। नन्वनुमानादिप्रमाणनिर्ज्ञानेष्वपि वस्तुमात्रेषु विशेषेण लक्षणसंभावने पृथगपेक्षेते इत्यत आह। त्यत आह।
दुःसंपादमिति विशेषत इत्यसाधारणाकारव्यावृत्तरूपेणेत्यर्थः। तत्र द्रष्टुस्स्पष्टस्य दर्पणेनात्मात्मनावभासो विद्यत इत्येताव
ति प्रमाणं वक्ष्यते न तस्याविद्याभ्रांत्याध्यासो मिथ्यात्वेन तत्प्रमाणेन न सिध्यतीति परिहरति। उच्यते। न देहेंद्रियादि

पं॰वि॰ १७ घेत्यादिमानान्तरस्यान्यात्मतावभासप्रमाणेनैवमिथ्यात्वमपिसिध्यतिप्रत्येयैवचादितिचोदयति।तत्कस्यहेतोरिति।
मानुभवाभावादेवेतिपरिहरतितत्रोकइति।ननुप्रमाणेसतिकिमित्यनुभवाभावः प्रमाणाभेदादित्याह।बाधेहिसती
ति।बाधानुपपत्तिर्मिथ्यात्वेप्रमाणंप्रत्यक्षानुमानव्यवहारानुपपत्त्यागमाआत्मन्यनात्मावभासेप्रमाणमितिभावः
नन्विहापिबंधनिमित्तमितरेतरविवेकमंतरेणान्यस्यान्यात्मतावभासोपमित्यवगंतुनशक्यतेऽन्यथास्वस्यैवस्वेनात्म
तावभासः किन्नस्यान्नेत्याह नेहसुविघ्नतइति।यौक्तिकज्ञानादिनापरोक्षविवेकमाश्रित्यपरस्यात्मतावभासनिश्च
योऽपरोक्षबाधस्यभ्रांतिप्रतिभासोच्छेदिनोभावान्नस्पष्टोमिथ्यात्वाध्यवसायइतिभावः।अतोऽपिमिथ्यात्वस्पष्टीक
रणायलक्षणमेववक्तव्यमित्याह।तदस्मादध्यासस्येति।तर्हिलक्षणप्रमाणाभ्यामेववस्तुनिर्णयसिद्धेःप्रमाणेनैवा
संभावनानिराकरणात्संभावनापृथक्नवक्तव्येतिचोदयति।नन्वेवमपीति।सत्यपिप्रमाणसामर्थ्येप्रत्यक्षावभास राम॰ १७
मपिअसंभाव्यमानतयानिराकृतमनुभयजइत्यनुभवमेवावलंब्यपरिहरति।सत्यमेवमिति।औत्पातिकइत्यद

ष्टव्यतिरिक्तकारणरूपस्येत्यर्थः ननुप्रमाणेनैवकश्चिदसंभावनातिरस्क्रियतेयथाकाशगमनेपक्षिणांकश्चिदसंभाव
नयाप्रतिभासोयरोक्षितोपिनिरस्यतेयथासन्निकृष्टव्यादौ।नत्वात्मन्यनात्मावभासः कंपक्षमवलंब्यनास्तीत्यसंभावना
पक्षमेवेतिविशेषंदर्शयति।एवमविषयेसंगइति अधिष्ठानस्याध्यस्यमानेनसहैकज्ञानविषयत्वंवक्तव्यंतदभावान्ना
ध्याससंभवइत्याह अविषयइतिदृष्टव्यतिरिक्तस्यछेऽस्यकार्यकारणसंघातस्याध्यासात्मकत्वेनदृष्टयैवकार्यादि
वद्धोपानुषंगोवक्तव्यः तदभावान्नाध्याससंभवइत्याहासंगइति।अधिष्ठानस्याध्यस्यमानेनगुणावयवसादृश्यंव
क्तव्यंतदभावान्नाध्याससंभवइत्याह।केनचिदपिगुणादिनेति।आधिष्ठानयाथात्म्यावभासोध्यासविरोधीतज्ज्ञा
वाअनाध्याससंभवइत्याहनिष्कलंकचैतन्येनयेतिन्नात्मन्यविषयादिरूपेनावगतेनासंभावनाबुधिः अवगतेतुनाध्या
सएवतिष्ठति।कुतोसंभावनाबुद्धिरिति।नेतरसार।आत्मन्यविषयादिरूपेपरोक्षावभासोसंभावनाबुद्धिहेतुरपरोक्षा
वभासोध्यासस्यनिवर्तकइत्युक्तत्वात्।उपसंहरति।तस्मादशंकीति।तदुच्यतेतत्रिनयलक्षणसंभावनाप्रमाणक्रमेणो
च्यतइत्यर्थः अनंतरभाष्यस्यतात्पर्यमाह।आहकोयमिति।तंअणोतियुगपदर्थद्वयविवक्षयेत्यर्थः।उभयस्यचेहसंभ

पं॰वि॰ १८ वादितिलक्षणप्रश्नस्यसंभावनाक्षेपस्यचसंभवादित्यर्थः उभयमप्येवविवक्षितंचेत्संभावनैवप्रथमंकिंनप्रदर्श्यतइत्यतआ
हा तत्रापीति। स्वरूपमाख्यायेतिप्राधान्येहेतुःतथाहेतिपदोक्तिः कथनंकिमर्थमित्यर्थनिर्णयप्रधानत्वाद्वादकथायाःशास्त्रंत
त्प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहोवादइति। वादिप्रतिवादिभ्यां
गुरुशिष्याभ्यांवापक्षप्रतिपक्षपरिग्रहेणक्रियमाणार्थनिर्णयावसानावादकथात्रप्रवृत्तेतिदर्शयितुंपदोक्तिःकथन
मित्याह। तत्रैवंभूतेविषयइत्यादिना। तेनाक्षिप्तमाक्षेपरूपमप्यभिप्रायमनेनपृष्टमेवेतिमत्वाप्रत्युक्तेपुनरस्यावाक्षेप
रूपेणविवृणोतीत्याक्षेपमवतार्येतिव्याख्येयं। ननुशास्त्रेषुजल्पवितंडाभिप्रायेणापिप्रवृत्तिरस्तीतिनेत्याह। सर्व
त्रैवंविधइति। ननुलक्षणवाक्येलक्ष्याभिधायिनः पदस्याभावात्साकांक्षवचनमनर्थकमित्याशंक्यवाक्यंपूरयति
प्रश्नवाक्यस्थितमिति। ननुयस्यैवपरात्मनोऽवभासोऽध्यासइतिवक्ष्यतितत्रकथमेकेनैवपरशब्देनलक्षणंपूर्यतइत्यत
आह। तत्रपरत्रेत्युक्तइति। उक्तोग्रंथस्पष्टार्थः॥ ननुघञादिनाभावेविधानात्कथंकर्मप्रत्ययःस्मृतिशब्दोव्युत्पाद्यतइ राम॰ १८
त्यत्राह। संज्ञायामपीति। कर्तृव्यतिरिक्तेकारकेषुसंज्ञायामिवासंज्ञायामपिप्रयोगोभवत्यकर्तरिचकारकेसंज्ञाय

मितिसूत्रादित्यर्थः। ननुस्मर्यतेचेद्रूपशब्दः किमर्थइत्यस्मर्यमाणेवस्तुन्युपमासमासार्थइत्याह। स्मर्यमाणरूपमिवेति।
ननुकिमुपमासमासेनस्मर्यतएवेदंरजतमितिनेत्याह। नपुनःस्मर्यतएवेति। ननुचक्षुरादिप्रमाणाभावात्सविशेषणस्म
तिरितिनेत्याह। स्पष्टंपुरोवस्थितत्वावभासनादिति। यथान्यत्रेदंरजतमयंपटइत्यादावितरेतरसंसृष्टौसामान्यविशेषा
वपरोक्षावावभासेतेतथेहापिप्रतिभासः नहिपरमार्थेदंरजतसंवेदनाकारावभासस्तन्नामंतरेणसंसर्गसंविदनोभा
वःशक्यतेवक्तुं अर्थाभावेकथमपरोक्षासंविदितिचेत्। नाप्यथासंविदवभासाधीनत्वादर्थसत्तानिश्चयस्यानत्वर्थसत्ता
निश्चयाधीनः संवित्सत्तानिश्चयोऽर्थसत्तानिश्चयस्यापिनिश्चयांतराधीनत्वप्रसंगात्। ननुनेदंरजतमित्युत्तरसंवेदनाद
र्थाभावोनिश्चितः। नतत्रापिरूपसंवेदनेनसद्भावविषयेणविरोधात्। इदंरजतभावसंवेदनानामविवेककल्पितयोरन्तर
ज्ञानेपिसंसर्गसंवेदनाभावः किंनस्यात्। व्यवहारसंवादज्ञानादुत्तरज्ञानेसंसर्गसंवित्सद्भावश्चेत्तत्रार्थक्रियासंवादज्ञा
नादर्थसंवित्सद्भावनिश्चयइतिचेत्। ततः संवित्प्रत्यक्षवादहानादर्थक्रियासंविदोपिसंविदंतराधीनसद्भावनिश्चयप्रसंगा
त्। ननुसंप्रतिपन्नोर्थाभावः॥ नयथाप्रतिभासमेवमिथ्यारजतस्योत्तरज्ञानेननिरसनयोगस्योपगमात्। लौकिकपर

मार्थेदं रजतं प्रतियोगिकाभावविषयत्वाद्रजते त्रैकाल्याभावज्ञानस्येति। संविद्द्वयानुरोधेन व्यवस्थासिद्धेरन्यतरसंविद्
पद्बाधायोगात् तथा चोभयसंविद्विषयानुभवो नीलत्वं रजतं मिथ्यैव रजतमभादिति। नन्वपरोक्षशुक्तिज्ञानाविवेकाद्र
जतमपरोक्षतयावभासत इति नेत्याह। स्पष्टमिति। केयं स्पष्टता नाम विवेकज्ञानसमयेप्येतावन्तं कालमिदं रजतमित्यभा
दिति संसृष्टावभासत्वेन प्रत्यभिज्ञायोग्यता। अन्यथा तद्रजतमेतावन्तं कालमितो विविक्तमिति प्रतीयादथवा तन्न ज्ञानानु
तन्त्रप्रवृत्तिरिति पदार्थान्तरज्ञानानन्तरं वृत्त्योर्नियमादिहापि संसर्गप्रवृत्तिनिमित्ततासंसर्गज्ञानस्य स्पष्टेति। पूर्वदृष्टावभास
इति स्पष्टार्थः। यदा ज्ञानविशिष्टोर्थ एवाध्यासः तदा स्मर्यमाणसदृशो न्यात्मनावभासमानोऽन्योऽर्थोऽध्यास इत्येवं लक्षण
परतया वाक्ययोजितं। यदा तु तदर्थविशिष्टं ज्ञानमेवाध्यासः तदा स्मृतिसमानोऽन्यस्यान्यात्मनावभासोऽध्यास इत्येवं लक्षण
परतया तदेव वाक्यं योजयितुं वाक्यन इत्याह यतोर्थादित्यर्थाद्वाक्यसामर्थ्यादित्यर्थः कथमित्यादि स्पष्टार्थः ननु न स्मृतिश्चे
भ्रान्तिः प्रत्यक्षज्ञानवत्तत्र पूर्वानुभवजन्यत्वमित्यात्राज्ञाक्य संप्रयोगमात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं सर्वप्रमाणज रामः ११
न्यत्वमन्वयव्यतिरेकसामर्थ्यादित्याह। नत्वसंप्रयुक्तावभास इति॥ ॥ननु संस्कारजन्यत्वमुपगतं चेदन्यसंप्रयुक्तेषु

विषयदेशान्तरमन्यविषयं ज्ञानमुत्पद्यते सा स्मृतिरेवात्यथा तेन ननु पङ्कलमुत्पद्यते तदनुमानादिप्रमाणमिति प्रमाणस्मृतिर्दूरे
ऽस्मेव विज्ञानस्य न तृतीयं मिथ्याज्ञानं नामास्तीत्यख्यातिवादिप्रत्यवस्थिते। अपर आहेत्यादिना॥ ननु स्मृतिश्चेद्वयादिस्मृ
तिवत्स्वार्थगुणमाणाद्विविच्य स्मरामिति दर्शयेदित्यत आह प्रमोषस्त्विति। ननु शुक्तिकासंप्रयोगे सादृश्याद्रजतं किमिति
स्मर्यत इति सादृश्यात् शुक्तिकान्तरमेव स्मर्यतामिति नेत्याह। इन्द्रियादानामिति। ननु मा भूत्स्मृतेः प्रमोषात्स्वार्थविवेकिता
ग्रहणं तु स्वार्थस्मर्यमाणाद्विवेच्येदिति नेत्याह। संप्रयुक्तस्येति। ननु स्मृतिग्रहणयोर्योगपद्याभावात्क्रमवर्त्तित्वे पूर्वज्ञान
व्यवधानान्न प्रवृत्तिहेतुः। न च सामान्यमात्रज्ञानाद्विशेषमात्रज्ञानाद्वा प्रवृत्तिरित्यत आह। नेन दर्शनस्मरणयोर्निरन्तरोत्पत्त
योरिति। निरन्तरोत्पत्तिरेव प्रवृत्तिहेतुरित्यर्थः। नन्विदं रजतमित्यभादिति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति नेत्याह। भ्रान्तु भ्र
एवैकत्वावभास इति। जन्मान्तरानुभूतं च न स्मर्यत इति भाष्यवचनात्स्मर्यमाणत्वाभावात्कस्यचित्कस्मृतिः कथमिति चोद
यति। नन्वतास्यादिलिङ्गात्सत्य इति जन्मान्तरानुभूतलिङ्गस्मृतिः कल्प्यत इत्याह। उच्यत इति। जन्मान्तरानुभवस्योपकारि
तामाह। अन्यथानुभूतेति। किमिति तर्हि जन्मान्तरानुभूतं किञ्चिदेव स्मर्यते न सर्वमिति दोषबलादित्याह। तस्मात्तिन्नमेवेति।

पं·वि०
२०

किमिति तर्हि दोष एव जन्मांतरानुभूतं सर्वं तत्स्मारयतीत्यत आह । कार्यगम्यत्वादिति । नन्वन्यत्वेत्वज्ञानमिति शास्त्रकारैरेवं
दर्शितः संसर्गभ्रम इति नेत्याह । एतेनान्यसंप्रयोग इति वक्तव्ये च पूर्ववादिनाप्यविवेके संसर्गज्ञानकल्पना गौरवादख्यातिरेव
युक्तेति भावः । उच्यते । कथमख्यातिरिति । न तावदव्यासंभावमात्रमनभ्युपगमादिति संप्रगा आमार्थिनोऽन्यत्र प्रवृत्तिहेतु
ज्ञानमिति चेत् । यत्र तर्हि न प्रवृत्तिर्दृष्टेति तत्राध्यतत्र कथं भ्रान्तिः । अथाविविक्तानेकपदार्थज्ञानं तर्हीदमिति रजतमिति च
पुनरुक्तत्वाद्द्वयस्मृतिहेतुतयाविविक्तावभासनात्सामान्यविशेषयोरविवेकभ्रमः संभवति । न च भेदावमर्शेनैकत्व
ज्ञानमनभ्युपगच्छतः सामान्यविशेषयोरविवेकः संभवति । विच्छाकारद्वयावभासनादितरेतराभावभेदद्वित्वादिसंख्या
विशिष्टज्ञानं विवेक इति चेत् । गामानय दंडेनेति गोदंडयोस्तत्कारकत्वयोश्चाविवेको भ्रमः स्यात् । तत्राप्यानुषंगिकभेदा
दिज्ञानमस्तीति चेत् । इदमिति रजतमिति चेहाप्यपुनरुक्तत्वाद्द्वावुपक्ताकारद्वयावभासे द्वित्वाद्येवभासोऽपि यत एवाम राम
न्यथा सामान्याकाराद्विशेषाकारस्य विवेकावभासादिदमित्येवस्याद्रजतमिति भास्यान्नेदं रजतमिति । किं च प्रतीयमाना २०
कारयोर्नाविवेकोऽपुनरुक्तप्रतिभासात्प्रतीयमानाकाराविवेको न भ्रमोऽतिप्रसंगात् । तस्मान्नाविवेको भ्रमः । किं च खंडे

गौरित्यादिप्रत्ययाश्चाविविक्तानेकपदार्थविषया विभ्रमाः प्रसज्येरन् । न च ग्रहणस्मरणाविवेक एव भ्रमोऽहं मनुष्य इति ग्रह
णाविवेकस्य भ्रमत्वात् । सामान्यविशेषादौ संसर्गज्ञानमेवास्तीति चेत् । तथाप्यविविक्तानेकपदार्थज्ञानाभ्रमत्वमपि स्यात् ।
न च तत्र संसर्गप्रत्ययोऽप्यैक्यस्य तदालंबनस्याभावात् । गुणगुण्यादिसंबंधरूपालंबनमिति चेन्न प्रत्यभिज्ञायामैक्यालंबन
त्वात् । इहापि च सादृश्यसंबंध एवेदं रजतमिति संसर्गप्रत्ययालंबनं स्यात् । अस्ति च सामान्यविशेषादीनामिदं रजतयोरिव विवे
कप्रत्ययो घटस्य शौक्ल्यमिति विवेकाभ्युपगमात् । किं च ग्रहणमेव स्मर्यमाणत्वार्थं किं न विविच्याद्दोषवशाद्भावादिति
चेत् । यदि गृहीतमात्रस्य रजतस्येदंतास्ति तदा भेदापेक्षितो विशेषो धर्म्याकारः प्रतियोग्याकारो वान्येनेति गृहीत एव भेदाका
रो विविक्तः प्रतीयेत । अथ धर्मिप्रतियोग्याकारे गृहीतेऽपीतरेतरापेक्षया तृतीयमेव ज्ञानं भेदं ग्राहयतीति । न हि सर्वपदार्थज्ञा
नां भेदग्रहणात्प्रागविविक्तत्वाद्भ्रमत्वप्रसंगः । अथ न गृहीतमात्रस्य रजतस्य भेदः तर्ह्यैक्यमेवेति संसर्गज्ञानस्य सालंबनता
सिद्धिः । किं चास्मृतिधर्मिकत्वादिस्मृतिवद्गृह्यमाणत्वार्थं किमिति न विविच्यात् । स्मरणाभिमानप्रमोषादिति चेत्तत्राह । कोऽयं
स्मरणाभिमान इति । न तावत्स्मृतिरेवानस्याः प्रमोषज्ञानस्यैवाभावप्रसंगात् । स्मृतेरन्यश्चेत्कथमन्यस्य प्रमोषे परिपूर्णस्मृते

पं॰वि॰ २१ ज्ञानं स्वकार्यमर्थविवेकं न कुर्यात्। न चान्यस्मरणाभिमानो दृश्यत इति भावः। ननु पूर्वानुभवतद्देशकालानामन्यतमेन सहैत्याका
रेण स्मर्यमाणस्य संभेदः स्मरणाभिमान इति नेत्याह। न तावदनुज्ञानानुविद्धतया ग्रहणमिति। सोपमिति प्रत्यभिज्ञाभ्रमे हि स
र्वेषामेवैषां तदित्याकारस्य पूर्वानुभवदेशकालानां वस्मरामीति पर्यन्तानां संभेदावगमेपि गृह्यमाणेनाविवेकदर्शनादिति
भावः। न च पूर्वानुभवसंभेदः स्मर्यमाणे संभवतीत्याह। न ह्यनिक्तस्येति। अर्थस्मृतिसंस्कारस्य जनकं यत्त्वर्थविज्ञानं तत्स्वयं गृहीत स्व
विशेषणतया स्वेनैव न विषयीक्रियते ऽर्थमात्रविषयत्वात् पूर्वज्ञानस्य। न हि पूर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्या स्मृ
तिः समुत्पद्यते। तस्मादर्थमात्रविषयज्ञानजन्या स्मृतिरर्थमात्रमेव विषयीकरोति न पूर्वज्ञानेनाविषयीकृतं ज्ञानमप्यन्यथा
गृहीतज्ञानासीतेपि स्मृतिः स्यात्। ननु स्मर्यमाणे पूर्वानुभवसंभेदः स्वानुभवसिद्धः स तस्य पूर्वानुभवसमयेर्थावभासलिंगजन्म
मर्थज्ञानसद्भावविषयमनुमानं तानुत्पन्नं तदनुमानज्ञानसंस्कारजनिता स्मृतिरनुभवसंभिन्नमर्थं गमयति मूलज्ञानेनाप्य
र्थज्ञानविषयेणाविशिष्टार्थविषयीकरणात्। यस्मादर्थस्मृतिसमनन्तरमनुभवविशिष्टार्थस्मृत्यन्तरजननादर्थस्मृतिरेवानु राम॰ २१
भवसंभिन्नेति विभ्रमः। तस्मात्सूक्ष्ममेवार्थमित्युपसंहरति। शुद्धमिति। पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसंभिन्नं वा वस्तु

विषयीकृतं तावन्मात्रमेवावभासयति न स्वमूलज्ञानसंभिन्नमित्यर्थः। नन्वर्थस्मृतिर्वा ज्ञानसंभिन्नविषयस्मृत्यंतरं वेत्यत्रावि
वेक इति तत्रोदाहरणमाह। तथा च पदात्सदार्थस्मृतावपि। वाक्यार्थप्रत्ययविवक्षया पादवत्सपदोच्चारणपरिसमाप्तौ तावत्क्रमेणो
च्चार्यमाणेषु पदेष्वेकैकस्मात्पदादेकैकार्थविषयाणि ज्ञानान्युत्पद्यन्ते। अश्वसंबन्धिशब्ददर्शनात्संबंध्यन्तरे ऽर्थविषयाः स्मृतय इ
त्यभिहितान्वयवादिनामन्विताभिधानवादिनां च संमतम्। ननु कोसौ शब्दस्यार्थेन संबंधो यतः शब्दस्य दर्शनादर्थस्मृतिरुत्प
द्यते। अर्थबुद्धिजननसामर्थ्यमिति चेत्। किं स्मृतिजननसामर्थ्यलक्षणोन्यो वा। नवाद्यः पदानां पदार्थेषु स्मृतिव्यतिरिक्तका
र्यान्तराभावात्। न च स्मृतिजननसामर्थ्यं संबंधः। एवं स्मृतिजन्मान्यत्र सादृश्यादिसंबंधात् सत्यन्तरदर्शने सत्यन्तरस्मृतिदर्शनात्।
तस्मान्न शब्दादर्थस्मृतिरित्युच्यते संबंधज्ञानसंस्कारः शब्ददर्शनं वात्र स्मृतिहेतुः। नार्थेन संबंधविशिष्टशब्दज्ञानं येन विशिष्टे
स्मृतिसामर्थ्यमवस्थापनाद् दूषणं गीभूतसंबंधान्तरमिष्येत। संबंधविशिष्टान्तरदर्शनाद्ध्यान्तरस्मृतौ संबंधविशेषण
त्वेनान्तरस्यापि स्मृतिविषयस्य प्रागेव बुद्धस्यात्। सादृश्यादिमूलसंबंधानां बुद्धिसामर्थ्यलक्षणत्वाभावात्सामर्थ्यसंब
धादर्थान्तरत्वं न विरुध्यते। बुद्धिसामर्थ्यसंबंधाद् बुद्धिर्नोत्पद्यत इति चेत्स्ववचनविरोधः तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धिस

पं०वि०
२२

मर्थ्यसंबंधात्स्मृतपद इति सिद्धा कुतस्तत्र ज्ञानसंभेदाभाव इति तत्राह। ज्ञातस्यापीति। शब्दसामर्थ्यविषयतया संबंधित्वेन स्मृ
ति विषयत्वे ज्ञानस्यापि शब्दार्थत्वप्रसंगादिति। तथेष्टप्रभागविषयतादिस्पष्टार्थः। ननु स्मृतिज्ञानस्य त्रिकोणत्वादि
स्वगतः कश्चिद्विशेषो स्वयं नेत्स्मरणाभिमान। इति नेत्याह। नापि स्वगतो ज्ञानस्येति। ननु नित्यानुमेयेपि लिंगविशेष
कृतुविशेषादनुमानं युक्तमिति कोसौ लिंगविशेषः। न तावत्क्वाप्यविशेष इत्याह। नापि आश्रयविशेषनिमित्त इति। अस्तु तर्हि
फलविशेषो लिंगविशेष इति नेत्याह। नापि फलविशेषनिमित्त इति। ननु स्मरामीत्यनुभवः स्मरणाभिमान इत्यत आह।
यः पुनः कश्चित्कदाचिदिति। यदि स्मृतिस्मार्ययोर्न विषयत्रयानुपपत्त्यायमनुभवविशेषस्तु स्मरामीति। यदि वा त्रितयविष
यमनुमानज्ञानांतरमेव तदुभयथापि ग्रहणादित्रितयात्स्मरणादित्रितयस्य प्रागेव भेदावगममंतरेण ग्रहणादित्रितयश
ब्दव्यतिरिक्तस्मरणादित्रितयशब्दानुस्मरणं ग्रहणानुमानव्यतिरेकेण स्मरणानुमानं च न संभवति। विशिष्टाभिधेयावगम
निमित्तत्वाद्विशिष्टशब्दानुस्मरणस्य विशिष्टार्थाधिगमानुमानस्यैवेति प्रागेव स्मरामीत्यनुभवाद्ग्रहणस्मरणयोर्भेदो वक्तव्य राम०
इति भावः। ननु स्मृत्यनुभवयोरर्थमात्रविषयत्वे को भेद इत्यत आह। तस्मादिति। कारणविशेषादेव भेद इत्यर्थः। कथं वा २२

न यस्मृतेर्ज्ञानानुमानस्य चार्थविशिष्टज्ञानविषयत्वे समाने विभागावगमः कारणभेदादिति चेदिहापि तः समानं सदृशाकारेण स्मृ
तिज्ञानानुमानाद्भिद्यत इति चेत्कोयं सदृशाकारः। परोक्षकालदेशविशिष्टत्वमिति चेत्स्वनुमानादिष्वपि प्रसंगः पूर्वानुभवसंभिन्न
तेति चेत् ज्ञानानुमाने पौरुषेयवाक्यजन्यज्ञाने च प्रसंगः तस्मात्संस्कारजन्यत्वं सदृशाकार इति। अस्तु तर्हि हापीतर्थविधेयस्मृ
तिरिति नेत्याह न चेति। न च स्वपेऽहं नीलमिति गृह्यमाणविवेकः स्मर्यमाणानामन्योन्याविवेके परोक्षमेव सर्वमवभासेत। अ
तो न प्रमाणस्मृतिदृष्टान्तमेव विज्ञानस्य किंतु तृतीयं भ्रान्तिज्ञानमपीत्युपसंहरति। अतो नान्यसंप्रयोग इति। न चेत् स्मृतिः किंत
र्हीदं रजतमिति। नन्वन्यथाख्यातिरेषा तथाहि। शुक्तिकासंप्रयोगे दोषोपहतमिंद्रियं देशान्तरादिगतं रजतमपि गृह्णातीत
स्य देशान्तरावस्थितं दोषोपहतेंद्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते। नन्वननुभूतमपि यत्किंचिदपि दोषोपहतमिंद्रिय
किमिति न गृह्णाति सादृश्यादिदोषसामर्थ्यादिति वदामः तस्माद्दूरेणात्मकमन्यथाज्ञानमन्यथाख्यातिरिति उच्यते कथ
मन्यथाख्यातिः अन्याकारं ज्ञानमन्यालंबनं वा वस्तुनो वस्त्वंतरात्मनावभासो वाऽन्यथापरिणतं वस्तु विज्ञानं वा न ताव
प्रथमकल्प इत्याह। नन्वेवं सति वैपरीत्यमिति। कुतो वैपरीत्यमित्यत आह। नेतरथा विदन्तु सारिणामिति। सर्वत्र यदाकार

पं॰वि॰ २२ संवेदनं तदेवालंबनमिति नियमे रजताकारसंवेदनविषयं शुक्तिकालंबनमित्यर्थः ननु न संविदाकारतालंबनतास्य येन किंतु सं
विलग्नमुक्तव्यवहारविषयतेति चोदयति। ननु शुक्तेः स्वरूपेणापीति॥ इदं तावद्युक्तं। न हि व्याघ्रसर्पादिज्ञानात् दंडादिष्वादीयमा
नेषु व्याघ्रादिज्ञानस्य दंडाद्यालंबनं। न च द्रव्यगुणादिस्वरूपात् द्रव्यगुणादिष्वादीयमानेषु द्रव्यादीनामन्योन्यज्ञानालंबनत्वं
प्रसिद्धं। तस्मात्तदाकार एवालंबनमिति नान्याकारज्ञानमन्यालंबनमन्यथाख्यातिरिति बहिरेवोपसंहर्तव्यं अस्तु तर्हि वस्तुतो
वस्त्वंतरात्मना यभासेत इति तत्राह। अथ तथारूपावभासनमिति। तत्तावदसंतभेदवादिनां संसर्गः परमार्थः। तत्रानिर्वचनी
यत्वेनाभ्युपगमात् अन्य एव संसर्गप्रकारेण। एवं खंडोगोरिसादिसंसर्गप्रत्ययाः सर्व एव विभ्रमाः प्रसज्येरन्निति बहिरेवैकः
पक्षः प्रतिवक्तव्यः अथ भेदाभेदवादीसंसर्गमसत्तां इत्यात् तत्राह। यदि पारमार्थिकमिति। खंडोगोरिसादिवत्सर्वस्य भे
दाभेदात् न कश्चिदपि भ्रांतियाधो सर्वत्रायातोस्यातामित्यर्थः। अस्तु तर्हि अन्यथापरिणते वस्तुनि ख्यातिरन्यथाख्याति
रिति तदाह। यथा शुक्तेरेवेति। शुक्तेः परिणामनिराकरणग्रंथस्य स्पष्टार्थः। अथ पुनर्दुष्टकारणजन्मायाः प्रतीतेरित्यादिनान्यथाख्या ग्राम॰ २२
तावेव परिणामप्रकारभेदो निराक्रियते। ख्यातसंतरनिराकरणं वा। कथमत्राह। अन्यथाख्यातिवादीबुद्धेरेव रजताकारेण बहिरिति

कुतः संप्रयोगव्यतिरेकेणापरोक्षत्वाद् दुष्टत्वरूपं विज्ञानस्य रजताकारः प्राप्तः संस्कारसामर्थ्यादिति वदामः। तथाप्यस्यां ज्ञानसं
ततौ यदा कदाचित् पूर्वरजतज्ञानमुत्पन्नं तद्वसंस्कारात् उत्पन्ने नव विज्ञानजन्मोन्मेषामि वस्त्वापीक्षणिको वान्यः कश्चिदस्य संस्का
रो विद्यते। विज्ञानमात्रवादात् स चानेकज्ञानव्यवहितोपि कदाचित् सजातीयं ज्ञानांतरमुत्पादयति शालिबीजमिवानेकांकु
रादिकार्यव्यवधानेन पुनः सजातीयबीजांतरमिति यथा तज्जन्मज्ञानसंतान एव संस्कारः स च तथाविधज्ञानांतरादित्वनादि
वासनाख्योपि रजतबुध्याकारो बहिर्वदवभासत इति। सवक्तव्यः। किं तद्रजतं जायते उत वेति। न चेत् जायमानज्ञानस्वरूपतस्यादौ
कारावत्। जायते चेत् तत्रार्थांतराभावाद् यज्ञानादेव दुष्टकारणजन्माद् रजतोत्पाद इति तदाह। यद्वा पुनर्दुष्टकारणजन्मायाः
प्रतीतेरेव रजतोत्पाद इति जनकप्रतीतेः रजतात् पूर्वकालत्वादन द्विषयत्वात् तत्संतरस्या दुष्टकारणस्यतद्विषयत्वे सर्वप्र
तीतिविषयत्वप्रसंगात् दुष्टकारणप्रतीतेश्च रजते जन्यतया तदालंबनत्वे रजतस्यार्थक्रियोपयत्यासत्वप्रसंगाद् उत्पन्नमते
तद्विषयत्वाभावादप्रतीतमेव रजतं स्यादिति भावः। अन्यथाख्यातिं निराकृत्यासत्ख्यातिवादी स्वपक्षमुपसंहरति। तदेवं पारि
शेष्यादिति। असत्ख्यातिदूषणमप्युक्तमनुस्मारयति। ननु स्मृतेरिति। ननु न स्मृतित्रापि प्रहणं चेद् लौकिकमिदं ज्ञानं कथमि

तिचोदयति। कानिहिंगतिरिति किं सामग्र्यं पृच्छति। किं वा ज्ञानमथ विषयमिति। यदि सामग्र्यं तत्राह नेंद्रियज्ञानादिसादिनानवि
द्रियसंस्कारो चेत्सा सामग्री सम्यग्ज्ञानमेवेदं स्यात् स्मृतिग्रहणवदिति चोदयति कथमेतदिति दोषसहकृतत्वात् तृतीयमिदं
सामग्र्यमित्याह। उच्यते कारणदोष इति। ननु दोषः प्रागकार्यस्य प्रतिबंधको नाधिक्यहेतुरिति तत्राह। कार्यगम्यत्वादिति
नयानादेः कार्यानुदयस्य तु हेतुर्दोषः कृत्स्नाभावात्। किंत्वाधादिदूषितपर्यकार्यहेतुर्दोष इति। ननु दोषः संस्कारोद्बोधकश्चेत्त
सामग्र्यामंतर्भवतीति न तृतीयमिदं सामग्र्यमिति। तत्राह न संस्कारदुष्टकारणसंवलितेति। अथ ज्ञानस्यैक्यं चोदयते तत्राह।
सा चैकमेव ज्ञानमिति। नापीदमा संप्रयोगादंतःकरणपरिणामज्ञानमेकमुत्पद्यते न तु इदमंतत्संसर्गो वा विषयीकर्तुमीष्टे
मिथ्यावस्तुनिर्देशांतरादिगतेर्वा संप्रयोगानुपपत्तेश्चक्षुरन्विलग्नान्वयव्यतिरेकयोरधिष्ठानज्ञानोपक्षयादन्यथासिद्धेः
नापि संस्कारादिदंतांशावगमः स्मृत्यनभ्युपगमात् नापि दोषः स्वयमेव कस्यचिज्ज्ञानस्य हेतुर्दृष्टः ज्ञानकारणानामेव का
र्यविशेषनिमित्तत्वात् ततो रजतत्वसंभिन्नशुक्तिविषयमेकं ज्ञानं समस्ति। किंत्वविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रज
ताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणममाणी स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं

प्रतिपद्यत इति तेर्मतं। तत्र कथमेकज्ञानत्वमिति तत्राह एकफलत्वमिति। विषयावच्छिन्नं हि फलमवभासते न ज्ञानावच्छिन्नं विषय
श्च सत्यमिथ्यावस्तुनोरन्योन्यात्मतयैकतामापन्नस्ते नैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयं माप्येकमित्युप
चर्यत इति भावः अथ विषयः कथमिति तदाह। तस्य चेति। कुतो रजतज्ञानस्य मिथ्यात्वमित्यत आह। तेन मिथ्यात्वं वनमिति। भा
वाभावज्ञानयोर्मिथ्यात्वप्रसिध्यभावादिदं ज्ञानं समवायी मिथ्यात्वमनिर्वचनीयार्थतामेवगमयतीत्यर्थः संप्रयुक्तेर्थे संप्रयो
गो निरपेक्षो ज्ञानकारणं संस्कारश्च पूर्वानुभूतस्मृतौ निरपेक्षः तत्र निरपेक्षकारणद्वयजन्यत्वात् ज्ञानद्वयमेतन्निरंतरोत्पन्न
मित्यख्यातिवादी चोदयति। भिन्नजातीयज्ञानेति। ज्ञानभेदे हि निरंतरोत्पत्तावपि न प्रवृत्तिकेदियः संभवति। तत्र यथा वर्णज्ञाने
षु क्रमवत्तिषु ज्ञानकार्योदयान्यथानुपपत्त्या पूर्ववर्णसंस्कारसहितमंत्यवर्णज्ञानमेव हेतुत्वेन कल्प्यते करणयोगपद्याभावात् तथा
प्रवृत्तिकार्यानुपपत्तिरेव ज्ञानैक्यं कल्पयति। किं कारणभेदेनेति परिहरति नैष दोष इति। ननु कारणभेदात् कार्यभेदोप्यनुमीयात
इति। नैष दाहरणमाह। दृष्टं तेहीति। ननु तत्रापि कारणभेदात् ज्ञानभेद इति नेत्याह। उभयत्रापीति। ननु लिंगदर्शनं व्याप्तिस्मृ
तिश्च लिंगिनि ज्ञानकारणं न संस्कार इति नेत्याह। संस्कारात् उद्बोध इति ज्ञानद्वययौगपद्याभावादित्यर्थः। तस्मादित्युपसंहरति। ननु

पं॰वि॰ २५

प्रत्यभिज्ञायां संप्रयोगः पूर्वानुभूतस्मृतिश्च कारणं ज्ञानद्वययोगपद्यप्रसंगाभावाच्च संस्कार इति तत्राहायमेव च न्याय इति॥ ज्ञाना
द्ज्ञानांतरोत्पत्तौ व्यापाराभावात्संस्कार एव कारणमित्यर्थः। ननु प्रमाणांतरेष्वपि निरपेक्षकारणसमाहारो नाभिज्ञा प्रत्यक्षे जन्मान्
प्रत्यक्षं चेदं रजतज्ञानमिति तत्राह। तथाभिन्नजातीयज्ञानहेतुभूत इति ननु तत्र संस्कारः प्रमाणकारणेन संबध्यते। न तत्र स्मृतिप्रमे
णाज्ञानमेव दृष्टं न तथेदं रजतज्ञानमिति तत्राह। न त्वलैंगिकज्ञानवत्साक्षिता॥ किंच ज्ञानद्वयपक्षेऽख्यात्यावपरोक्षावभासित्
स्य प्रमाणत्वे सर्वत्र प्रतिपन्नोपाधौ विषयसत्वाभावेऽन्यथाख्यातौ प्रतिपन्नस्य संसर्गस्यान्यत्वे पुरोदेशप्रतिपन्नस्य रज
तस्य देशांतरसत्वे वा सत्याख्यातौ बहिरवभासस्यांतरत्वे वानुभवविरोधः स्यान्न तथास्मत्पक्ष इत्याह। एवं सति नानुभवविरोध
इति। ननु तथाप्यसतीति प्रतिपन्नस्यानिर्वचनीयत्वेऽनुभवविरोधः समानः। न च इदंतासंसर्गवद्रजतस्य शुक्तिकासंसर्गोपि मव
भासते। न रजतस्यापरं सत्वं। अथवा त्रिविधं सत्वं परमार्थसत्वं ब्रह्मणः अर्थक्रियासामर्थ्यसत्वं मायोपाधिकमाकाशादेरवि
द्योपाधिसत्वं रजतादेरिति परमार्थसत्वापेक्षयानिर्वचनीयमिति नानुभवो विरोधो यथानुभवमर्थसत्ताभ्युपगमायेस्मा राम॰ २६
ज्ञातित्व्यवहारः सदसद्ज्ञानयोरुपपन्नोपपत्त अक्षांतरेष्वनुभवविरोधो यत अज्ञानद्वयवादेऽस्य स्मृतित्वस्मरणाभिमानप्रमोष

तद्भेदाविवेकनिमित्तप्रवृत्त्यो जन्मांतरानुभूतस्मृतिश्च प्रतिपन्नप्रपंचबहुकल्पनं सत्याख्यातौ अन्यथाख्यातौ वा प्रतिपन्नस्याप्र
सत्यत्वमिंद्रियस्य च जन्मांतरानुभूतदेशकालव्यवहितार्थग्राहित्वं दोषस्य च तथाविधादृष्टसामर्थ्यं संसर्गस्य चान्यस्य प्रत्यक्षने
ति प्रमाणविरुद्धं बहुकल्पनीयं। अतः सर्वदोषपरिहाराय यथा प्रतिपन्नस्य मिथ्यात्वं नामैकः स्वभावो नास्ति रजतं मिथ्या रजतमि
त्येव रजतप्रभादिस्वनुभवसिद्धः समाश्रयणीयोऽविद्योपादानकल्पना चान्वयव्यतिरेकसिद्धत्वादित्याह। अतो मायामयमिति
सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदोऽवभासमानो मायामिथ्यानिर्वचनीयख्यातिरध्यास एवायमित्यर्थः। अत्र केचिदाहुः अतो
विद्यामयमिति वक्तव्यं न मायामयमिति। विभ्रमाणां तत्त्वज्ञाननिराकार्यतया विद्यात्मकत्वान्मायाविद्ययोर्भेदान्न तथाहि। माया
स्याश्रयमव्यामोहयंती कर्तुरिच्छामनुवर्त्तनेन तथाविद्या प्रसिद्धा मायाविद्ययोर्भेदो लौकिकानां। न हि मायाविनिर्मितहस्त्यश्वर
थादावविद्याशब्दं प्रयुंजत इति। उच्यते॥ ॥लक्षणभेदाल्लौकिकव्यवहारसामर्थ्याद्वा भेदः कथ्यते॥ न तावल्लक्षणभेदोऽनिर्वच
नीयतया। तत्त्वावभासप्रतिबंधविषययावभासलक्षणस्याविशेषान्मंत्रौषधादिसत्यवस्त्वेव मायानानिर्वचनीया। न॥ परि
दृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगात्तदाश्रयस्य मंत्रौषधाद्यपरिज्ञानान्न मायाशब्दप्रयोगाभावाच्च। मंत्रादेश्च का

पं॰वि॰
२६
बादिवन्निमित्तकारणत्वात्। अध्यासोपादानाविद्याशक्तिवत्कादाचित्कमायोपादानानिर्वचनीयानादिवस्तुकल्पनात्। नन्वेवमा
यांतु प्रकृतिमितिश्रुतौ मायाशब्दप्रयोगात्प्रकृतिभूतयोर्मायाविद्ययोर्विकारयोश्चाध्यासमाययोर्लक्षणाभेदादेकत्वमवगम्यते।
ननु स्वाश्रयव्यामोहाव्यामोहहेतुत्वाभ्यां लक्षणभेदो दर्शित इति। यथाश्रयोद्दृष्टव्यामुग्धस्येव पार्श्वस्थो मायां पश्यन्नथ कर्ता न तस्य
मायाविनो व्यामोहाभावः। किंतु कथंचिनिश्चयप्रतीकारज्ञानाभ्यां। अन्यथा पार्श्वस्थवत्कर्तापि व्यामुह्येदेव। अथेच्छया कर्तुंश
क्यते माया न तथाविद्येति। न तदपि मंत्रौषधादौ निमित्तकारणे कर्तुः स्वातंत्र्यात्। मायायामविद्यायामप्यगुल्यवष्टंभादिना
द्विचंद्रकेशोण्ड्रकादिभ्रमाः मंत्रौषधादिनिषेध्यत्वाच्चभ्रमाः तत्वज्ञानेप्यनुवृत्तप्रतिभासाश्च कर्तुरिच्छया निष्पाद्यते तेन चव्या
स्त्रव्यवहारात्मायाविद्याभेदस्तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरित्यादिश्रुतौ सम्यग्ज्ञाननिव
र्त्याविद्यायां मायाशब्दप्रयोगात्। तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः। इत्यादि
स्मृतौ मायाविद्ययोः सामानाधिकरण्येन तत्वज्ञानेन तत्त्वत्वाभिधानात्। मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति राम॰
सूत्रे सूत्रकारेण स्वप्ने मायाशब्दप्रयोगात्। भाष्यकारेण चाविद्या माया विद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात्। टीकाका २६

रेण चाविद्यामायाक्षरंरस्कृत्वा प्रसिद्धिकारेण चैवमेवेयमविद्या माया मिथ्याप्रत्यय इत्युक्तत्वात्। तस्माल्लक्षणैक्याद्व्य
वहारैक्यावगमादेकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन माया ऽऽच्छादनप्राधान्येनाविद्येति व्यवहारभेदः। इच्छाधीनत्वतद्वैपरी
त्येन वा व्यवहारभेद इत्युक्तं मायामयमिति। अस्तु तर्हि प्रतिपन्नोपाधावेव यथाप्रतिपत्ति परमार्थसत्वं कल्पनागौरवादिदोषप
रिहारादित्यत आह अथ पुनरिति। ननु कारणदोषवृत्तमेव नदृश्यमितित्यत आह। यतो नहीति। तद्भावेन तत्रेति सर्वपरमार्थरजत
इत्यर्थः। आत्माश्रयाविद्यात्मकत्वेपि सर्वैरविगम्यत इत्यत आह। मायामात्रत्वे इति। प्रसिद्धमायावदिति भावः। इदमाकारावच्छिन्न
साक्षिचैतन्यसमाश्रितस्य रजतस्य शुक्तिकासंभेदोप्यविद्यात्मक इति सुखादिवदनन्यवेद्यत्वमिति भावः। ज्ञानस्यैव भ्रान्तित्वप्र
प्रसिद्धानुपपत्तिः कल्पनालाघवानुभवाभ्यामनुगृहीता मिथ्यार्थज्ञानं तां गमयति युक्तमिदानीं बाधकप्रत्यक्षं स्वयमेव रजतस्य
मिथ्यात्वं प्रतिपादयतीत्याह। किंच नेदं रजतमितीति। ननु प्रतियोग्यापाधौ रजतादेरभावं बाधो बोधयति न तस्य मिथ्यात्वमिति चे
दयति। कथमिति। प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नाम तच्च बाधकज्ञाने रजतं प्रतिपन्नोपाधावभावप्रतियोगितया
वभासत इति प्रत्यक्षमित्याह तेन हि तस्येति। बाधकज्ञानसिद्धस्य प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य पुन

पं·वि· २७

अत्राहुन परामर्शाच्च बाधविषयो मिथ्यात्वमित्याह। नेदं रजतं मिथ्यैवेति। न च देशकालान्तरबुद्धिस्थसत्वादपि रजतस्यैवं बाधः संप
न्नमिति नेत्याह न चेत्केनचिद्रूपेणेति। नेदं रजतं किंतु तद्रजतं बुद्धिवेतिस्यात्परामर्शो न मिथ्यैवेति स्मृतिग्रहणाविवेककृत्वाद्व
योदाविवेत्यभिप्रायः॥ ॥ननु कोयं बाधो नाम यदिभन्यार्थिनोन्यत्र प्रवृत्तिनिरोधस्तर्हि पत्ररजतादौ परिव्राजकादेः प्रवृत्ते
रेवानुदयत्वादिति बाधस्तत्र बाधप्रसिद्धिर्नस्यात् प्रसिद्धश्च तत्रापि बाधः। न प्रवृत्तिविच्छेदो बाधः किंतु प्रवृत्तियोग्यताविच्छेद
श्चेन्न पुनरपि नैधरजताविवेकादन्यदा प्रवृत्तिदर्शनाद्योग्यताः विच्छेदादुदककज्ञानाच्च प्रवर्तमानस्य सर्पचोरादिदर्शनेन
प्रवृत्तिनिरोधे सर्पादिज्ञानादुदकज्ञानस्य बाधः प्रसिद्धिः स्याद् विविक्ततया प्रतिपन्नस्य विवेको बाध इति चेन्न सर्वपदार्थेषु
प्रथमम् अविविक्ततया प्रतिपन्नेषु पश्चादितरेतरापेक्षया भेदज्ञाने सर्वत्र बाधः स्यान्न च पदार्थज्ञानमेव भेदज्ञानं गृहीत
मात्रस्य सति भेदे विवेकाभावप्रसंगादित्युक्तं। अन्यात्मना प्रतिपन्नस्येतरात्मनाभावप्रतिपत्तिर्बाध इति चेत् शुक्तौ घट इति
प्रतिपन्नघटस्यान्यो रूपं न द्रव्यं गुण इति ज्ञाने सर्वत्र बाधः स्यान्न तथा प्रसिद्धिरस्ति। समानो च सर्वत्र भेदाभेदाविति चेत् कथं प्रति
पन्नभेदप्रतिपत्तिः सर्वत्र बाधः स्यान्न च ज्ञानस्य प्रध्वंसो बाधः स्वयं क्षणिकत्वात्। अर्थस्य च संविद्विषयस्यान्यस्य

रामः २७

वा ज्ञानेन प्रध्वंसायोगात्। बाधस्य च लोकप्रसिद्धत्वात् तस्मान्न बाधं पश्यामः॥ उच्यते॥ ॥अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलं
नेन वा सह ज्ञानेन निवृत्तिर्बाधस्तथा विधानन्यबोधनिवृत्तो बाधप्रसिद्धेरिति। स्मृतिरूपग्रहणेन कारणत्रितयजन्यत्वमुक्तं। तत्र कारण
त्रितयजन्मोन्यस्यान्यात्मतावभासो लक्षणं तदिदं लक्ष्यं न व्याप्नोतीति चोदयति। ननु न व्यापकमिति। कथं लक्षणांशस्याभाव इति
तत्राह न हि स्वप्ने शोकादाविति। संप्रयोगस्य कारणांशस्याधिष्ठानांशस्याभावादित्यर्थः। कस्तर्हि स्वप्न इति तदाह तत एवेति। तत्र वास
नाजन्यस्मृतिमात्रत्वे भ्रांतिप्रसिद्धिर्गवयादिस्मृतिवत्तस्यादिति परिहरति न तावत्स्मृतित्वमिति। ननु कारणत्रितयाभावाद्ज्ञाना
तरमपीत्याह न तु स्मृतिरूपत्वमपि नेति। कारणत्रितयजन्यत्वमन्यस्यान्यात्मतावभासं च संपादयामीत्याह अत्रोच्यत इति॥ संप्रयो
गाभावादपरोक्षावभासित्वाद् ग्रहणस्मृतिमात्रत्वे प्रत्यक्षे तृतीयमिदं विज्ञानं स्वयमेवोक्ताध्यासलक्षणं गमयितुं समर्थमिति व
दितुं प्रकारान्तरं पर्युदस्यति उक्तमेतदिति। स्वप्नप्रपंचविपरीतप्रमाणादिविज्ञानसाधनस्यान्तःकरणनिद्रादिदोषस्पर्शाद्भयसं
स्कारसहितस्य संप्रतिपन्नकारणत्रितयत्वादुक्तं स्मृतिरूपं भ्रांतिज्ञानमित्याह न हि निद्रादिदोषोपप्लुतमिति। कथं परस्पराव
भास इति तदाह तस्य चेति। निद्रादिदोषसंस्कारोपप्लुतेनान्तःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्याविद्याविषयाः

पं॰वि॰ २८ क्तिः शुक्तिनिमित्तकारणसंसर्गादध्यासं प्रति शुक्तिकारणतामापद्यमाना मिथ्यालंबनाकारेण विवर्तत इति चैतन्यमेव स्वा
विद्यया विवर्तते। नः सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासलक्षणः परत्र परावभासो विद्यत इति भावः। तथा जागरणे पिब
राधिष्ठानान्तरासंस्पृष्टानः कालावच्छिन्नतया वा साधिष्ठानसंस्पृष्टचैतन्यस्त्वविद्यारज्जुर्वा साधिष्ठानसंस्पृष्टरजताद्याकारेण
विवर्तत इति शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालंबनमिति वा सालंबनं रजतादि कल्प्यते। सर्वत्र तु चैतन्यमेव साक्षाद्वान्यावच्छि
न्नतया वा विभ्रमालंबनमिति निष्कृष्टः परत्र परावभास इत्यर्थः। आकाशाद्यशेषविषयोपरक्ततया सर्वत्रावभासमानमात्मानमन
हंत्याह मितेवावच्छिन्नमात्मानमुपादाय चोदयति नन्वेवं सत्यं तेरथेति। आत्मैवाधिष्ठानं वेदेदं रजतमिति वरहं नीलमित्येवस्य
प्रपंचो भायादित्यर्थः। निष्कृष्टाहंकारं चैतन्यमात्रमात्मानमादाय चैतन्यस्य च विश्वासमानाधिकरण्यावभासं सर्वत्राङ्गीकृत्य परि
हरति हृत्वा कृतेनाननेति पुनरप्यहंकारावच्छिन्नमादाय चोदयति नन्विति अन्तःकरणावच्छिन्ने देहात्मिति इदमिति पृथक्त्वे इत्यर्थः॥ पृथक्त्वावभासोऽप्य रा॰म॰ २८
न्तरे वेत्याह ननु देहेऽपीति। अनवच्छिन्नचैतन्यसंसृष्टतयैव भेदावभासोऽपीति भावः। पुनरप्यहंकारावच्छिन्नमादायाह भेद इत्यपि प्रतीत्य
यादित्याह। अयमपीति। निर्गमिसंधिरेव इत्थं पुनरुक्ते दानीं सर्वलोपि प्रसृतं चैतन्यं सर्वात्मना प्रकाशमानमात्मानं स्पष्टीकुर्व

न्नाह न दोषो जागरणेऽपीति। प्रातिभासिकभेदमन्तरेणात्र मानालोन भिद्यत इत्यर्थः। नन्वहमवच्छिन्ने चैतन्यादन्यान्येव विषय
गतानि चैतन्यानि किं न स्फुरन्ति अत आह। यथा तद्वस्येति। स्वयं चैतन्यहीना विषया आत्मावगतिप्रकारेणापि न संसृज्यन्ते चै
न्यपावगता इति संबंधावभासो न स्यादित्यर्थः। सर्वत्र चैतन्यावकुंठनेऽप्यहमिदमिति चात्मानात्मानौ विभक्ताविति प्रतिभा
सः कथमिति तत्राह यः पुनरिति। ननु चैतन्यमेव सर्वत्रान्तर्बहिर्भेदादिकृत्स्नावभासते चेत्कथं न स्यात्खंडता इति यत इति
चेत्सभेदोपरागनिमित्तभेदमंतरेण स्वरूपभेदानवगमादित्याह तत्स्वरूपनिरंशत्वेति। निरंशत्वस्य पाणत्वमनंतत्वं चार
पात्मभ्रमपरिमाणं वेदं चैतन्यं सर्वत्रावभासते न च निरंशत्वम भ्रमपरिमाणमिति परोपाधिपरिमाणं चैतन्यमित्यर्थः। जा
गरणेप्येवं किमु वक्तव्यं स्वप्नस्य चैतन्याधिष्ठानत्व इत्यर्थः। केवलस्वप्ननस्तो बहिः प्रत्यक्षसाधनत्वाभावादध्येत्संगीक
रणे वदोऽव्याप्तिः परिहृतेदानीं मिथ्याध्यासभ्रांतसविद्याप्रसिद्धभावे परत्र परावभासो विद्यत इति लक्षणस्याति
व्याप्तिमाह कथं न हि नामादिष्विति। अन्यस्यान्यात्मनाज्ञानमध्यासस्य लक्षणमियं तत्र स्यान्मनसी त्रियमत्र ति
व्याप्तिं परिहरति मत्संमन एवं चोदनावचनादिति। ननु ज्ञानमेव न विधीयत इति नेत्याह न हि ज्ञानमिति विधिजन्यरूपे

पं०पि०
२९

णामयत्वनिरपेक्षमेव सर्वमज्ञानस्य पुष्कलकारणमविच्छिन्नोप्यनिष्टज्ञानदर्शनादतो विधानान्नानसीक्रियेतिभावः । ननु स्मृ-
तिज्ञानमित्यारभ्य तत्केचिदित्यन्तः प्राक्तनो ग्रंथः स्पष्टार्थः । ननु अध्यासे वादिविप्रतिपत्तिदर्शनात्तत्कथं एकरूपेण लक्षणं अ-
वस्थापयितुं शक्यमत आह साक्षीति । अधिष्ठानाध्यस्यमानयोः स्वरूपतत्त्वदेशकालविशिष्टत्वे वादिनां विप्रतिपत्तिरन्यस्या-
न्यात्मतावभासमानलक्षणेन विप्रतिपत्तिः । न च लक्षणं लौकिकसामान्यविशेषादिसंसर्गप्रत्ययानां भ्रमत्वप्रसक्तिप-
रिहारायसत्यस्य मिथ्यावस्तुसंभेदावभास इति वक्तव्यादापतत्यंगीकृत्य मतांतराणि कथमस्य तित्त्वं केचिदित्यादिना ।
प्रथमस्यात्मख्यात्यसत्ख्यात्यनिर्विशेषयोर्द्वितीयस्त्वख्यातेः तृतीयस्तु शून्ये स्वाभावरजतात्मताख्यातिरिति अन्य-
ख्यात्यसत्ख्यात्योर्विशेषयोरुपन्यासः कल्पनामित्यस्य ख्यात्याख्या अविद्यमानस्यावभासमानतामितिपलक्षण-
मवादिषु इति सर्वलक्षणत्वाद्दूनयपक्षस्य संबंधोऽख्यातिवादिनापि मानसंसर्गज्ञाने संसर्गाभिमानो वाच्य इत्यव्यु-
त्याभिप्रायः । ननु स्मृतिरूपत्वाकारणत्रितयजन्यत्वमुपेक्षितमिति नेत्याह पूर्वदृष्टत्वेति । नन्वविद्यादिदोषपूर्व-
भ्रमसंस्काराभ्यामेव पदार्थमात्रात्मानि जायमानानि विभ्रमाः । न सत्यं वस्तु संप्रयोगादि समाणकारणं वा राम०
२९

पेक्षते विभ्रम इति परेणेति पदमविवक्षितमिति भ्रमवादीमतमनेनाह स्मृतिरूपः पूर्वदृष्टावभास इति । न पदार्थमात्रज्ञानं वि-
भ्रमः भ्रमत्वज्ञानस्यापि तथात्वप्रसंगात् किंत्वन्यज्ञान्यज्ञानं । ततश्चाविभ्रमेपि पदार्थज्ञाने लक्षणगमे निरूपपत्तिकमिति क-
थं निरूपपत्तिकोयमित्यादिग्रंथः स्पष्टार्थः । ननु संविद्रजतयोरितरेतराधिष्ठानत्वेन साधिष्ठाने भ्रमे संभवति तृतीयस्य
सत्यवस्तुनोधिष्ठानत्वकल्पना पुनरुक्तेति चोदयति । ननु रजते संविदिति । न च अध्यस्यमानव्यतिरेकेणाधिष्ठानस्य सिद्धिर्वक्त-
व्या । नन्वेतरेतराधिष्ठानत्वे सतीतरापेक्षत्वमिति द्वित्वादसत्त्वं तस्यादिति न आह बीजांकुरवदिति । न बीजांकुरादिवितरेत-
राश्रयता किंतु कारणपरंपरा नानवस्था इति परिहरति । नेत्रकारमिति । नन्विहापि कारणपरंपरेति । नेत्याह इह पुनर्यस्यामि-
ति । नन्विहापि न हि रजते संविद्रजतं च पूर्वपूर्वस्यां संविदि सा च स्वविषये स च पूर्वस्यां संविदीति परंपरामेव कल्पयामीति चेन्न ।
पादे तावत्सर्वपूर्वमुत्तरोत्तरस्याल्लितचेनाधिष्ठानेस्यात्ततः पूर्वपूर्वस्योत्तरोत्तरस्मिन्नध्यासे युगपदवस्थानान्नक्षणिकत्व-
हानिः । ननु बीजांकुरादावन्योन्योपादानत्वेपि न युगपदवस्थानं देशसत इति न आह बीजांकुरादिष्वपीति । अभिमतवस्तु-
सिद्धिरन्वयिकारणत्वसिद्धिरित्यर्थः । अनन्वितेपु बीजादिष्वन्वयिकारणाकांक्षायामनिरूपत्वादित्यर्थः । अतोन्वयि-

पं० वि०
३०

दृश्यमेतत्रापुपादानं। बीजादेरन्योन्यनिमित्ततेति भावः। इहापि तर्हि पूर्वस्योत्तरं प्रत्यन्वयित्वेनैवाध्यासनिमित्तता बीजा
दिवदिति। नेत्याह कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति। अयं भावः। बीजांकुरयोः कार्यकारणभावस्य दृष्टत्वा
ददृष्टेपि तयोरेव कार्यकारणपरंपरादृष्टपरंपरासान्नानवस्थादोषमावहति। संविद्रजतयोरधिष्ठानाधिष्ठेयतया निमि
त्तनैमित्तिकभावकल्पनायां परंपरैवस्यादिति दृष्टपरंपरामेवदर्शयति दृष्टत्वादेवमिति तत्रैव द्रढयति नानवस्थादोष
मतिवर्तत इत्यं परंपरामेवेत्यर्थः। अन्याकारावभासावैस्वर्वत्रमाणां परस्परावभास एव भ्रम इत्युक्ते भ्रांतिज्ञानप्रतिपन्न
विषयप्रत्यासंसर्गाभावविशिष्टं ज्ञानांतरं ज्ञानस्य बाधकत्वाच्च साधिष्ठानो भ्रम इत्याह अपि च न क्वचिदिति। नन्वनुमानात्
वचनात्संसर्गाभावमात्रमपि कदाचिद्गम्यते। न तदभावविशिष्टमवांतरमिति तत्राह। यत्राप्यनुमानादिति। तत्राप्य
भावविशिष्टवस्तुमात्रं गृह्यते विशेषाकांक्षादर्शनादिति भावः। ननु प्रध्वंसेनास्तीत्यादौ न तदभावविशिष्टवस्त्वंतरं
गृह्यते तेषामन्यत्रानध्यस्तत्वादिति तत्राह प्रध्वंसेऽपीति। अथवा सर्वभ्रमावभासेषु बाध्यावभासेषु च साक्षिचेतन
स्यावलंबनस्य विद्यमानस्योपलभ्यमानत्वान्निरधिष्ठाननिरवधिकभ्रमबाधौ साक्ष्येवाधिष्ठानमवधिश्चेत्यत इत्याह। राम० ३८

भा०

यथा सर्वलोकसाक्षिकमिति। नन्वर्थबाधे ज्ञानस्यापि बाधात् भ्रम आपन्नदवभासि साक्षिचैतन्यमपि बाध्येतेति तत्राह तद्बाधेन तद
नुषंग एवेति। अधिष्ठानत्वेनापि परिशेषादिति भावः। अनंतरस्योपसंहारः तदेव प्रपंचयति। ननु तन्मात्रस्येति। साधिष्ठानभ्रमसा
धनप्रसंगेऽध्यस्तस्यापि शून्यता निरवष्टंभाध्यस्तमप्यसदिति। प्रत्यक्षतो रजतमिति विशेषप्रतिभासायोगप्रसंगादिति भावः।
प्रतिभासनिराकरणे शून्यं न भासत इति वाक्यस्याबोधकत्वप्रसंगात् न च ध्वंसः सर्वं शून्यमेवेति तेपि मतमिति चोदयति। नन्वि
ति। शून्या व्याहृतिरपि भ्रमस्य कल्पितैवेत्याह कृ एवमाहेति। सदाकृतिमात्रभ्रमस्यासत्त्वेनाभिमतशून्यत्वनिषेधप्रतियोगित्वा
दिति भावः। ननु भ्रमस्य स्वकाले निर्वचनीयत्वेपि बाधादूर्ध्वं शून्यत्वमविशिष्टमिति शंकते नन्वपुनरिति। सर्ववादिनां सर्वं वस्तु स्व
काले वर्तमानमपि विनाशादूर्ध्वं शून्यमेवेति समतामतो न दोष इत्याह काममिति। ननु भवतु नाम सर्वस्य वस्तुनो विनाशादूर्ध्वं
शून्यता न विभ्रमगृहीतं वस्तु बाधादूर्ध्वं शून्यं भवति किंतु देशांतरादिगतमिति चेत् कुत्र किं बाधज्ञानमेव रजतादेर्देशांतरसत्त्वे गम
ति किं वेह बाधानुपपत्तिरिति तत्राह बाधकज्ञानमित्याह तथा च बाधकज्ञानमिति। नेदं रजतं देशकालांतरे वृद्धौ वेसन्न बागमादि
ति भावः। यावदभिधानसामर्थ्यं हि वाक्यमर्थं प्रतिपादयति देशांतरवर्तित्वं त्वनभिहितं न वाक्यार्थ इत्यर्थः। एवं सति प्रतिपन्न

पं॰वि॰ ३१

स्य वस्तुनोऽत्राभावोऽन्यत्र सत्त्वमंतरेणानुपपन्न इत्यर्थापत्त्या वा कथं गमयिष्यतीति नेत्याह। नार्थापत्तेरिति। अन्यथाख्यातौ निषिद्धस्य
संसर्गस्यान्यत्र ख्यातौ बहिष्ठस्य वान्यत्र सत्त्वमंतरेण निषेधदर्शनादख्यातावप्रवृत्तिच्छिद्रे सर्वस्वदानकर्तव्यताबुद्धावृत्विग्विघ्
दांतरनिमित्ताद्दक्षिणापायेऽसमाप्तिविज्ञानबाधितायां न सर्वस्वदानकर्तव्यतात्र प्रतिपन्नान्यत्र सतीति कल्प्यते। प्रवृत्तिरेव तत्र नि
रुध्यत इति चेन्न प्रवृत्तिनिरोधेन बाध इत्युक्तत्वात्। यागादिषु च प्रवर्तमानस्य राजचौरादिप्रतिबंधनिश्चयात् प्रवृत्तिनिरोधेऽपि यागा
दिबुद्धौ बाधप्रसक्त्यभावात्सांगाबाधितकर्तव्यताबुद्धेरपदाकदाचिदप्रवृत्तिसिद्धेः। किंच लोकेऽपि प्रतिपन्नोपाधावन्वयस्य निषेध
स्तस्य निषेधोपाधिसजातीयोपाध्यंतरे सत्त्वेन कल्प्यत इत्याह। इह भयप्रभावादिति। यथाप्रतिपन्नदेशे निषिद्धस्य घटस्य
तद्देशांतरे सत्त्वमेवं प्रतिपन्नदेशकालवस्तुसर्वोपाधौ निषिद्धस्य तत्प्रतियोगित्वेनाप्रतिपन्नसर्वोपाधौ सत्त्वसिद्धिरित्यर्थः। ननु क
थं सर्वशून्यस्य प्रतिपत्तिरिति तत्राह तन्मात्रेणापि तत्सिद्धेरिति। अत्रैवानिर्वचनीयमिथ्यावस्तुसद्भावमात्रेणापि तस्याः प्रतीतेः
सिद्धेरित्यर्थः। ननु तर्हि पूर्वं रजतमभूदिदानीं नेतीति घटवत्कालभेदेन निषेधः स्यान्न लौकिकपारमार्थरजतस्यात्र कालत्रये
ऽपि शून्यत्वात्तदपेक्षयानिरुपाधिकनिषेधसिद्धेर्निरुपाधिकनिषेधसामर्थ्याः स्वप्रतिपन्ने मिथ्यारजतमिति बाधानंतरं परोम राम॰ ३१

स्यते मिथ्यैव रजतमभादिति। अन्यथा कालभेदे सत्यरजतमेव स्यात्तत्रापेक्ष्य इत्यभावमात्रविषया हि तत्सर्वत्र प्रतिपत्तिर्न देशांतरे सत्य
सत्त्वं गमयति किं तु वस्तु अंशुरियमित्यधिष्ठानेऽपर्यवसिता प्रतीतिर्न कल्प्यते लिदर्शयति यत्रापि सर्वबाधप्रवर्तक इति। तदेवमित्या
द्युपसंहारः। परे तु पात्रैत्यादि स्पष्टार्थः। सत्स्वविस्पष्टार्थमित्ययमर्थः। स्मृतिरूपत्वाद्वेत् किं संस्कारजन्यत्वं पूर्वानुभवसंभेदो वास्मृत्यासादृश्य
ल्यातेरभिधीयत इति विकल्प्य संस्कारजन्यत्वमेवेति स्पष्टीकरणार्थं पूर्वदृष्टस्यावभासो न दर्शनस्य स्वरूपमिति पूर्वदृष्टसजातीयस्य स
र्वानिर्वचनीयरजताभ्युपगमान्नातिव्याप्तिः सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभासोऽथातिप्रसंगाद्दित्याद्युक्तिरभिहिता। लौ
किकानुभवसिद्धत्वादध्यासस्य तथापि युक्त्या प्रयोजनमित्याह तथा च लोकेऽनुभव इत्यादिना। ननु शुक्तिका रजतवदिति वचनेन ख्यात्यं
क्षयापपद्यत इदं रजतमित्यवभासनात्रवाधापक्षपातत्वकरणाभावादिति चोदयति। ननु शुक्तिकेति बाधकज्ञानापेक्षया शु
क्तिका रजतमवभासत इति लक्षणप्रदर्शनं बाधकज्ञानविषयतया वा तत्सामर्थ्यानिवासिद्धस्याध्यासस्य मिथ्यात्वस्य लक्षणस्यैव छद्द
नाभिधानमिति लक्ष्यलक्षणसंगतिरनेन वाक्येन तत्र प्रदर्शनत इत्याह उच्यते शुक्तिकाग्रहणमिति। ननु मिथ्यारजतमिति विशेषणाद
त्र सत्यरजतं वस्त्वमिति। नेत्याह मिथ्यात्वमपि रजतस्येति। स्वरूपपरं विशेषणं नान्यव्यावृत्तिपरमित्यर्थः। ननु रजतस्य मिथ्यात्वेन

पं॰वि॰ ३२ द्धर्मत्वादिदंतादीन्यपि मिथ्यात्वं सर्वमिथ्यात्वेन निरधिष्ठानत्वाप्रसंग इति नेत्याह नत्वासंप्रयुक्तत्वादिति। कथं तस्यासंप्रयुक्तस्य ज
तस्यापरोक्षत्वेन अत आहापरोक्षावभासस्त्विति। उदाहरणद्वयस्य तात्पर्यमाह। न च शुक्तिकोदाहरणेनेत्यादिना। अस्मदर्थेऽहमिति प्र
तिभास इत्यर्थः। प्रतिभासतो युष्मदर्थत्वाभावेपि चिदवभास्यत्वेनायुष्मदर्थलक्षणमस्तीत्याह तदवभास्यत्वेनेति। अहमिती
यचैतन्यप्रकाशात्मनि दृष्टं यदहंकारादिसंघातस्याध्यस्तत्वादध्यस्यमानव्यतिरिक्तमधिष्ठानमध्यासाधिष्ठानयाथात्म्यविषय
प्रमाणज्ञानं द्रष्टव्यमिति त्रितयमालम्ब्येति वक्तव्यं न तत्राधिष्ठानगतदोषोऽदृष्टदोषः प्रमाणकारणगतदोषो वा सर्वदोषजालमाल
म्ब्येति वक्तव्यं तदभावाच्चैतन्यस्याध्यासविषयज्ञानस्याजन्यत्वात् कारणत्रितयजन्यस्य विज्ञानस्यात्मन्यनात्माध्यासः संभ
वादगृहीतविशेषस्य सामान्यग्रहणस्याधिष्ठानत्वे निमित्तस्यात्मन्यसंभवोऽथापरोक्षसंयोगान्याध्यासलक्षणं बहिरुक्तमप्यात्म
नि संभवतीति चोदयति। ननु बहिरर्थ इत्यादिनाध्यस्यत इत्यतः प्राह नैवं नियमेन न त्विहापि बहिरर्थवदगृहीतविशेषत्वमर्थसामा
न्यादनुमीयतामिति नेत्याह न त्विह कारणान्तरापेक्षेति। ननु स्वभावावभासेपि संवेदनवदगृहीतविशेषांशोपीत्यादिनेत्याह राम॰
निरंशस्येति। मध्यमपरिमाणनिराकरणादणुरनंतो वात्मा निरंश इति। ननु निरंशोप्याकाशादिवत्प्रकाश्येनावभासत इति त ३२

आह स्वयंज्योतिषत्वाद्यैवास्य ज्योतिरित्यादिश्रुतेः ननु ज्योतिरिति प्रकाशगुणमात्रेणाभिधीयते आत्मनो गुणत्वप्रसंगादतः प्रकाशगु
णवद्द्रव्यं ज्योतिरिति जन्यज्ञानेनापि प्रकाशेनात्मा प्रकाशगुणज्योतिरितीरितेति न विरुध्यते। नन्वसारं सर्वभावानामन्यनिमित्त
प्रकाशसंसर्गित्वादात्मन्यपि तत्प्रसंगनिवारणाय स्वयंज्योतिरिति विशेषणोपपत्तेरात्मैवास्य ज्योतिरिति चेत्कारणान्तरानुकारकान्त
तरानपेक्षप्रकाशस्वरूपमेवात्मा नित्यज्ञानं जनयतीति विशेषणं किं त्वस्यात्मज्योतिष्ट्वस्यैव विशेष्यत्वात्तत्र प्रकाशकत्वस्य विशेष्यत्वयाप्रति
भासात्। किं च जन्यज्ञानं संप्रयुक्ताकारकापेक्षायां तदभावे पक्षेऽवनास्तीति। ननु ज्ञानमप्रयुक्तं जन्मापि विद्यते। न प्रकाशगुणस्यप्रयु
क्तमेव द्रव्यजन्यव्यतिरेकेणास्य द्रव्यस्याभावोजन्माभावस्य प्रदीपादिषु दृष्टत्वात्तत्रापि ज्योतिःशब्दात्मनि प्रकाशगुणस्य जन्माभावनि
श्चयात्तथातः कारणेपि प्रकाशगुणोत्पादे ज्ञानपरिणामः स्वभावत एव प्रकाशगुणवदन्तःकरणद्रव्यस्यैव विशेषपरिणामस्य ज्ञा
नत्वाभ्युपगमाच्च ज्ञानमपि स्वच्छिन्नवद्रूपं दृष्टमन्तःकरणमिति चेन्न ज्ञानगुणस्य प्रकाशस्य ज्ञानत्वात्तस्य चात्माश्रयत्वादन्तःकरण
परिणामे ज्ञानोपचारात् न च ज्ञानमात्माश्रयं द्रव्यमिति युक्तस्यैव प्रकाशगुणत्वेनात्मनो ज्योतिष्ट्वहानाज्जडप्रकाशगुणोनजन्य
स्मिन्प्रकाशगुणे जन्यत इति चेन्न प्रकाशाप्रयुक्तत्वात्स्वरूपोपाधौ जन्माभावस्य दर्पणादौ विद्यमाने प्रकाशस्यैव निरोधनसिद्धेः

पं॰ वि॰ ३३ रणत्क्षिपते प्रदीपादिवत्तद्रूपमेव प्रजायते न प्रकाशगुणः प्रज्ञानघनस्याद्वात्वचैतन्यज्योतिरात्मा न जडज्योतिरिति गम्यते विज्ञानमा
नंदं ब्रह्मेत्यादिवचनाच्च ज्ञानमिति ज्ञातृत्वमुख्येन भावार्थ इति चेन्न भावप्रतिहि विरोधाद्रूपस्य । किंच प्रतिक्षणं प्रकाशगुणक
त्मना ह्रासमेकस्यैव गुणस्य त्वापि च कल्पनमात्मनि प्रकाशगुणव्यतिरेकाभावाज्ज्ञानागन्तुकत्वे प्रमाणमिति ॥ ॥ नन्वात्मस्य
गृह्यमाणविशेषत्वमनुभवसिद्धमिति चोदयति ननु प्रत्यक्त्वरूपमिति ॥ तर्हि शुक्तिकायामिव प्रत्यग्रूपे वान्यथाभासविपर्ययौ
स्यातां न जीवत्वस्याहन्तदनवभासनादिति । ननु कार्यकारणभावहीनयोर्द्वयोः सामानाधिकरण्यमेकदेशविशिष्टसायेद
वदत इति यदतो द्वैकत्वाज्जीवब्रह्मणोरेवान्यथाभासविपर्ययाविति चोदयति ननु ब्रह्मणोप्यहमिति । नहि ज्ञानप्रकाशाविरोधा
दात्मविषयभेदाभावाज्ज्ञानाज्ञानताप्रसङ्गादस्याहङ्त्वं नहीति । तस्माद्द्वितीयाधिष्ठानब्रह्मात्मप्रमाणस्य चैतन्यस्याविद्या
कारणदोषसंसर्गश्च न संभवति उच्यते ॥ विषयत एवेति । प्रत्यक्षानुमानार्थापत्तिप्रदर्शितस्याज्ञानस्य श्रुतिसद्धर्मिविभ्र
प्रदर्शनेन क्रियते श्रुतिस्ता यदि । सुषुप्ते मिथ्याज्ञानाभावात्स्वसंस्कारस्य वा प्रतिपालिबंधकत्वात्कादाचित्कग्रहणाभाव
स्य च स्वतः सिद्धग्रहणविरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपाच्चभासेप्रात्मन तद्वभासप्रतिबंधनिमित्तमनृतंद रामः ३३

र्शयति अनृतेन हि प्रत्यूढाः तद्देमे सत्याः कामाः अनृतापिधाना इति तत्र मिथ्याज्ञानतत्संस्काराग्रहणकर्मभ्यो व्यतिरिक्तमन
वभासनिमित्तमनृतं मिथ्यावस्तु सिद्धमतीन्द्रियात्प्रोच्यति मृग्यमान इति स्वभावसिद्धेश्वरस्यानिश्चलत्वेन तद्भावाप्रतिपत्तिरेवाव
त्वेनापायात्तनश्चेश्वरभावाप्रतिपत्तेः शोकस्य च मोहनिमित्तं दर्शयति आदिशब्देन न तं विदाथ य इमा जजानान्यद्युष्माकमं
तरं बभूव नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंतीति । नीहारेण प्राज्ञानमित्यनर्थान्तरं एतेन प्रावृतत्वमेव जी
वानां जल्पापरिज्ञाने जल्प्यत्वाध्यासे च निमित्तं दर्शयति तथा ऽविद्यायामन्तरे वर्तमाना नानाक्षुधायेदयंत इति श्रयोरूपत्र
जल्पापरिज्ञाने क्रियाकारकाद्यध्यासे च निमित्तमज्ञानमविद्यां दर्शयति साप्यास्मज्ज्ञानेनाग्रहणं ज्ञानं तेन मुक्ती साध्यास्त्ययोपिद
ष्टमात्रमर्थापत्तिरपि प्रत्यक्षप्रमाणज्ञानाद्बन्धनिवृत्तिः श्रूयमाणा ब्रह्मणि आगन्तवेव्योध्यासबंधहेतुरस्तीति कल्पयतीति कृ
त्स्नस्यानुपपत्तिरथ चोदृष्टस्य इत्यादि दर्शनेविधानुपपत्तिः प्रागनेयगममंतरणेति । जीवस्य ब्रह्मस्वरूपानवभासनिमित्तं जी
वाश्रयाध्यासबंधहेतुरज्ञानं दोषाविद्यत इत्युक्तमत्र च साक्षिवेद्यस्याज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति तस्य
प्रमाणवेद्यत्वप्रसङ्ग इति । तत्र चोदयति । ननु न जीवो ब्रह्मणोन्य इति ॥ ॥ किमत्र जीवब्रह्मणोरेकत्वात्सर्वमनुपपद्यते किमेकत्वा

वि० ३४

दाश्रयविषयभेदादुपपत्ति।किंचाविद्यास्वभावस्याविद्याश्रयत्वविरोधोब्रह्मणोवासर्वज्ञत्वादिहानिरिति।नतावदज्ञानमाश्रयवि
षयभेदापेक्षंकिंत्वेकस्मिन्नेववस्तुन्याश्रयत्वमावरणंचेतिद्वयंसंपादयति।स्वाश्रयापवरकप्रदेशोद्भूतस्यद्वयसंपादितमो
वदक्रियात्मत्वादावरणत्वाच्चनहितमोवस्तुद्वयापेक्षमवभासते।अज्ञानमितिचद्वयापेक्षज्ञानप्रयुदासेनाभिधानाद्द्वयसापे
क्षवदवभासतेयथास्थितिर्गमनेनाद्यभिधीयमानाकस्यकिंविषयमगमनमितिकर्मसापेक्षवद्भातितद्वत्तमोवद्वस्त्वाश्र
यावरणमज्ञानंस्वाश्रयैकत्वेननविरुध्यते।नापिस्वाश्रयचित्प्रकाशेनविरुध्यतेऽज्ञानंस्वावभासकेनसंवेदनेनचित्प्रकाशेन
ज्ञानस्याविरुद्धत्वात्साक्षिचैतन्यस्यचाज्ञानावभासकत्वाद्देतेनचिदाश्रयत्वविरोधः।किंचजन्मज्ञानेनाज्ञानस्यवस्तुत्वात्रयेऽप्यभ
समानएवस्वपरविषयाज्ञानाश्रयत्वंसर्वैरेवोपगन्तव्यमितिनावभासमानेज्ञानाश्रयत्वविरोधः।नचप्रकाशमात्रमज्ञानविरो
धित्वज्ञानेऽभावात्प्रत्यक्प्रकाशमानेऽज्ञानसंसर्गविरोधःक्वचिद्दृष्टःविषयाणांपरप्रकाश्यानामेवतत्संसर्गविरोधात्स्वसंवे राम० ३४
दनस्यात्मस्वरूपत्वादेवतदाश्रयाज्ञानोपगमात्तदुदाहरणमथप्रोक्तंसर्वज्ञत्वविरोधादैक्येसतिनाज्ञानमुपपद्यत
इतिनजीवाश्रयत्वोपगमादन्यैक्यमुक्तंसत्संसर्गैक्येप्रतिबिंबात्मन्यध्यस्तश्यामत्वादेर्विवेकादर्शनादेवंसर्वज्ञत्वाविप

श्रयत्वयोःसमस्त्यैक्येविरोधस्तस्मान्नैक्यमविद्याश्रयत्वेनविरुध्यतेकिलविद्यामेवोपपादयतीत्याहयाटमतएवार्थादिति
एकस्यस्वप्रकाशत्वेसर्वज्ञत्वेचसत्येवानवभासदर्शनादाच्छादिकाविद्याकल्प्यतेऽन्यथाभेददर्शनजाड्यकिंचिज्ज्ञत्वग्रहणाभाव
मात्रमेवस्यात्।तत्रश्रुतमोवृतनीहाराज्ञानावृतत्वादिश्रुत्याऽनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादकाबाध्येरन्नि
ति॥ ॥नन्वैक्येब्रह्मत्वेसतिजीवब्रह्मविभागःकिंनिबंधनोपलःसर्वज्ञत्वाविद्याश्रयत्वेव्यवस्थाप्येतेतद्रूपस्यनःकरणावच्छेदात्के
चिद्भेदंकल्पयन्तीतिकादपरःस्वभावादेवाकाशाविभागात्तत्सर्वंव्यावर्तयतिअतोऽनादिसिद्धाविद्यावच्छिन्नेति।आलयरण
मात्माज्ञानमेवजीवब्रह्मविभागाध्यासोपादानंयतोजीवावच्छेदनिमित्तमज्ञानमितितच्छेदस्यापिप्रातिभासिकाध्या
सस्यतदुपादानत्वात्सतोनिरवयवस्याद्वैधीभावायोगात्कर्तृत्वभोक्तृत्वदोषसंयोगानांबीजांकुरवदनादिप्रवाहस्यदर्शि
तत्वात्तदुपादानमप्यज्ञानमनादीत्याह।नादिसिद्धेति।अनादिजीवविभागाध्यासप्रवाहस्यानाद्यविशेषकारणमंतःक
रणादीत्याह।अविद्यावच्छिन्नेति।नचांतःकरणमवच्छेदकमर्थतोविदारणाभावादवच्छेदस्यविषममात्रत्वादज्ञानस्यैवतदुपा
दानत्वादंतःकरणस्यचसम्यग्ज्ञाननिरस्यतयाऽविद्याध्यासत्वात्स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात्सत्त्वेपिसादे

अ॰वि॰ नाद्यवच्छेदोपाधित्वाभावान्नसुषुप्त्यादावंतःकरणाभावादनवच्छेदकत्वप्रसंगात्तदापि तस्य सत्त्वमतः कारणमवच्छेदकमिति
३५ चेन्न नाद्यन्तिवैयर्थ्यापत्तिः सूक्ष्मतामापन्नस्यावयवाभावे स्वरूपनाशादथावयवापचयमात्रं सूक्ष्मता नावस्थितेऽवयवि
नोऽकार्यत्वप्रसंगात्कारणात्मनास्थितिरितिचेत्किंकारणमेवावस्थितमित्यर्थः। कार्यमपीतिवा पूर्वस्मिन्नतः कारणाभावेतंचा
त्मिस्थितस्यवस्तुनोनविशेषस्तस्मात्कार्यसंस्कारविशिष्टत्वात्कित्वत्कारणावस्थानमेवसूक्ष्मतापत्तिस्ततोनांतःकरणमवच्छेदक
मस्तिकिंमाविद्यासामर्थ्याद्वजीवब्रह्मविभागसिद्धोनातिरिक्तकल्पनावकाशोजीवस्यब्रह्मण्यविद्येसविधापूर्वमेवविभाग
मपेक्षतइतिचेन्नैकस्यकस्माद्व्यतिरेकइत्यतिरेकस्यापिविभागपुरःसरत्वप्रतीतेर्यथाभेदाधीनोपिधर्मिप्रतियोगिभावोदेव
नोपहस्तलेकस्यकस्माद्भेदइतिएवमतिरेकाधीनोपिजीवब्रह्मभावेनस्मिन्नुपरज्यतेजीयातब्रह्मणोतिरेकइतिवेद्विद्यायामपि
तुल्यमेतन्निरंशत्वान्नात्मनोविभागेनभेदःसंभवतितस्मादप्यविद्यैवतदाध्यासनिमित्तमिति। नन्वविद्याकिंसंबंधिनीभेदनि
मित्तं। नतुदर्पणादिरूपंवाकिंसंबंधिविंवप्रतिबिंवभेदनिमित्तंमुखमात्रसंबंधीतिचेत्इहापिबिंबरूपमात्रसंबंध्यस्तानेन राम॰
ब्रजीवब्रह्मव्यवहारभेदंप्रवर्तयतिकथंपुनःस्वरूपमात्रसंबंधितोऽज्ञानस्यब्रह्मस्वरूपपरिहृजीवविभागैकपक्षपातित्वाद ३५

र्पणघटादेर्मुखाकाशभिदहेतुत्वतयानुगतादिसंसर्गिणोपिविद्याकार्यपरिहृस्यप्रतिबिंबघटाकाशादिपक्षपातित्ववदितिचेद
मः ननुकिमाश्रयेयमविद्याश्रनैनावदंतःकरणविशिष्टस्वरूपाश्रयाप्रमाणाभावात्। नवाहमज्ञइतिप्रतिभासएवविशिष्टाश्र
यत्वेप्रमाणंनाहमनुभवामीत्यनुभवस्यापिचैतन्यप्रकाशस्यविशिष्टाश्रयत्वप्रसंगात्तुयथायोदहनातिदग्धृत्वायसोरे
काग्निसंबंधात्परस्परसंबंधावभासःतथानुभवान्तःकरणयोरेकात्मसंबंधात्तथावभासोनांतःकरणस्यानुभवाश्रयत्वादि
तिचेदयमज्ञानांतःकरणयोरेकात्मसंबंधादहमज्ञइत्यवभासोनांतःकरणस्याज्ञानसंबंधादितितुल्यं। प्रतीतेरन्यथासिद्धो
परस्परसंबंधकल्पनायोगादात्मस्वप्यविद्यासंबंधस्यसुषुप्तेपिसंप्रतिपन्नत्वात्स्वरूपमात्राश्रयत्वात्तदुपपत्तौविशिष्टा
श्रयत्वेकःस्वतइतिचेन्नविशिष्टेपिस्वरूपसंबंधस्यविद्यमानत्वाज्जडस्यचाज्ञानाश्रयत्वेऽन्योन्याश्रयकज्ञानयोऽपितद
श्रयत्वप्रसंगान्नेतुस्वरूपेपिप्रमाणएवानुपपत्तिस्तुल्यासत्सा। अनुपपन्नरूपाश्रयत्वकल्पनाद्वंसंप्रतिपन्नेस्वरूपाश्रयत्वो
पादानंमोक्षावस्थासंबंधिनएवसंबंधाश्रयत्वादत्वप्रसिद्धेःकारणस्यैवाज्ञानमितिजल्पतिसवक्तव्यः किमात्मासदासर्वज्ञः
किंचिज्ज्ञोवेति। किंचिज्ज्ञत्वेकदाचित्किंचिन्नजानातीतिविषयानवबोधत्वेपेक्षानोदर्शितः। अथासग्रहणमिथ्याज्ञानयो

पं०वि०
२५

रात्माश्रयत्वेपिभावरूपाज्ञानमंतःकरणाश्रयमितिचेत्किंतज्ज्ञानादन्यच्चेदज्ञानंकाचकामलादीनामप्यज्ञानत्वान्नविवादः।यज्ञानविरो
धीतिनभिन्नाश्रयज्ञानाज्ञानयोरेकविषययोरपिविरोधित्वादर्शनात्।करणाश्रयमज्ञानंकर्त्राश्रयज्ञानेननिवर्त्यतइतिचेन्नप्रमाण
भावानुरूपांतरसुषुप्तौचतदीयेनांतःकरणेनलीयमानेनकरणभूतेनतन्निमित्तकर्मानुमानेपितद्दोषात्।अंतःकरणाज्ञाननिवृत्त्यदर्श
नात्भ्रांतिनिमित्तदोषत्वात्काचादिवत्करणाश्रयमज्ञानमितिचेन्नचक्षुरादावपिप्रसंगात्।तादित्वाचेषामनात्म्यज्ञानाश्रय
त्वानुपपत्तिरितिचेदंतःकरणेपितुल्यं।सत्कार्यवादाश्रयणान्नसाम्यंतःकरणमितिचेच्चक्षुरादावपितुल्यमतोनतदज्ञानाश्रय
इति।स्मरणनीहारादिवाह्येऽप्यज्ञानानामग्रहणचतोचेतनानामेवाज्ञानत्वाभिधानान्नांतःकरणाश्रयमज्ञानंकिंतुचेतनाश्रयमि
त्यलमितिविस्तरेण।तदेतदाहाविद्यावच्छिन्नानंतजीवेतिन्यायःप्रदर्शितः।श्रुतिस्त्वस्मयुष्माकमेनंदेवभवः।नीहारेणप्रावृता
तिव्यवधायकमज्ञानंदर्शयति।विभेदजनकेज्ञानेनाशमात्यंतिकंगते आत्मनोब्रह्मणोभेदमसंतंकःकरिष्यतीतिचस्मृतिः।न
न्वब्रह्मव्यतिरिक्तमनादिवस्तुनास्तीतितत्राहतथाचस्मृतिरित्यनंतरस्योपसंहारःस्पष्टार्थः।स्वयंप्रकाशस्याविद्याश्रयत्वमुपपन्नमित्यु राम०
क्तमिदानींप्रकाशमानस्याविद्याविषयभावोप्युपपद्यतइत्याक्षिपति।ननुप्रमाणविरोधइति।ननुत्वदुक्तमर्थंनजानामीतिप्रति २५

भासमानमेवाज्ञानस्याव्यावर्त्तकमवभासते।।ननुतत्रविशेषाकारस्यानवगतस्यावर्त्तकत्वानानवभासमानस्याव्यावर्त्तकतयाप्रति
भासानुपपत्तेः।ननुअस्यभासमानस्यापिनव्यावर्त्तकत्वमनुपपन्नमेवनाज्ञानसंबंधस्यप्रतिभासमात्रशरीरत्वादनुपपत्तेरलंकार
त्वात्प्रतिभासस्य।विपरीतएव।तत्रकथंप्रतीयमानस्याविद्याविषयत्वानुपपत्तिरित्याक्षिपति।किंतत्प्रमाणमिति।किंचरास्येतिपरि
हारः।संविदभेदेऽपरोक्षप्रकाशमानतानामव्याप्तिरिदमस्त्वपंज्योतिषामप्रकाशोनाभिन्नस्तत्त्वेनज्ञोवापरोक्षएवतथापिनप्रका
शतइतिसिद्धांतीपरिहरति।ननुभोक्तुरिति।ननुभोक्त्रित्यादिस्पष्टार्थः।पदार्थज्ञानस्यवभेदज्ञानमतोहमित्यस्यपदार्थज्ञानम
वभेदेपिप्रत्यक्षमितिमीमांसकंमन्यमश्चोदयमिकथंपुनर्भोक्तेति।संसर्गाध्यासोहिभेदानवगमनिमित्तइतिसर्वत्रव्यासमि
तिपरिहरति।ननुदेहोहमितिपदार्थप्रत्यक्षेणैवभेदेपिप्रत्यक्षेसामानाधिकरण्यगौणावभासइतिचोदयित्वापरिहरति।ननुगौ
णइत्यादिना।आहगौणवादीनन्वहमितिननुप्रत्यक्षावभासबाधित्वागमानाभ्यामयमतिरेकोगम्यतामितिनेत्याहागमानु
मानयोरपीति।ननुमिथ्यात्वात्प्रत्यक्षावभासस्यद्विचंद्रावभासस्येवताभ्यामेवबाधइतिचोदयति।मिथ्याज्ञातस्येति।पंत्रविचारः
पुरःसरमेवप्रत्यक्षावभासमप्यनुमानादिनाऽटितिबाधितमुच्छिन्नव्यवहारंभवतितत्रनथाभवनुपपन्नपुनर्विचारपदवीमुपारू

पं०वि० २७ उपोद्बलाबलचिंतयाबाधनिश्चयाः॥ ॥तत्रनानुमानादिनाप्रत्यक्षस्यमिथ्यात्वसिद्धिरितिमत्वाहकुतस्तर्हीत्याशंक्यानंतरस
तःप्राक्तनेनग्रंथेनस्पष्टोयंग्रंथः॥किमर्थतोव्यतिरिक्तात्मविषयोहंकारउच्यतेकिंवाप्रतिभासतोर्थतश्चेत्तत्राहयद्यपिदेहादिव्य
तिरिक्तइति॥व्यतिरेकप्रतिभासएवाध्यासविरोधितयासामानाधिकरण्यस्यगौणत्वमावहतिनत्वर्थमात्रमितिभावः॥ननुसाम
न्येनगृहीतस्यविशेषाग्रहणादन्यसंसर्गावभासोभवत्यात्मातुविशेषरूपेणगृहीतःकथंतत्राध्यासस्तत्राहइत्यतेयति।
अथप्रतिभासतएवाहंप्रत्ययोविविक्तात्मविषयइतिशंकतेयद्यपिपुनरेकांततइतिपरिहरतितन्नसत्यंचइति।यौक्तिकज्ञान
सहकृतेनाहंप्रत्ययेनात्मनिविविक्तेप्रतिपन्नेपुनःसामानाधिकरण्यप्रयोगेणमेवतन्नसामान्यात्वमपिनज्ञानेनैवेत्यभिप्रेत्याह
जिज्ञासोस्तत्कालंतर्हीति।विचारेणापिनाहंप्रत्ययस्यव्यतिरिक्तात्मविषयत्वमापाद्यतेकिंतुसर्वदास्वरूपमात्रविषयोहंप्र
त्ययोयौक्तिकज्ञानस्यस्वरूपव्यतिरेकोऽनन्तरस्यानुसंधानेपूर्ववदध्यासएवेतिपरिहारमित्युक्तइति।तत्रापिनाध्यासइतिचो
द्यमनुभवविरोधइतिपरिहारः।आकारस्यव्यतिरेकेपिकुतस्त्यादव्यतिरेकाध्यासइतिचोदयति।नत्वनुभवइति।अन्यतराव्य राम० २७
तिरेकेद्वयोरेकत्वादिदंस्येतरेतरव्यतिरेकःसिध्यतीत्याहतन्नेति।ननुमहदेनद्विद्रियजालमित्यादिचोद्यपरिहारौस्पष्टौ।किंचवि

वेकानंतरमध्यासोहंप्रत्ययमात्रेणविरुध्यतइत्युच्यतेकिंवायौक्तिकज्ञानेन।नतावदहंप्रत्ययमात्रेणेत्याहतथाप्यहंप्रत्ययस्येत्या
दिना।ननुपूर्वमात्ममात्रविषयोपियुक्तिज्ञानसंनिधानात्व्यतिरिक्तविषयोहंप्रत्ययइतिनेत्याहनोयुक्त्याविषयविवेचनेपीति।
नहिप्रत्यक्षज्ञानंज्ञानांतरसंनिधानात्स्वविषयादधिकविषयंभवतीतिभावः॥विचारजस्यज्ञानस्यानुसंधानादनुसंधानेपि
परोक्षत्वान्नापरोक्षाध्यासःप्रागवस्थानोभिद्यतइत्युपसंहरत्यतोन्यामतइति।ननुप्रत्यक्षेदेहात्मैक्याध्यासेकिमत्रैक्यप्रत्यय
मथवाध्यव्यतिरेकप्रमाणमुक्तमित्युच्यतेयुक्तिसहितागमानुमानाहंप्रत्ययैर्द्विचंद्रादिबाध्यैकत्ववत्व्यतिरेकःसिध्यतीत्युक्तं
भवतीति।तदेवस्वयंज्योतिषइतिदृष्टांतानुवादेनदार्ष्टांतिकंकथयन्पुरोग्रंथःस्पष्टार्थः।स्वयंप्रकाशत्वेप्यविद्ययाऽगम्यमाणवि
शेषत्वादात्मनोधिष्ठानयोग्यत्वकथनेनपरत्रपरावभासइतिलक्षणंत्रोदर्शितं।कारणत्रितयेप्यद्वितीयात्मावभासिचैतन्यप्र
माणंतद्गतोमिथ्याकारणदोषोत्वधोसंस्कारमिदानींलभयत्वनादित्वाधेति।नन्वध्यस्यमानाधिष्ठानविषयंकारणत्रितयजन्म
त्वकमेवज्ञानंवक्तव्यंतदभावान्नाध्यासइत्याशंक्याहपृथग्नोक्तविषयानुभवफलाभावादित्यात्मचैतन्यमेवात्माध्यात्मसंभेदा
वभासिस्वरूपेणानन्यत्वेपिविशिष्टविषयोपरक्ताकारेणजन्मनेर्भ्रांतित्वाच्चविषयाविषययोरेकस्मिन्प्रत्ययेसंभेदावभासःसंभव

पं०वि०
३८

तीति कारणत्रितयजन्यमात्मन्यनात्मावभासित्वात्मकोऽध्यासः सिद्ध इति ८५ कथं पुनरित्यादिभाष्यस्य तात्पर्यमाह कोयमध्यासो
नामेति किंवृत्तस्येति पृष्टमेवानेनाक्षिप्तमपि मयेत्य भयत्रैव कारापिशब्दौ प्रयोक्तव्यौ। अध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्व
मेवाधिष्ठानस्य दृष्टमिह तदभावान्नाध्याससंभव इत्याक्षेपग्रन्थार्थः। तत्रैकस्मिन्विज्ञाने तयोः संभिन्नतयावभास एवापेक्ष्यते विष
यतयावभासनमिति विशेषणायोगात् इति मन्वानः परिहरति न तावदयमेकान्तेनाविषय इत्यस्मत्प्रत्ययविषयत्वादित्यात्मविषयं ज्ञानमुक्त
मिति मन्वानश्चोदयति ननु विषयिण इत्येकस्यां प्रत्यग्दर्शनक्रियायामेकस्यैव कर्तृत्वेनानन्तदेव न हि परितः कर्मकारकत्वेन च
यत्स्थानमनुपपन्नमिति भावोऽस्मत्प्रत्ययगम्यत्वाद्वा इति नेत्याह तत्कथमेकस्येति तत्र सर्वतो विप्रसृतस्य सवितृप्रकाशस्याकारे
विशेषाभिव्यक्तिनिमित्तदर्पणादिवदात्मचैतन्यस्य सविकल्पतया स्फुटीकरणव्यवहारनिमित्तं भासकद्रव्यमात्मन्यध्यस्तमन्तःकर
णमस्मत्प्रत्यय इत्याहास्मत्प्रत्ययत्वाभिमतोऽहंकार इति। नन्विदं रजतमितिवदध्यस्तत्वेऽहमिति द्विरूपावभासो वक्तव्य इत्यत आ
ह सवेदमनिदमित्ययो दहतीति दग्धृत्वविशिष्टस्यायसः पिण्डस्य द्विरूपावभासवदहमुपलभ इत्युपलब्धृत्वविशिष्टस्यात्मनोऽन्तः
करणस्य चास्त्येव द्विरूपावभासः। साधारणक्रियोपरक्तमात्मादिद्रव्यमेव वस्त्वन्तरविशिष्टमवज्ञासत इति भावः। दुःखिप्रमास्यद राम०
३८

पेण परिणामिनमागमापायद्रष्टृरूपेणाहंकारविषयादिप्रत्यस्तं चैतन्यरूपेणाहमिति व्यावृत्तिरूपेण च सर्वलोकसाक्षिकं द्वैरूप्यमि
त्याह सर्वलोकसाक्षिक इति। ननु विषयसंविदाश्रय आत्मा न त्वहं जानामीति संविदाश्रयत्वेनावभासमानोऽहंकारः कथमिदमंशः
स्यादिति चोदयति। ननु किमत्र वदितव्यमिति। नन्वयो दहतीत्यादावयःपिण्डादिवदकर्तृत्वेपि दर्शनक्रियाश्रयकोटिनिक्षिप्तत्वादहं
कारस्यावभासः संभवतीति पूर्ववादिनं सिद्धान्ती चोदयति कथमिति। अयःपिण्डव्यतिरेकेण वह्नेर्दहनक्रियाश्रयत्वदर्शनवदहमर्थ
व्यतिरेकेणात्मनो ज्ञानक्रियाश्रयत्वादर्शनादहमेवात्मत्वमित्यन्तरेण ग्रन्थेन प्रतिपादयति। तत्र सांख्यास्तु चिदात्मन्यन्तःकरणे चिदा
कारप्रतिबिम्बावभासस्तथाविधबिम्बान्तःपुरःसरः प्रतिबिम्बत्वात् मुखप्रतिबिम्बवदिति। बिम्बभूतमात्मानमनुमिमते। नैयायिका वैशेषि
कास्त्विच्छादयः पृथिव्यादिमहाभूतद्रव्यातिरिक्तस्यैव द्रव्यस्य विशेषगुणास्ते बहिष्ट्वे सत्येकेन्द्रियग्राह्यत्वाद्विशेषगुणत्वाद्भूतग
नुरूपाः इष्टगन्धादिवत् दिक्कालमनसां विशेषगुणहीनत्वात् सरिशोषादिद्वादिगुणवद्द्रव्यमन्यदेवात्मेत्यनुमिमते। तथा संवेदनेषु विष
याकारप्रतिबिम्बावभासः तथाविधबिम्बसंनिधानपुरःसरोऽस्फुटत्वे सति तदवभासत्वाद्दर्पणस्फटिकगतमुखवात्कस्यवदिति नित्यानुमेय
विषया इति सौत्रान्तिकाः कल्पयन्ति तान्प्रत्याह प्रमातृप्रमेयप्रमितयस्तावदपरोक्षा इति। यदि तावत्त्वादयः प्रत्यक्षसिद्धस्यैवात्मनो ह

पं·वि·
२१

मानानिस्फुटीकारणाध्यातीतिमप्रमेयं तदानकाश्चिद्विरोधः। यदितिसानुमेयमात्मानमिच्छेयुस्तदा विषयवदहमित्यपरोक्षावभास
विरोधः। सौत्रान्तिकस्यापि यदि विषयानुमानज्ञाने साक्षाद्विषयस्यैवावभासेऽत्र प्रत्यक्षेऽप्यवभासेतनोचेत्तत्रापि राध्यं स्यादनुमानज्ञा
ने विषयस्यैवाभासनादनैकान्तिको हेतुः। न चेदनुमानज्ञानेऽपि विंबभूतविषयावभासः प्रतिज्ञानार्थस्य विंबयुः सालस्याप्रतिभा
सादनुमानानुदयप्रसक्त्यापरोक्षव्यवहारयोग्यविषयावभासविरुद्धं वानुमानमित्यलं।। विज्ञानवादिनस्तु विज्ञानाभेदनिमि
त्तएव विषयस्यापरोक्षावभास इत्याहुः। तन्निराकरोति प्रमेयं कर्मत्वेनापरोक्षमितीदं यत्स्वामीस्त्वनुभवोऽन्यविज्ञानाभेदापरो
क्षमवभासते वहिष्ठस्यापि रजतादेरपरोक्ष्यात्तदपि ज्ञानमिति चेन्न रजतवद्बाधाभावप्रसंगात्तस्माद्व्यवधानेन संविदुपाधिना
परोक्षता विषयस्येति। तत्रात्मात्ममनःसंयोगजप्रत्यक्षेणापरोक्ष इति वार्तिककारन्यायवैशेषिकानुसारिणः कल्पयंति
प्रमितिस्त्वात्मनि संयुक्तसमवायनिमित्तज्ञानान्तरादपरोक्षेति न्यायवैशेषिकौ। प्रमेयगतापि प्रमितिः संयुक्ततादात्म्याज्ज्ञा
नान्तरेणापरोक्षेति वार्तिककारीयाः। तान्प्रत्याह प्रमातृप्रमिती पुनरपरोक्षे एव केवलमिति। न तावदात्मविषयं प्रत्यक्षं ज्ञानान्त
रमनोजन्यमिति प्रमाणमस्ति। सति मनस्यात्मदर्शनादसति सुषुप्तेः दर्शनादन्वयव्यतिरेकोऽप्रमामिति चेन्न। न विषयानुभवे

राम·
२१

नैवान्यथासिद्धत्वा।। द्विषयानुभवासंबंधादेव विषयवदात्मसिद्धावात्मनि ज्ञानान्तरं परिकल्प्य मनसोऽन्वयव्यतिरेककल्पनायोगात्
तस्माद्विषयवन्मतेरेणात्मा परोक्ष एव। न च संयुक्तसमवायादात्मनि विषये च संयुक्ततादात्म्यादनुभवस्य ज्ञानान्तरविषयतया
परोक्षता प्रत्यक्षस्य वर्तमानविषयापेक्षित्वेन युगपत्फलद्वयावस्थानप्रसंगात्संयुक्तसंबंधादनुभयावभासे नद्यतपरिमाणरस
दीनां च तेनैव ज्ञानेनापरोक्षताप्रसंगादनुभवस्य च स्वसत्तायां प्रकाशाव्यतिरेकादर्शनाच्च ज्ञानान्तरगम्यतायाश्चासिद्धेर्न वात्म
व्यापाराद्विषयेऽनुभवफलजन्म संभवति। सर्वगतस्य कुठारादिवत्परिस्पंदाभावात्। परिणामफलस्य च पटादिवत्क्रियैकाश्रय
त्वात्संविदाश्रयत्वे च विषयस्येव चेतनत्वप्रसंगात्। न वतज्जननव्यापारवत्तात्मनस्तेन तामनश्चादीनामपि प्रसंगाद्विषया
श्रयत्वे वानुभवस्य नेयं दृष्टिविदितमिति संबंधावभासः स्यात्मविज्ञानक्रियानुमाने च न स्यादनुभवस्यात्मसंबंधाभावात्तस्माद्वि
योर्न कर्मतया परोक्षता। ननूभयोः स्वयंप्रकाशात्मफलज्ञानयुक्तान्यतरस्य स्वयंप्रकाशत्वे शास्त्रेव स्वयंप्रकाश इति नेत्याह प्र
मितिस्त्वनुभव इत्यत्र यथा हानोपादानोपेक्षाः प्रमाणफलमिति केचित्तत्राह प्रमितिस्त्वनुभव इति। न हि हानादीनामितरेतरव्यभि
चारिणां मानफलता युक्ता। अव्यभिचारिणस्त्वनुभवस्तेनेत्यर्थः। ननु संवेदनमेवार्थसारूप्येण प्रमाणं प्रमीयतेऽनेनार्थ इति व्यप

पं॰वि॰ ४०

नेऽर्थेपि स्वात्मनात एव प्रमाणफलमिति सुगतमतानुसारिणस्तद्व्यावर्त्तयति प्रमाणं त्विति। प्रमातृप्रमाणयोश्चतुष्टयसंनिकर्षए
वेति प्राभाकराः। ननु चाहमिदं जानामीत्यात्मनात्मविषयावनुभवौ भेदेन प्रत्यक्षसिद्धाविति। नेत्याह तत्राहमिदं जानामीति।
ननु यद्यवभासेत तत्र ज्ञानकर्मतयैवावभासत इति विषयेषु नियमादात्माप्यवभासेत चेत्कर्मतयैव नाश्रयमोऽत्रतयेति चोदयति
ननु न्याये विषयानुभवनिमित्त इति ननु प्रत्यक्षज्ञानस्याविषयजन्यत्वाकारकतापि विषयस्यवक्तव्या तत्र कथमेकस्याः क्रियाय
मेकस्यैव कर्तृत्वेन कर्मत्वेन च विरुद्धरूपद्वयान्वयः कर्त्तुश्च गुणभावात्कर्मणश्च प्राधान्यादेकस्य रूपद्वये वैरूप्यप्रसंग इति
तत्राह तस्मिन्न द्व्यरूपत्वेनेति। तत्र सामान्यांशस्यात्मनात्मसाधारणयाद्यात्मसायोगाद्विशेषांशस्य निरंशत्वात्र कर्तृकर्म
व्यवस्थेति परिहरति तेनेत्युक्तमिति। निरवयवस्य युगपत्कार्यद्वयपरिणामायोगाच्चेत्याह परिणामित्यादिति। किंच ग्राहकरूप
स्यापि विषयतया सिद्धिरस्ति न वा। न चेत्स्वयंप्रकाशत्वात्संविदाश्रयत्वसिद्धौ तदभ्युपगमादेसिद्धिप्रसंगः। कर्मतया सिद्धिश्च
तत्राह प्रमेयस्यैवेति। तस्मात्संविद्रूपत्वादेव त्रितयसिद्धौ संविदाश्रयपक्षपातितया हमः सिद्धेरिदमनुरोधेऽहंकार इत्युपसंहरति
तस्मान्नीलादिज्ञानफलमिति॥ ॥आहंकारस्यात्मव्यतिरिक्तत्वसाधयितुमात्मनः स्वयंप्रकाशत्वसाधनाय विकल्पयति

राम॰ ४०

MEMORIAL

तत्रेदं भवानिति उत्तरसोप्यनुभवोपीत्यर्थस्तत्रात्मा चित्स्वभावोऽनुभवो जडप्रकाश इति पक्षो नोपपद्यत इत्याह तत्तावदिति। न त्वप्रका
शमानमेव प्रमाणफलं चक्षुरादिवद्विषयमवभासयेदिति कुतो विश्वस्यानवभासो न विषयप्रकाशाजनकत्वेन चक्षुषः प्रकाशकत्वा
त्संविद्रूपलक्षणत्वात्। संवेदनं तु स्वयमर्थप्रकाशात्मकमेव न प्रकाशान्तरहेतुरतश्चक्षुरादिवैलक्षण्यात्प्रदीपवदवभासमानमेवानु
भवोऽर्थं प्रकाशयति। न च प्रदीपालोकस्याप्यर्थानुभवजननेनैव चक्षुरादिवदर्थस्य प्रकाशकता किंतु पृथगेव तथा हि ज्ञानप्र
काशकत्वादज्ञानविरोधिनोऽन्यदेवालोकप्रकाशकत्वं तमोविरोधितया प्रसिद्धं। न द्व्यवधानेनालोकेन क्रियते न तदुभयं करोति
चक्षुरातत्वादनालोकत्वाच्च। तस्मादनुभवः सजातीयप्रकाशान्तरनिरपेक्षः प्रकाशमान एव विषये प्रकाशनादिव्यवहारमिति
न भवितुमर्हत्यव्यवधानेन विषयप्रकाशादिव्यवहारनिमित्तस्यात्मेन्द्रियालोकवच्च चक्षुषा सजातीयप्रकाशेन प्रदीपस्यालो
केनैव घटस्य प्रकाशकता॥ स्वयमेव प्रकाशगुणत्वात्तद्विषयज्ञानं प्रकाशं न जनयति। चक्षुरिति चेन्न तथापि विजातीयज्ञानेनैव
प्रदीपस्य प्रकाशकत्वे तेन सजातीयालोकापेक्षा। तस्माद्व्यवहितप्रदीपस्येवानुभवस्याप्यप्रकाशमानत्वे प्रदीपप्रकाशस्येव वि
श्वस्यानवभासप्रसंगः। ननु प्रमातृचैतन्यमेव जडानुभवबलादात्मानं विषयं वावभासयतीति चोदयति। मैवं प्रमाता चेतनेद

पं॰वि॰ ४१ तिनत्रयदिवैतन्यस्यविषयोपरागहेतुरनुभवःपराभ्युपगतबुद्धिपरिणामवदिष्यतेतस्यज्ञेयोचिदात्मप्रकाशास्यतुजडानुभाव
धीनतानुपपन्नेत्याह।तत्रस्वयंचैतन्यस्वभावोपिसन्निति।चेतयतिक्रियापिपूर्वानुभवफलवज्जडरूपानुभवफलंचैतन्य
मपिप्रदीपस्थानीयेषावेतयतिक्रियानवस्थितिदूषयति।किंचप्रमाणफलेनेति।उभयचैतन्यस्वभावपक्षेपुरुषद्वयवत्त्व
न्योन्याधीनसिद्धिर्जातापिसंविदात्मसंबंधावगमइत्याहद्वितीयेपिकल्पइति।ननुविकृष्टमपिपुरुषान्तरसंवेदनंनपुरुषान्त
रस्यस्वयंप्रकाशं।तथात्मचैतन्यगुणोपिनस्वयंप्रकाशइतिशंकनेयचैतन्यस्वभावत्वेपीति।परिहरतितिथिन्नाषहेतुर्वाच्यइति।
अनुभवोपितर्हिनस्वयंप्रकाशःस्यात्पुरुषान्तरसंवेदनवद्व्यवधानान्नेतिचेदात्मन्यपितत्समानमितिभावः।किंचातिस्पष्टार्थ
मस्तुतर्हिजिज्ञासनेनःस्वयंप्रकाशानुभवाश्रयतयासिद्धिरितिनेत्याहतृतीयेपीत्यसमर्थःसंवेदनंनामगुणोद्रव्यंकर्म
वाभवति।कर्मत्वेप्रकाशात्वफलत्वयोरनुपपत्तिःद्रव्यत्वेप्यणुमध्यमानंतपरिमाणानामणुपरिमाणत्वेविषयेपितावन्मा
त्रावभासःस्यान्नहित्वयोतप्रकाशान्नान्तसंसृष्टस्यघटस्यसर्वात्मनाभासःमहत्परिमाणत्वेतदाश्रयतयात्मनोपिसर्वत्रा रामु॰ ४१
वभासप्रसंगः।मध्यमपरिमाणत्वेसावयवत्वेनानित्यत्वपरतंत्रत्वादात्मपरत्वेनतानस्यात्।गुणत्वेसत्यात्मेवप्रकाशगुण

इतिमदीयवदात्मास्वयंप्रकाशःस्यात्।सचप्रकाशगुणःस्वाश्रयोपाधीनज्ञापतेप्रकाशगुणत्वादात्मन्यव्यभिचाराच्चादित्या
दिप्रकाशगुणवदित्यात्मैवस्वयंप्रकाशइतितदेतदाह।निष्टत्वाप्यात्मैववित्तिप्रकाशइति।ननुमध्यपरिमाणमेवत्वावयवाश्रय
फलमस्तु।आत्मपरतंत्रतावघटस्येवभूतलतंत्रतेतिनेत्याहननदितिनित्त्वतथाविधफलसद्भावइतिप्रदीपनप्रकाशितमिति
वन्मयावगतमित्यनुभवादात्मैववित्तिप्रकाशो।न्यथाकाष्ठेनप्रकाशितमितिवदुपचारप्रसंगादितिभावः।प्रमाणां
तरापेक्षयापरिहृतिकथमिति।संवेदनस्यभेदावभासशून्यत्वादनुभवाधीनसिद्धिकस्यचविषयवदनात्मत्वादेकःस्यात्प्यात्मे
वानुभवइत्याहप्रमाणजन्मभेदेनुभवइतिसामान्यविशेषभेदकल्पनागौरवादात्मैकएवानुभवइत्याहसर्वानुभवानुगतंचेति
लगतंभेदप्रतिभासशून्यतामेवप्रपंचयति।नचनीलानुभवइति।नवनीलसंवित्स्थितिकालेपीतसंविदोऽभावात्क्षितिवि
नाशादृष्टोभामिभेदंकल्पयतइतिवोद्यमुद्राप्यपरिहारातिननुविनष्टाविनष्टसादिना।ननुसाधनसंनिधानादुत्तरस्यसंवेदन
स्यसंजातत्वात्संविदूर्ययोगपद्यायोगाद्विनष्टापूर्वसंविदितिचेन्नेतरेतराश्रयादित्याहसावजन्यत्वइति।। ।।सिद्धस्यैवसंवे
दनस्यविषयोपरागनिमित्तसाधनमितिविकल्पनंलघीयःविषयोपरक्तसंविज्जन्मसाधनत्वकल्पनादितिभावःसत्स्वपिस

विदांस्वगतभेदेति सादृश्याज्ज्वालानामिव परोपाधिमंतरेण भेदो न विभाव्यत इति सुगमं । कल्पयंतीतां निराकरोति तेनातिस
दृश्यादिति । किंच ज्ञानांतरगम्यत्वे भेदस्य सादृश्याद्विच्छेदभेदभ्रमजन्म स्यात् । स्वयंप्रकाशस्य तु भेदः प्रकाशेनाभिन्न इति प्रका
शमानं नैव युक्तेत्याह न हि विप्रकाशस्येति । नवयथाजीवस्येति स्पष्टार्थः । एकत्वेन तु पुष्कलप्रकाशस्याप्यविद्याप्रतिबंधे प्र
माणमुक्तमिहत्व प्रतिबंधपुष्कलकारणत्वाद्भेदप्रकाशेनाभवितव्यमित्याह भिहितेनैवेति । ननु संविदः सादृश्यप्रतिबद्धभे
दावभासः । स्तोऽपि प्रकाशत्वे सिद्धे यद्वाऽस्यावदित्यनुमानवाक्यं तदस्यन्नाह न हि सामान्यतो दृष्टमिति । पूर्वापरैकरूपानुभ
वो भेदस्य च प्रकाशेन भवितव्यमित्यनुभवयुक्तौ । कथं पुनरात्मचैतन्यस्य नित्यस्य विषयानुभवत्वमिति तदाह नेत्राद्विकृभ
वएवेति । ननु स्वयंप्रकाशात्मचैतन्यस्य विषयानुभवत्वेऽपि विषयानुभवमेव निमित्तीकृत्याहमिति दृष्टपरामर्शादात्मे
वाहंकारः संसृष्ट इति चोदयति । धामत एवेति । दृष्टरूपेणपरामर्शस्य विषयानुभवो हि निमित्तमस्यथा दृष्टादिविभागभू
न्यचिन्मात्रात्मकत्वादिति भावः । मेवं सुषुप्तावात्मन्यवभासमानेऽप्यहंकारस्यानवभासमानत्वादिति व्यतिरेकदर्शनेन प
रिहरति सत्यमयमिति । ननु विषयानुभवनिमित्तो दृष्टरूपावभासोऽहमुल्लेखस्तद्रहिते सुषुप्ते कथमस्य प्रसंग इति चोद

यति कथमिति । विषयानुभवनिमित्तो विषयावभासः स्यादुक्तत्वात्तन्निमित्तश्चात्मपरामर्श इति परिहरति नीलाद्युपरागो
पश्चैतन्यस्येति । ननु सुषुप्ते दृष्टरूपाभावे कथमहमिति तद्रूपपरामर्शः । नेत्याह तत्र यदि नामेति । दृष्टत्वं सप्रतियोगिरूपं सवेदह
मर्थोऽनात्मैवाहंकारः स्यादिति भावः । ननु प्राक्कथ्याद्रूतं दृष्टरूपं भोक्तृत्वमव सुषुप्तावनुभूयत इति चोदयति नन्वहमिति नाहंका
रस्यत्वपानिः प्रतियोगिकात्ममात्रत्वाभ्युपगमादिति परिहरति नैतत्सारमिति । ननु स्वरूपमपि विषयानुभवादेवाहमिति । व्युत्
तामिति नेत्याह नैतद्वक्तव्यमिति । ततश्च विषयोपरक्तसप्रतियोगिकस्वभावस्याहंकारस्यात्मत्वे सुषुप्तावनुभवविरुद्धमिदमा
पद्यत इत्याह तत्र स्वविषयोपराग इति आत्मतत्त्व सर्वात्मकत्वान्न पराग्व्यावृत्तेत्याह तदुपरागादेवास्मत्तावभास इत्यर्थः ।
भवत्येवेत्यादि स्पष्टार्थः । यथा पूर्वस्मिन्दिनेऽहमित्यभिमन्यमान एवासमेवमनुभूते स्मृतिनियमाभावेऽपि स्मर्यमाणात्मना
न त्वादहंकारस्य सुषुप्तेऽपि स्मृतिः स्यादिति सेऽर्थः । अहंकारप्रतिभासस्य नित्यचैतन्यरूपस्याविनाशात्तज्जन्मसंस्कारप्रस
नास्मृतिस्तूपपन्नेति चोदयति अविनाशिनः संस्काराभावादिति परिहारो यत्तु नापीति ननु सिद्धान्तेऽपि कथमहंकारस्मृति
स्तदवभासिसाक्षिचैतन्यस्य निरवयवत्वादुत्पन्ने । अहंवृत्त्यवच्छिन्नमेवानःकरणचैतन्यस्य विषयभावमापद्यते इति संस्का

पं.वि. ४३ रजन्मस्मरणावच्छिन्नमन्तःकरणं पुनः स्मृत्यनुभवावच्छेदकमिति स्मरणोपपत्तिः ननु सुषुप्तावनुभूतसुखस्याप्याश्रयपक्षपाति
नयाहं सुखेऽकरत्स्वं सुषुप्तेऽहमनुभवद्दस्याहं न च स्यैव सुषुप्त इति ननु सुखमनुभूतं चेत्तस्य विषयजन्यत्वाद्विषयानुभवानि
मित्त एव तत्राप्यहं सुखी स्यादिति नेत्याह नात्मनोऽन्यस्येति सत्समस्तो स्यादिस्पष्टार्थः। ननु सुखाव्यमन्तस्य मुख्यसुखावल
म्बनत्वं परित्यज्य कथं विरोधि दुःखाभावविषयतयोपचारः कल्प्यते तत्राह बृहिज्ञानेत्यलक्षणाप्यात्मपक्षस्तु सुखावमन्तेऽनिलक्ष
णामर्हतीति चोदयति कथमिति। सुखस्य सुखाभावाद्दुःखाभावस्य लक्ष्य[illegible]अस्य संप्रतिपन्नत्वादिति परिहरति स्वप्नेतावदित्या
दिना। ननु परामर्शासामर्थ्यादेव मुख्यमेव सुखं कल्प्यतामिति नेत्याह यदि पुनः सुषुप्तः सुखमिति विशेषतद्वृत्तिविषयविशेषा
पत्त्वनपेक्षः स दुःखाभाव एव परामर्शविषयः सर्वलिङ्गमाहुस्म पदेष्वपीति। ननु सुखानुभवस्यापि लिङ्गमस्ति प्रसन्नेन्द्रि
यादिति। तत्राह यत्पुनः सुप्तोत्थितस्येति तदसदिति स्पष्टार्थः। उक्तेऽर्थे चोद्यपरिहारग्रन्थोऽस्पष्टार्थः। तस्मान्न सुषुप्तोऽभोक्तृतया
प्यहं सुखेऽस्वाप्समित्यनुस्मरतीति न चानुभूतेऽपि न स्मृतिनियमः स सम्मात्मन्यनुस्मर्यमाणे तावन्मात्रस्याहंकारस्याहमित्येव स्मृतिनि राम° ४३
यमः स्यादित्युक्तं। ननु दुःखाभावो विद्यमानोऽपि नानुभवितुं शक्यते प्रतियोगिस्मरणाभावात् स भवतीति च सुख्यप एव स्वरूपम

दावभासः। ननु तदापि सुखमविद्यावृत्तं न प्रकाशमर्हतीति नानावृत्तसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः जागरणेनाहं किमिति ना
वभासते अवभासत एव परप्रेमास्पदत्वलक्षणं सुखं तीव्रवायुविक्षिप्तप्रदीपप्रभावन्मिथ्याज्ञानविक्षिप्तः प्रतनयाने स्पष्टमवभासते।
सुषुप्तौ तत्तदत्तावादधिकं व्यज्यत इति ननूत्थितस्य दुःखाभावपरामर्शोऽपि विद्यते स कथं प्रतियोगिज्ञानाभावादननुभूतः परामृश्ये
त। उच्यते अनुभूतमेव सुखमुत्थितस्यानुस्मर्यमाणं तन्न विरोधि दुःखाभावमर्थापत्त्यागमयत्यनुभूतं चेत्सुखं नास्ति दुःखमित्यतो
दुःखाभावो नानुस्मर्यते किन्तु प्रमीयत इति एवमुत्थितस्य ज्ञानाभावपरामर्शोऽपि ज्ञानविरोधिनोऽज्ञानस्यानुभूतेन तयास्मर्य
माणस्यानुपपत्त्यैव प्रमीयते नानुस्मर्यते। ननु जागरणेऽप्यनुभूयमानमज्ञानं कथं ज्ञानविरोधि स्यान्नावस्थाविशेषयित्राह
स्याज्ञानस्य सुषुप्तेऽनुभवात्तस्य च जागरणेऽपि घटादिज्ञानविरोधित्वादर्शनात्स्वटावगमसमये। नन्वस्मर्यमाणत्वादेव ज्ञानानां
सुषुप्तौ ज्ञानाभावोऽनुमीयतां नानिवृत्तज्ञानानामपि सत्तामस्मर्यमाणत्वात् प्रातर्गजाभावोऽपीदानीमनुस्मर्यमाणगजविरो
धिपदार्थादर्थापत्त्या प्रमीयते न गजविषयस्मृत्यनुदयमात्राद्व्यभिचारित्वात्तस्माद्विशिष्टाज्ञानसुखानुभवानुपपत्तिगम्यौ
ज्ञानाभावदुःखाभावावितिमन्तव्यं ननु च ज्ञानसुखानुभवयोः साक्षिचैतन्यस्वभावविकारिणः संस्काराभावे कथमुत्थितस्य प्राण

पं॰वि॰ ननु स्मरणं स्यात् उच्यते। अज्ञानगतचैतन्याभासजन्योपाधिकत्वाद्वा ज्ञानसुखसाक्षिविकल्पात् अनुभवस्याज्ञानावच्छेदभेदेन च
४४ चैतन्याभासानां भिन्नत्वान्न हि तत्संस्कारजस्मरणमज्ञानसुखसाक्षिचैतन्याकारमज्ञानविशिष्टात्माश्रयमेव संभाव्यते ना
तःकरणाश्रयमिति सर्वथापि सुषुप्ते ज्ञानसुखानुभवसंभवादसंबद्धमिदं टीकाकारोक्तमिति। परमतमाक्षिप्य सेदमुक्तं नस्य
मतमिति न दोषः स्वपरप्रकाशत्वाहंकारभेदयुक्तावुपसंहरति तदेवं नायं नीलादिप्रत्ययादिति अहंकारभेदस्याप्युपलक्षणार्थं
यस्मादात्मनो ऽहंकारो भिद्यते तस्मादागममूलं भाष्यवचनमुपपन्नमित्याह तस्माद्युक्तमिदमिति। कश्चासावागमः स एवा
धस्तात्स उपरिष्टादिति भूमाद्युपक्रमणः सर्वात्मकत्वमभिधीयानो ऽहंकारादेशो ऽद्वितीयस्यापि सर्वात्मकत्वमुक्त्वाथात आत्मा
देश इत्यात्मानमहंकाराद्भेदेन निर्दिशति। ननु जीवब्रह्मणोः सार्वात्म्यव्यपदेशो यथैकत्वसिद्ध्यर्थ एवमहंकारस्यात्मैकत्वसि
द्ध्यर्थो व्यपदेशः स्यात् तत्र द्वयोः सार्वात्म्ययोगात् तत्र युक्तं भेदेन प्रतिपन्नयोर्जीवब्रह्मणोरेकत्वसिद्ध्यर्थस्तदुपदेशो ऽहंकारस्य
तु पूर्वमेव आत्मैकत्वप्रतिपत्तेः पृथगुपदेशो भेदसिद्ध्यर्थ इति गम्यते। ब्रह्मणः परोक्षस्य प्रत्यक्सिद्धये ऽहमात्मेत्युपदिश्य पुन राम॰ ४४
स्तस्यैव दास्येन मुख्यमात्मत्वमुपदिशतीत्यर्थः। महाभूतान्यहंकार इति च स्मृतिः। तत्स्वयमहंकारः किमुपादानः किंनिमित्तः

किंस्वरूपः किंप्रमाणकः किंकार्यः किमिति सुषुप्ते न भवतीति चोदिते तस्य अनन्तरत्वादि परिहारः येयमित्याद्युपादानसंकीर्तनम
विद्याकर्मपूर्वप्रज्ञेति भ्रान्तिकर्मपूर्वानुभवसंस्कारा इत्यर्थः। तस्या इति निमित्तकारणनिर्देशः। विज्ञानक्रियाशक्तिद्वयाश्रयत्
ति स्वरूपं दर्शयति। कर्तृत्वभोक्तृत्वेति कार्यप्रदर्शनं कूटस्थचैतन्येति प्रमाणोपन्यासः पञ्चभेदादिसाक्षिणि सर्वानर्थारोपनिमि
त्तत्वे कार्यान्तरमाह। किमिति न हि सुषुप्ते तस्यादित्सतत्राह स्वसुषुप्त इति। अज्ञानकार्यलिङ्गशरीरप्रविलयो हि सुषुप्तिरित्यर्थः।
ननु सति प्राणे क्रियाशक्तिकधर्महंकारस्य क्रियाशक्तेः प्रविलयः उच्यते। नाहंकारमात्रत्वं प्राणस्योच्यते। किंतु प्राणश्च
म्येऽस्यतः पंचधाव्यापारहेतोरहंकारस्य क्रियाशक्तिस्तैनावस्तुरुच्यते मनोधीनतादर्शनात् प्राणवृत्तेरिति। प्राणलक्षणक्रि
याशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्पनीयः साक्षात्वादन्तःकरणस्य स्वप्नादिवद्दृष्टिसृष्टिमात्रियमा सुप्तपुरुषस्य
स्याभिप्रायेण सर्वस्यान्तर्लयो दर्शितः। सुषुप्तप्राणशरीरादिदर्शनस्य पुरुषान्तरविषयत्वादिति॥ ॥अत्र संख्यामन्येन यथ
चेत तन्मायादिशब्दवाच्यमतः कतिपादिपूपादानमिष्टं स्यान्न हि नेदहंकारनिर्भासे साक्षिणि तत्कलितेन वानन्दाश्रयत्वेन वान
दपिष्टत्वेन वा नत्र भूतमेव प्रधानं स्वतन्त्रमेव धर्मलक्षणावस्थाभेदेन त्रिधा परिणमत इति। तत्र धर्मपरिणामो नाम मह

पं.वि.
४५

दादिकार्यरूपेणावस्थानं तस्यैव च धर्मस्यातीतानागतवर्तमानलक्षणरूपापत्तिर्लक्षणपरिणामस्तथाहि कार्यमनागतल-
क्षणापन्नं तत्परित्यज्य वर्तमानलक्षणमापद्यते पुनस्तत्परित्यज्यातीतलक्षणापन्नं भवति पुनस्तदेवागामिलक्षणापन्नं
भवति पुनस्तदेवागामिलक्षणापन्नं भवतीति। अवस्थापरिणामस्त्वतीतमतीततरमतीततममतीतायतमनागततरमना-
गततममिति तत्रैव नूतनविर्तनाद्यवस्थापत्तिरतोनचेतनोपादानेन कल्प्यमिति निस्माहनयैवमंतव्यमिति। इतवृत्तिनदाह-
तथाहं सुसुप्ता इतिसंसर्ग इति। अहमिति इत्तिः करणं यस्मिन्नसाक्ष्यहं इत्तिरयमात्मोपश्चेतनस्यानात्मसंभेदावभासो
नाख्यातिर्नाप्यन्यथाख्यातिर्नापि आत्मख्यातिरित्युक्तमिदानीं चेतनस्यैवस्याविद्यापाविपर्यस्माननमिथ्यावस्तु संभेदाव-
भासलक्षणानिर्वचनीयमानेनाभ्युपगमचेतनाचेतनयोरसंतविविक्तावभासएवस्यान्न संभेदावभासइत्युक्तमत-
पायकामन्यंते। आत्मेन्द्रियविषयेषु समवहितेषु कदाचिज्ज्ञानोदयसामर्थ्यादात्माश्रयज्ञानादिवृत्तीनां क्रमजननेकारण-
नृतं किंचिन्मनः कल्पितं तत्रतदतिरेकेणांतःकरणं नामज्ञानसुखदुःखेच्छाप्रयत्नादि विज्ञानक्रियारूपाश्रयमयः पिंडव रामः
दृश्येत दर्शवस्तुवस्याप्यात्मवच्चंद्रस्यात्मावच्छेदकतया तस्मिन्नानेदारोपोपाधिभूतं किं विनपक्षामः। बुद्धिरितिचेन्न

बुद्धिरूपलक्षितचैतन्यमिति न धर्मधर्मिलक्षणपादस्तत्रैव च नाज्ञानातिबुद्धिरात्मोपलम्भनइति चेन्न प्रतिधात्वर्थं धर्मिभेदप्रसंगा-
न्नस्मादृशितमंतःकरणनास्तीति नन्वाह सर्वपरिणामविशेषइत्यस्य मात्रापः बुद्धेर्गुणेनात्मगुणेनचैवमाणमात्रोह्यवरोपिदृ-
ष्ट इति श्रुतेरपि मायापुराणवन्नयाइत्यमित्यगतो बुद्धित्वापदार्थं चैवजीवेतज्ज्ञानानि मनसा सह। बुद्धिश्च नेगनेनपरमात्मा-
नमश्रुतेरितिस्मृतौ चेष्टाश्रयत्वेनरूपमित्ययगता बुद्धिततयाविज्ञानं यज्ञं तनुजरस्मानंदमयस्यात्मनः पृथगभिधानाद्विज्ञानं बुद्धि-
रसनर्थांतरत्वात् बुद्धिः क्रियाश्रयत्वेनरूपमित्यवगतातथा विज्ञानेन वा ऋग्वेदं विजानाति मनसा ह्येव पश्यतीति चकरणपक्षपा-
तिनी। चित्तानेमनसोरकित्वान्मनसश्च कामसंकल्पादिवृत्तिमयत्वश्रवणादेकमंतःकरणं विज्ञानक्रियात्मकं यन्मतस्माभिद्व्याह्व-
याचं श्रुतिलिंगेभ्यः प्रसिद्धं तथा बुद्धेर्गुणेनात्मगुणेनचैव सधीः स्वप्नो भूत्वेमं लोकमनुसंचरति विज्ञानमयो मनोमयइत्या-
दिश्रुतावात्मनोवच्छेदकतया स्वगुणारोपगमनागमनादिनिमित्तत्वं चावगतं तथाकस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामी-
ति श्रुताबुत्क्रान्त्युपाधेः प्राणस्याप्यन्तःकरणत्वाभ्युपगमात् युगपदुपाधिद्वयायोगाच्चतेष्वगणितमंतःकरणं श्रुतिलि-
गसिद्धमिति नन्वर्थवादलिंगानामन्यायापेक्षा विषयेनसत्वं निरंतरस्य सर्वगतासंगस्याकारस्यैवं निरुपाधेर्गमनपरिछेदा

पं०वि०
४८

स्यानुपपत्तिरेवन्यायद्रूसत्वप्रसंगेन।नन्वात्मन एव चित्तानक्रियपारिणामत्वान्त्रि किं न स्यात्।मितिनिरवयवस्यवेगगा
संगस्यपरिणामामानुपपत्तेः परिणामत्वेन:कारणसन्निधानाश्च प्रतिभासस्यान्यथासिद्धेरितिसदृष्टांतयाहतेनांतःक(र)
णोपरागनिमित्तमिति मिथ्यात्वंस्फटिके लोहित्यस्य क्लृप्तप्रतीतिसत्तयोः कारणाभावादिति भावस्तदुभयाभावमुक्तग्रंथे
न साधयति।तत्राख्यातिवादी न स्फटिकगतं मिथ्यालौहित्यमवभासते।किंतु जपाकुसुमगतमेव गृह्यमाणं स्फटिकादवि
विक्तमेवावभासत इति चोदयति कथं पुनः स्फटिक इति नैतदित्याह यदि स्फटिकप्रतिस्फालितान इति।ननु दोषबलादिंद्रिय
स्य कुसुमसंयोगाभावान्न संनिवेशाग्रहणमिति नेत्याह नहि रूपमात्रेनिष्ट इति संयुक्तसमवायात् संयोगाद्वा गुणग्रहणं
द्रव्यमपि संयुक्तमेवेति भावः।अन्यथाख्यातिवादी रूपमात्रं प्रति विविक्तस्फटिकात्मना भातीति वक्ति न त्रेत्याह नापि त्व
श्रयमिति।नहि स्फटिकद्रव्ये लोहित्यं सद्रव्यमेवाविविक्तं स्फटिकात्मनायाग्रस्तं इति चोदयति नन्वभिज्ञातस्येति।तथा
प्यन्यथाख्यातौ संसर्गमिथ्यात्वमित्याह तथापि त्वयमस्तोहित इत्यस्य ख्यातिवादिनो मतमादृत्य स एव प्रमेव लौहित्ये तत्तर्हि स्फ राम०
टिकग्रहणे संयुक्तसमवायकारणयोष्कत्वाद प्रतिबद्धसंयोगाद्वा स्वरूपग्रहणमपि स्यादित्याह श्रोत्रक्रमपि तर्हीति विरो ४८

धिगुणयोरुभयाविरोधिगुणस्यापसारणं प्रतिबंधो वा क्रियत इत्याशंकते उभयापसारितं तदित्यपसारणे दूषणमाह सत्यं हैमी
रूप इति प्रतिबंधस्तु द्रव्यस्यापि समानो गुणद्वारा विरोधसाम्यादित्यर्थः।रूपहीनमपि द्रव्यं रूपि प्रभासंयोगे चाक्षुषं स्यादित्या
शंक्याह न च रूपिसंयोगादिति।तर्हि त्रिगोऽरूपमपसार्य लोहित्यस्यासत्त्वं वा रूपेण तेषां चाक्षुषः स्फटिक इति नेत्याह न प्रभा निमित्तमि
ति।अभ्युपगम्य प्रभामित्यादिः स्पष्टार्थः।तत्रश्चोपरक्तोऽहंकार निमित्तमात्मनि कर्तृत्वारोपणमित्याह तदेवमिति।नन्वहं
कारधर्मस्यात्मन्यारोपणमाक्षिप्यते किं वा मिथ्यैव धर्मी न स्तुप्यत इति पूर्वस्मिन्नापरदृष्टांतोऽन्यथाख्यातिश्चस्यादुत्तरस्मि
न्सत्य मिथ्याकर्तृत्वरूपावभासः स्यात्।उच्यतेऽहंकारस्य स्वधर्मसहितस्यैवात्मन्यध्यस्त तथा मिथ्यात्वान्नान्यथाख्यातिप्रसंगः
अन्यसंनिधानादस्मिन्मिथ्या धर्मावभास इत्येतावति दृष्टांतः।अथवा कर्तृत्वरूपे पि धर्मिणोरेकतापसाधम भेदानवभा
स इत्यविरोधः।ननु भिद्यते हृदयग्रंथिरित्यादौ हृदयग्रंथिरात्मन्यनर्थहेतुरिति गम्यते न तत्कथमहंकारस्योच्छेद इति।तत्राह नतः
संमिश्रो भयरूपत्वादिति।नन्वात्मा स्वात्मन्युपरक्तोऽहंकारतद्धर्मादीनामवभासयदुपरक्तत्वसाम्यात्स्फटिकादिवदिति।तत्राह
तत्रात्मउरूपत्वादिति जाड्यचैतन्ये त्वनवभासकत्वावभासकत्वयोर्निमित्ते नोपरक्तत्वानुपरक्तत्व इत्यर्थः।ननु चेतनस्याप्युपर

पं॰वि॰
४७

कविषयज्ञानव्यापारशून्यत्वाज्जाड्यादविशेष इति तत्राह तद्रूपस्य पुनरिति। अव्यवधानेन क्वचित्संसर्ग एव प्रतिभासहेतुर्न ज्ञानव्या
पार इति भावः। ननु साक्षिस्वरूपवज्ज्ञानक्रियाव्यवधानेनान्तरेणाहङ्कारस्य सिद्धौ कथमिदमंशतेति तत्राह तेन लक्षणेनेत्यर्थः स्व
भावतस्त्वर्थः। वृक्षू तस्य विस्वभावतानिदमंशता चैतन्यकर्मतैवाविदमंशतानां ज्ञानक्रियाव्यवधानेनेत्यर्थः व्यवहारतः पुनः क
थमतस्येदमंशतेति तत्राह व्यवहारतः पुनरिति यद्दु परागर्थस्याहङ्कारस्योपरागादित्यर्थः न ह्यात्मनोऽहङ्कारात्मनोऽहङ्कारात्मताम
पन्नस्येत्यर्थः। न व्यापारेणाहङ्कारव्यापारेणेति वृत्त्यव्यवधानसिद्धिरेव तु शरीरेन्द्रियविषयाणामिदमिति प्रतिभासितानामव्यवधान
सिद्धिरेवानिदम्प्रतिभासितेति भावः। नत्वज्ञानव्यवहितोऽहङ्कारः कथमव्यवधानादिदन्तावभासाभावः स्यादित्यत्राह त एवाहमिति। ।
अनिदन्ताप्रतिभासाः स्युर्ज्ञानमात्रेऽव्यवधानादेवेत्यर्थः। नन्वर्थतो युष्मदर्थत्वेन तथा प्रतिभासाभावो न युक्त इत्यत आह दृष्ट्वा ल
क्षणत इति। ननु तत्र विभ्रमोऽपि मन्मयव्यवहारो न जायत इत्यत्र तु विभ्रमेऽपि युष्मदर्थता व्यवह्रियतेऽन्योन्यापत्तिदृष्टान्त इत्यत आह व्यवस्थ
मनयास्त्विति। अतत एव निपुणतरमभिवीक्ष्येत्यादिस्वच्छार्थः। यदि स्फटिकोदाहरणेनैवात्मन्यनात्माध्यासः सिद्धो न तर्हि दर्पण
जलाद्युदाहरणेनैवदान्तविहितेन रूपमिति तत्राह यस्तु तद्रूपेण जालादिष्विति। ननु प्रत्यक्षत्वेनाभेदावभासाभ्यावस्त्वनेर बिब तम॰ ४७

त्यतिबिंबप्रत्यक्षे कथमेकत्वप्रमाणमन्तरेण तद्वेवन्नदिति चोदयति कथं पुनस्तद्वन्नदिति व्यक्तिप्रत्यभिज्ञानादिति परिहरति। एकस
लक्षणत्वावगमादिति ननु भिन्नाया भेदप्रतिभासः कथं प्रत्यभिज्ञया बाध्यत इति तत्राह न तद्वस्त्वन्तरत्व इति ननु व्यक्तिगतयोरैक्य
भेदावभासयोः केन किं बाध्यमिति विषये मन्त्रि भेदस्तत्रोपपत्तिशून्यत्वाद्बाध्यत इत्याहापि चाप्यहिस्त्वन्तरत्व इति द्रव्यर्पणावयव
एवमक्रान्तराकारेण परिणताद्रूपत्वाव्यामन्यथाप्यक्रान्तरोपायाभावादिति भावः। ननु मुखलाञ्छितप्रतिमुद्रयं न परिणाम इति
नेत्याह विहृदूपरिमाणत्वादिति। अस्तु तर्हि परिणाम इति नेत्याह तथा सतीति। ननु दृश्यत एव सर्वत्रैवं दर्पणस्य नियके निरीक्ष
णे पूर्वोत्पन्नमुखदर्शनाभावान्नन्वनु निमित्तकारणापायेऽपि कार्यमपैति यथा वेत्रोत्काधितापेक्षाबुद्धिविनाशो द्धित्वादिनाशो। ह
स्तसंयोगापायेऽकटविवरणापाय इति नेत्याह न खलु संवेष्टित इति। सर्वत्रापि संयुक्त द्रुततास्त्रादावपि युष्मत्वकाले न चिरहका
योदयादेव पूर्वकार्यविनाशो वैशेषिकाणां च प्रक्रियामात्रं तद्धित्वादेर्वस्तुसहभावित्वादिति भावः। ननु संस्कारजन्यकार्य
मरोदया सर्वकार्यविनाशो न निमित्तकारणापायादिति कुत इति तत्राह तथा वयावदिति निमित्तापायमात्रा बुद्धिवरणाप
यः संस्कारोऽभावेऽपि संवेष्टितेति भावः। इहापि तर्हि सर्वसंस्थानस्य विकालसंस्थानवलाद्धि रुध्य कार्योदयप्रतिबिंबापाय इ

पं॰वि॰ ५८ ति चेत् । नोत्पन्नमात्रे दर्पणे मात्रे चिरकालावस्थितमुखपरिणामसंस्कारेऽपि बिंबापायमात्रे प्रतिबिंबापगमदर्शनादित्याह एवं
चिरकाल इति । ननु चिरकालावस्थितबिंबाकारत्वपरिणामसंस्कारप्रचयेऽपि सन्निकर्षापाये बिंबापायदर्शनेन च चिरका
लावस्थितप्रतिबिंबापायेऽपि बिंबापायस्यादिति नेत्याह यः पुनः कमलमुकुलस्येति । ननु निमित्तकारणापाय एव तत्रापि नि
मित्तनाशादविनाशोऽप्यवयवजन्यास्य मुकुलत्वेनेति नेत्याह तदुपरमइति । आदर्शेऽपि न हि मुखविपरीतपरिणामहेतुः कल्पनं मिति
नेत्याह नादर्शेऽपि नीतिकारकमपेक्ष्य सादृश्यतलेजन्मेतिभावः । किंच सत्यपि संनिधाने दर्पणे इस्म मुखाकारं करोदाहष्टु
दादिवहु प्रयत्नदर्शनात्सन्निगोचरताभावाच्चावयवव्यवधानेन चाक्षुषमपि नस्यादित्यभिप्रायः । तत्राथ प्रयोगः नदर्पणा
दौ मुखव्यंतरं तत्र मस्ति तज्जन्मकारणशून्यत्वात् शशमस्तकविषाणवदिति । तर्हि शुक्तिकारजतवन्मिथ्यात्वापत्तेर्न मुखैके
त्वमिति चोदयस्तंत्राहेति । ननु प्रत्यभिज्ञयैकत्वमवगतमिति नेत्याह । शुक्तिकारजतस्येति मिथ्यारजतेऽपि प्रत्यभिज्ञादर्शनात् मदिय
मिदं रजतमित्यर्थः । उत्तरमाह मैवं तत्र हि तित्र नेदं रजतमिति रजतस्वरूपमेव बाध्यते नात्र रजतं किंतु तदिदं रजतमिति देशमा रामं॰ ५८
त्रबाधस्यात्मसत्यरजतैकत्वानप्रत्यभिज्ञापत्तेतोरजतभिन्नाबाधोत्पत्तिभिन्नापि विभ्रमइत्यर्थः इहतु नेदं मुखमिति नस्वरूपे

साबाध्यते किंतु नात्र मुखं मद्रीपमेवेति प्रत्यभिज्ञापते । नचसाध्यते व्यक्तं तत्र लेवता मुखवस्त्वीति न बाधः स्यादित्यर्थः । यत्तु नरीति
स्पष्टार्थः । ननु स्यमुखावयवानाम चाक्षुषत्वात्कथं प्रत्यक्षप्रत्यभिज्ञानं न कतिपयावयवदर्शनादपि लोकव्यवहारश्चाक्षुष
त्वोपपत्तेः । ननु तत्त्वमसीवाक्यं तत्पदार्थबाधनिमित्तसंसारित्वविनाशमंतरेण मोक्षानुपपत्तेस्तोनापरं दृष्टांतेद् विवादयति ॥
ननु तत्त्वमसिवाक्यादिति सोऽयं देवदत्त इतिवत्तादात्म्यपदेन पदार्थबाधपरमिति परिहरति मैवमिति किंच द्वा शास्त्रीयोपपत्तिस्प
ष्टार्थः नवारिस्थमित्यादि सत्यवारिस्थतोपजीव्यते अस्मात्तिबाधेन बिंबादत्त्वेन प्रतिबिंबं नाम दर्पणगतमेव भासते किंतु
बिंबमेव दर्पणादविविक्तं प्रकाशत इति वदंति तद्दृष्टवदतिर्यत्तन्मन्यत इति । स्पष्टप्रत्यग्मुखावभासं दर्पणांतरानुप्रविष्टमिवस्व
मात्मानं स्वरूपांतरे च त्रिरिक्षमणमिवेदं तयाहं स्वमात्ने मुखं ततथा नावभासत इति वदन्कथमात्मः स्यादित्याह नमत्र भयएवे
ति नु तु भ्रतंद्रूस्यपृष्ठ पकात्स्पर्शनदेशाद्रूपवर्तिलंलोकेनकचिदपिदृष्टमिति चोदयति कथं पुनः परिछिन्नमिति एकमेकदेशा
स्थमेव मुखं भमास्थितं भिन्नदेशात्स्थं चावभासत इत्याह नवयमिति किंपुनरिदमेकं भिन्नैकदेशावस्थानिभिरभिन्नदेशत्वाल्ल
क्षणं वस्त्विति दाह विच्छेदोस्त्विति ननु मायायापि प्रमाणविरुद्धं कथमवभासत इत्यत आह नहि मायायामिति । ननु विच्छेदाव

पं॰वि॰ ४९ भासः कथमविद्याविजृंभितः यावता ह्युपाधिस्पृष्टमवभासमानमवभासः धोपोजलेषु प्रतीयते । न च तत्राज्ञानमस्तीति । उच्यते न च
विषयावरणमज्ञानमध्यासहेतुरित्युक्तं । तत्रोपाधिकभ्रमे ह्युपाधिरेवात्माविद्यापरिणामत्वेनैकं कारणं न चाधिष्ठानयाथा
थात्म्यज्ञानं सोपाधिकभ्रमस्याध्यासविरोधि किंतु निरुपाधिकभ्रमस्यैवेति द्रष्टव्यं । ननु सोपाधिकभ्रमत्वे भेदकत्वं तत्राध्या
सस्य तत्तत्त्वज्ञानादध्यासनिवृत्तिः किंतूपाधिमात्रनिवृत्त्येति चोदयति । ननु सत्येव बिंबैकत्वावगमे दर्शितेत्वोदितदोषं परिहर्तुं
भाष्यकारो मतं प्रथमं निवर्तयति । कथं जीवः प्रतिबिंबश्चेत् बिंबात्मतामवगतं मलप्रतिबिंबत्वाद्दक्षिणपात्रगतदेवदत्तप्रतिबिं
बवदित्येतन्निराचष्टे देवदत्तस्याचेतनत्वादास्पति । अचेतनत्वप्रयुक्ता तत्राकुंचगतिर्न प्रतिबिंबत्वप्रयुक्ता घटादिषु तथादर्शा
नादिति भावः । ननु दर्पणस्यैवाचेतनत्वमिति लोकाया तत्त्राह सचेतनत्वात्तु आस्पति । दर्पणगतो ह्येन प्रतिबंधात् स्वभावजा
ड्यादित्यर्थः । देवदत्तप्रतिबिंबस्याचेतनत्वे हेत्वंतरमाह तथा ह्यनुभव इति । कदाचिदस्यापि चेतनत्वं स्यात् यतश्चेष्टया विना
पीदं चेष्टेतीति भावः । ननु देवदत्तस्यैव बिंबस्य भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वं दृष्टमेवं बिंबत्वात् ब्रह्मण एव भ्रमनिराणि रा॰म॰ ४९
तत्त्वज्ञानाश्रयत्वं स्यादिति नेत्याह यस्मिन् हि भ्रांतिरिति । न बिंबत्वकृतं तत्त्वज्ञानाश्रयत्वं किंतु भ्रांतत्वे तेन तदप्यज्ञत्वकृतं तं

दपि जीवत्वमिति भावः । ननु जीवत्वस्य प्रतिबिंबात्मतामात्मनो ब्रह्मजातीयानवानेव सर्वज्ञतादिहानिज्ञानानीति चेत् ब्रह्म
स्यात्मन्येव संसारः प्रसङ्गादिति नेत्याह । यस्तु जानीते देवदत्तः इति देवदत्तो हि स्वात्मानमक्षिपात्रे आत्मश्यामादिगुणमवगच्छन्नपि
तत्त्वज्ञानप्रतिहतत्वान्नानुरोचति । एवं ब्रह्मापि स्वात्मनि जीवे प्रतिबिंबे संसारं पश्यदपि तत्त्वज्ञापित्वान्नानुरोचति ॥ तत्त्वज्ञान
संसर्गेणावधातस्य ममत्वादिरूपेतरेतरत्रमम्यवतिष्ठतीति भावः । नन्वेकत्वावगमेऽपि न तत्र विद्रद्भ्रमो निवर्तते सत्यं । नवि
वप्रतिबिंबकृतं न तु किंतूपाधेरज्ञानजन्यत्वात् ज्ञानानिवर्त्यत्वकृतमित्याह नापि ज्ञानमात्रादिति जीवस्यापि तत्सोपाधिजाड्य
मात्स्कं दर्शनसंभवान्नेभ्रांतिसम्यग्ज्ञानाश्रयत्वमप्रतिबिंबतावानदाश्रयत्वं स्यादिति नेत्याह । जीवे पुनरिति रूपं रूपं प्रतिरूपो बभूव
एकधा बहुधा चैव दृश्यते जलचंद्रवत् अत एव चोपमा सूर्यकादिवदिति च श्रुतिस्मृतिसूत्रजीवस्य प्रतिबिंबभावस्य दर्शितत्वा
त्तु अमूर्तस्यपयाकारास्य सास्त्रत्वस्य जलप्रतिबिंबवद्मूर्तस्य ब्रह्मणोऽपि प्रतिबिंबसंभवात् जानुमात्रप्रमाणेऽपि जले दूरविस्ता
लोकाकाशदर्शनाज्जलांतराकाशश्च एव अभ्रादिप्रतिबिंबयुक्तमवकुम्भाकाशत्वात् प्रतिबिंबत्वं चिद्रूपत्वं च ब्रह्मात्मप्रतिपन्नं भस
क्षप्रतिपन्नं च निराकर्तुं निराकरणदिति भावः ॥ ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किन्न सामान्यविशेषाभ्यामुपाधिभिः

पं०वि०
५०

अंतश्चेद्ब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्नत्वादनवच्छिन्नस्य ब्रह्मणोऽभावाद्धि रिव सद्भावप्रसंगात्तत्र सर्वगतत्वसर्वोपा
दानत्वसर्वनियंतृत्वादिब्रह्मलक्षणं न स्यादवच्छिन्नप्रदेशोप्यनवच्छिन्नस्य ह्यैक्येन कृत्स्नस्य योगात्स्वरूपापेक्षया तत्सर्वं नैव हि
स्थितब्रह्मापेक्षया इति चेन्न । यो विज्ञाने तिष्ठन्नित्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसन्निधानेन विकारांतरत्वस्यानभ्य
वगमात् प्रतिबिंबपक्षे तु जलगतस्याभाविकाकाशस्यैव प्रतिबिंबाकाशावेदकत्वेन बहिरंगुलीकृत्यस्वरूपपत्तेर्जीवावच्छेदेप्यब्रह्म
णोपि नियंतृत्वादिरूपेणावस्थानमुपपद्यत इति प्रतिबिंबपक्ष एवाश्रयणीय इति ।। ।।मिथ्यात्वतत्त्वज्ञानाश्रयत्वं च तत्र प्रसक्षमि
त्याह सत्याहंकृतिरिति । उपाधिस्वरूपमपि भ्रांत्यैवावभासत इत्यर्थः । अतस्तत्त्वज्ञाने नेशोपाधिनिवृत्तिविच्छेदापाय इत्याहानो
पुनरिति । नन्वज्ञानं जीवावच्छेदोपाधिरिति पुरस्तादुक्तं तत्कथमहंकारोपाधित्वं जीवस्याभिधीयत इति नैष दोषः अंतस्य
स्यावच्छेदकत्वेपि कल्पितारतम्येन व्यवहारविकल्पतारतम्यात्तथा हि । निर्विकल्पकचैतन्यमात्रैकरसमविद्यासंबंधादिषद्विक
ल्पव्यवहारालंबनं भवति सुषुप्ते तत्तदुपादानांतःकरणावच्छेदोपेदवस्थलंतरव्यवहारालंबनं भवति स्वप्ने पुनरंतःकरण
संसृष्टस्थूलशरीरोपरागस्थूलतमं भवति जागरणे न चोपाधिभेदाज्जीवभेदप्रसंगः । एवंस्थ्योपाध्यवच्छिन्नस्यैवोत्तरोत्तर राम०
५०

णावच्छेदान्निरपेक्षोपाधिभेदे हि जीवभेदः । ननु स्थूलशरीरोपादानमंतस्सूक्ष्मरूपसहितेन लिंगशरीरसंस्कारेण परकृम
शानं सुषुप्ते न जीवमवच्छेत्तुमर्हतीति तत्र भ्रांतिभावान्न ब्रह्मणो लाभो विभागस्य । अथ भ्रांतिज्ञानमनपेक्ष्यैवार्थगत एवाविभागः
कल्पेत तत्र विभागस्य कार्यत्वे सुषुप्तिप्रलयादावभावाद्ब्रह्मण एवाविद्यादिसांकर्यं स्यादकार्यत्वे विभागस्यानादित्वादविद्या
निमित्तत्वं न स्यादुच्यते । ब्रह्मण एवाविद्यादिसांकर्यपरिहाराय सुषुप्त्यादावप्यस्त्येव जीवब्रह्मविभाग इति कल्पनेनान्यथागत एवं तर्हि
विभागो न विभ्रमगतः सत्ये सुषुप्त्यादिगतविभागाद्भेदात्र जीवब्रह्मविभागो ब्रह्म विभ्रममात्रतया विद्योपादानमुच्यते । नन्वर्थ
गतो विभागस्तर्हि नाविद्योपादितोऽनादित्वाद्विभ्रमत्वाभावात्त सत्यप्यविद्याते नो विभागोनादित्वेपीति भ्रमः । यथा सामा
विद्यासंबंधोऽविद्यातंत्रो वा विद्योपादानः संबंधजनकताया कृत्स्नातंत्रे लावस्थानुपपत्तेरतो न स्यान्नादित्वाच्चासाक्षि
संबंधस्यनाविद्योपादानता । ननु जीवब्रह्माश्रयो विभागः कथमविद्यातंत्रः स्यादुच्यते । अनाद्यविद्याविशिष्टचैतन्यमनादि
जीवभावेन कालनिकानादिभेदस्याश्रयो न स्वरूपेण तस्यैकत्वादतो विशिष्टाश्रयो विभागः स्वरूपे पुः परिणामानो विशेष
णाविद्यातंत्रो विशिष्टस्याविद्याकृतो विभाग उच्यते । अविद्यातंत्राणां वानिर्वचनीयत्वमनादित्वं विद्यासंबंधवत्र वि

पं०वि० रुध्यते।लोकेचदर्पणघटादिविशिष्टयोर्वक्तमुखाकाशयोर्मिथ्याभेदावभासोनस्वरूपेणसोपाधितंत्रत्वाभेदस्योच्यते।तस्मादन्ना
५१ द्यविद्याप्रतिबिंबकृतविभागस्यैवजीवस्यतद्बलेनाहंकारादिविक्षेपणेषुस्थूलप्रतिबिंबापेक्षयासर्वेषामुपाधित्वेनविरुध्यते।
अत्रसर्वसंकर्यादीप्रतिबिंबस्यावस्तुत्वाभ्युपगमान्नजीवःप्रतिबिंबइतिजल्पतितन्त्रमुखचित्स्वरूपयोःप्रतिबिंबेषुनावस्तु
त्वमिष्यते।भेदविपर्यासादीनामवस्तुत्वाभ्युपगमेऽपिनमुखचैतन्ययोःकाचित्क्षतिःमुखविम्बरूपयोश्चबिंबात्मनाप्रमिति
महेमिथ्यांशापर्युदासेनचमिथ्यांशस्यबंधमोक्षौकिंतुस्वरूपस्यैवस्वरूपगतस्यापिसांकर्यपरिहारायोपाधिभेदोदर्शितः
तस्मात्वत्सिद्धांतापरिज्ञानविलसितोयंसर्वसंकर्यादिनाविभ्रमोवस्तुत्वाभ्युपगमादिति।अहंकारोपाधिनिष्ठोजीवब्रह्मवि
भागःनात्माध्यासश्चदृष्टांतबहुपनसिद्धस्तत्रकिंरज्जुसर्पोदाहरणेनवेदांतविहितेनेतिचोदितेतस्यप्रयोजनमाशंकांतरनिवृत्ति
रित्याह।ननुतत्रविभ्राम्यतइतिनिरुपाधिकाध्यासपरिनिष्पन्नाहंकारोपाधिकःकर्तृत्वाद्यध्यासइतिकथयितुमित्यर्थः।ननुस
र्पत्राधिष्ठानाध्यस्यमानव्यतिरिक्तोपधिनिमित्तएवाध्यासोननिरुपाधिकइतिवादयति।ननुतत्रापिपदिनामतिपूर्वानुभवसं राम०
स्कारमात्रोपाधिमात्रमिहापिविद्यतएवतत्रपदार्थोपाधिरेवनिराक्रियतइतिपरिहारः।बाढमिहापीतिनपूर्वानुभवसंस्कारएव ५१

भ्रमहेतुर्नुपूर्वभ्रांतिसंस्कारइतिनियमोस्तीतिभावः।नन्वात्मनिसोपाधिकस्यनिरुपाधिकस्यवाध्यासस्योदाहरणत्र
येणैवसिद्धत्वान्नघटाकाशोदाहरणेनवेदांतविहितेनकृत्यमस्तीत्याशंक्यर्थांतरनिराकरणेनासंगत्वसिद्धिःप्रयोज
नमित्याहतत्रयद्यप्यनिर्वचनीयतयैवेतिअरुणादिनास्फटिकादेर्गुणगुणित्वेनसंभेदयोग्यस्याप्यनिर्वचनीयतया
अरुणादेरसंभेदावभासःसिद्धइत्यन्वयःकथंपुनर्घटाकाशोदाहरणेनासंगत्वसिद्धिरितितदाहतत्रहीति।ननूदाहरणे
रेवात्मनोविकारित्वेकत्वासंगत्वानांसिद्धत्वात्रागमेनकृत्यमितिचेत्तर्हिनचसर्वमुदाहरणजातमितिप्रमाणमन्तरेणोदाहरण
मात्रादर्थसिद्ध्ययोगात्प्रत्युदाहरणसंभवादितिभावः।अस्मत्प्रत्ययविषयत्वादितिभाष्यमात्मन्यध्यासोपपत्त्यर्थं।तत्रा
स्मत्प्रत्ययत्वंचिन्मात्राध्यासप्रदर्शितोविषयत्वाद्यर्थमिदानीमाहतदेवंयुष्मदपीति।गोरापावृत्त्याविषयत्वाद्धप्रयोगेकिं
गुणसाम्यमितितदाहप्रमेयस्यैवेति।ननुसविकल्पकाध्यासस्यसविकल्पमेवाधिष्ठानंवक्तव्यंतथादर्शनात्रेनिर्विकल्पे
चिन्मात्रेऽत्रकथमहंकाराध्यासेनसविकल्पकेहंकाराध्यासइतिचोदयति।ननुव्यवहारयोग्यचैवेति।निर्विकल्पेपि
सविकल्पाध्यासदर्शनादज्ञानाध्यासेनपूर्वाहंकाराध्यासेनवासविकल्पकेचिदवभासेसंभवत्येवेत्तराहंकाराध्यास

पं०वि० ५२ इत्याहंतानादित्वेनेति। नन्वविकारिचैतन्यैकतानस्य निःकलंकस्वभावानंदस्यासंगस्यात्मनो न प्रमातृत्वमुपपद्यते। प्रमा
ण क्रियापरिणामाभावात् प्रमातृत्वहीनस्य कर्तृत्वभोक्तृत्वे संभवत इति प्रमातृप्रमाणप्रमेयकर्तृकरणकार्यभोक्तृभो
गभोक्तव्यसंसर्गलक्षणस्य व्यवहारस्यात्मन्यसंभवादहंकारस्यैवाचेतनतया तदाश्रयत्वायोगाद्दुच्छिन्नव्यवहारमिदं ज
गदापद्येतेति प्राप्तमथ स्वभावसिद्धचैतन्यप्रकाशेनैव विषयप्रकाशोपपत्तेर्न तस्य विशेषात् सर्वगतत्वाच्च सर्वप्रकाशो यदि
स्यव्यवस्थैव तस्माद्विकारसमर्थ एवात्मेत्यत्राह न तावत्सर्वगतात्मवादिनामिदं चोद्यं संभवति। कथं यदि तावदात्म
विषयेन्द्रियमनश्चतुष्टयसन्निकर्षादिनोत्पद्यमानक्रिया वा गुणो वा यो यदात्मसमवाय्येवोत्पद्येत निरवयवे प्रदेशाश्रय
त्वानुपपत्तेः। तदा युगपत्सर्वत्र मूर्तद्रव्यसंयोगलक्षणत्वात्सर्वगतत्वस्य स्वाश्रयात्मसंयुक्तवस्तुनः सर्वस्यावभासेति वि
ज्ञानस्य प्रदीपादिषु क्रियाप्रकाशगुणयोः स्वाश्रयसंयुक्ते वस्तुन्यनुरूपप्रकाशापत्तिन्यायहेतुत्वाद्दृष्टेन क्वचिदेव
विषये ज्ञानं नियम्यत इति चेन्न प्रदीपादिषु यावत्संयुक्तवस्त्ववभासित्वदृष्टेन वस्तुसामर्थ्यमतिक्रम्य नियमादर्शनात्सु रा०म० ५२
खदुःखाद्यनिमित्ततृणाद्युपेक्षणीयसर्वविषयावभासनेवादृष्टनियमानुपपत्तेर्जनकमेव ज्ञानं प्रकाशयतीति सर्व

मिति चेन्न चक्षुरादिषु प्रकाशप्रसंगाद्विषयस्य निरूप्यमाणत्वात् विषयतया जनकमिति विशेषणयोगात् प्रदीपादिषु
च प्रकाशगुणस्य स्वाश्रयसंयुक्ताजनकेऽपि विषयस्यापि प्रकाशकत्वदर्शनात् क्रियारूपविज्ञाने समानमेतद्दिशा दिश्यो
पारणामनुद्दिष्टैरपि विषयस्वाश्रयसंयोगस्य संनिरूप्य हेतुत्वदर्शनान्निरवयवत्वादात्मनो न सर्वसंयोग इति चेत् किं
चिदपि प्रकाशेन क्रियागुणयोः स्वाश्रयमतिलंघ्यान्यत्र संसर्गयोगादसंसृष्टेनातिशयायोगाद्यत्र शरीरावच्छिन्नात्म
प्रदेशसमवाय्येव ज्ञानं न यावदात्मसमवायीति मतान्न हि सावयवत्वमात्मनेतरमव्यवहितविषयावभासप्रस्यादात्माश्रयप्रका
शस्य विषयेणासंसर्गान्न वाश्रयातिलंघने क्रियादेरित्युक्तं। न चानाश्रयात्मप्रदेशासंबंधाद्वभासः। सर्वस्यावभास
प्रसंगात्तथाभिचारकर्मस्वाश्रयात्मप्रदेशासंयुक्ते पुरुषान्तरे न फलं जनयति तद्वदिहापि स्यात्। नैतत्स्याद्दृष्टक्रियासा
मर्थ्याद्देवादृष्टे प्रभयात्मप्रदेशासंयुक्तस्य देवतात्मनो वैश्वरस्य वा हेतुत्वं तस्यावानुमीयमानत्वात्तत्रात्मसंयुक्तमनःसं
सृष्टेन्द्रियसंयुक्तविषयेऽतिन्यायः पुरुषाश्रयज्ञानादुपपद्यते विषयसंयुक्तेऽपि वस्त्वन्तरेऽप्रकाशान इति व्यवहारातिन्याय
प्रसंगात्सर्वभावविद्याश्च संयोगप्रवाहस्य ज्ञानकला विषयस्य वर्तमानसंयोगप्रवाहाभावादेव मध्यदेहपरिमाणात्मवा

देपितुल्यो दोषः तस्मान्न सर्ववादिनां प्रमाणादिव्यवहारसंभव इति॥ ॥सत्यमस्मत्पक्षे तु कथं विसंभवं प्रदर्शयिष्या
मीत्याह तत्रेत्थं भूतस्याहे कुत इति॥ इदमत्रास्मान्तःकरणस्येत्यर्थः। व्यापार इति परिणामोऽभिधीयते। प्रकाशस्वभा
वं सावयवमन्तःकरणमदृष्टेन्द्रियादिसहकृतं घटादिविषयपर्यन्तं दीर्घप्रभाकारेण परिणमते तैजसः दीपादिव
गमनदर्शनात् परिणामद्वारेण कर्तृकर्मसंबंधो वस्तुविशेष इत्याह स वप्रान्तोति क्रियाहित इति स्यादन्तःकरणस्यैव
परिणामद्वारेण विषयविशेषसंबंधः आत्मनस्तु विषयविशेषावभासः कथमिति तदाह तेन विषयविशेषसंबंधमि
ति सर्वत्राविद्यावृततयानभिव्यक्तस्वभावमपि चैतन्यमन्तःकरणं चैतन्यं येन यत्रावस्थाविशेषेण विवर्तते तेन तत्रा
कारेण व्यज्यते यथा पिण्डेनेव वह्निः कोणत्वाद्यवस्थाविशेषमापद्यमानेन तद्रूपतां तु रीति विषयसंसृष्टान्तःकरणावच्छिन्नं
चैतन्यं तदाकारमवभासत इति भावः। ननु प्रमातृरूपावच्छिन्नं चैतन्यं तद्रूपेणाभासतां कथं चैतन्यस्य विषयावच्छेद इति
तदाह कर्मकारकमयी त्रिस्वव्यापाराविष्टमिति परिणामसंसर्गादर्पणजाड्याभिभवलक्षणयोग्यत्वमुक्तमन्तःक
रणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि चैतन्याभिव्यक्तियोग्यतामापादयतीति भावः। ननु वच्छेदकभेदे च प्रकाशभेदा

त्कथं विषयावच्छिन्नानुभवस्य प्रमातृरूपावभाससंसर्गो संसर्गो वा कथं प्रमेयदमवगतमिति प्रमातृप्रमेयसंसर्गावभासि
संवेदनं स्यादनुभवभेदादेकस्मिन्संबंधावगमे पदार्थयोरवभासायोगादित्यत आह प्रधानक्रियाहित प्रमात्रवस्थावि
शेषावच्छिन्नापरोक्षैकरूपामिति एकामित्यर्थः। परिणामस्योभयसंसर्गो हि जनकाभेदेन अपांविच्छेद इति भावः। न
नु भयत्र चैतन्याभिव्यक्तौ विशेषघटावच्छिन्नानुभवप्रमातृत्वात् किंवान्तःकरणावच्छिन्न इति न विशेषः स्यादिति मत्याह त
न्वाभ्यामन्तःकरणावस्थाविशेषोपाधिजनितो विशेष इति प्रमातेति वाक्यशेषः कर्तृहि प्रमातृता न कर्मणः। अत्रा
न्तःकरणस्य कर्तृत्वात्तदवच्छिन्न एव प्रमातेत्यर्थः। ननु चैतन्यस्यैकत्वे प्रमातैव फलमिति विरुद्धमापन्नमित्यत आह
विषयानुभवसंज्ञा हि तो विषयस्थापरोक्षैकरसः फलमित्यन्तःकरणावच्छिन्नतया प्रमाता विषयावच्छिन्नतया फलमि
ति भावः। ननु क्रियाफलयोरन्तःकरणात्मसमवायिनोर्मिश्राश्रयत्वं घटान्तःकरणविषयतया च भिन्नविषयत्वमिति
क्रियाफलयोरेकाश्रयत्वैकविषयत्वमिति नियमविरोध इत्यत आह तत्क्रियैकविषयता फलस्येति विषय इत्याश्रय
स्याप्युपलक्षणमन्तःकरणात्मनोरैक्याध्यासेनैकाश्रयत्वं चैतन्यस्यापि घटावच्छेदादेकविषयत्वमिति। ननु बुद्धिस्थम

पं॰वि॰ ५४ र्थे पुरुषश्चेतयत इति सांख्यास्तद्धि रुद्धमात्मा स्वचैतन्योपरक्तं चेतयत इति न त्वाहं वा वाहं कर्त्तेति प्रथमं बुद्धिस्थमर्थं तदात्म
नामापत्तेः पश्चाच्चेतयत इत्यर्थः उक्तं तावत्सर्वगतस्याप्यात्मनोऽविद्यावृतप्रकाशत्वात्परिच्छिन्नान्तःकरणपरिणामो
पाध्यभिव्यक्त्यपेक्षया विषयविशेषं प्रति प्रमातृत्वं ननु केयमभिव्यक्तिरावारणाभिभव एव न स्वरूपातिशयः ननु
क्तोपाधिः किंप्रमाणकः उक्तं ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति धीशब्दवाच्यज्ञानपरिणामवन्मनो विज्ञानं बुद्धिरिति
तदेवमुपाधिवशान्नियमेऽपि पश्चादिति चैतन्यस्य सर्वविषयाधिष्ठानोपलिप्तत्वात्सर्वमस्य युगपदवभासेतेति तत्परिहाराय न
न्यप्रमातुः स्वयंज्योतिष इति परिणामसंसृष्टकर्म्मोपाधिनियमान्नासंसृष्टेषु चैतन्याभिव्यक्तिरिति नैकस्य प्रमातुः
सर्वविषयावभास इति भावः । ननु कर्म्मकारकेऽपि चैतन्यमभिव्यक्तं चेत्तत्सर्वप्रमातृसाधारणतया सर्वेषामवभास
मानमिति नेत्याह कर्मकारकमपीति । एतत्प्रमातृचैतन्याभिन्नतयैवाभिव्यक्तं न हि विषयचैतन्यं प्रमात्रन्तरचैतन्याभेदेना
भिव्यक्तमतो न सर्वेषामेवभासत्वमित्यर्थः ॥ ॥ ननु स्वयंप्रकाशमानस्य प्रदीपादिवत्स्वसंसर्गिशेषवस्तुप्रकाशित्वे रामः ५४
सति कथमहंकारोपाधिनियमः कल्पनेन वान्तःकरणपरिणामसंसृष्टविषयादन्यत्र चैतन्यमुपरक्तमपि न प्रकाशय

तीत्युक्तः प्रकाशासंसर्गस्यैव प्रकाशमानतानभिधानाद्विषयान्तरेषु चैतन्यस्यासंसर्गितया नोपराग इत्येवं चेदन्तःकरणेऽपि तत्संसर्गि
तया नोपराग इति । तदुपाधिना न किंचिदपि प्रकाशेत स्यादेतदन्तःकरणावच्छिन्नो हि जीवः प्रतिबिम्बस्थानीयः परिच्छिन्नसंसृ
सृष्टमेव विषयं प्रकाशयेत् ब्रह्म तु बिम्बस्थानीयं सर्वगतत्वात्सर्वमवभासयिष्यति । न च ब्रह्मणि सर्वदर्शित्वं मुखावदातत्ववज्जीवेऽ
नुगच्छति जीवगतं वा किंचिज्ज्ञत्वं मुखश्यामतादिवद्ब्रह्मणि त्वनुगच्छतीति सर्वमुपपन्नमिति नैतत्सारं तथा सति विषयावच्छिन्नचैतन्य
स्य ब्रह्मचैतन्यतयाहंकारावच्छिन्नजीवानुषंगाभावात्सर्वज्ञत्वमिव विषयावभासोऽपि जीवस्य न स्यात् । ननु जीवोपाधेरन्तःक
रणस्य विषयस्य च परस्परान्वयादुभयावच्छिन्नमपि चैतन्यमन्योन्यसंसृष्टमिति संयुक्तो जीवस्य विषयावभास इति । नैतद्युक्तं त
था सति सर्वगतेन ब्रह्मणा नित्यसंसृष्टमन्तःकरणमिति तदुपाधौ जीवे ब्रह्मचैतन्याभेदाभिव्यक्तौ ब्रह्मसार्वज्ञ्यं जीवस्यापि स्या
त्प्रकाशेत । अथ मतं सर्वगतमपि चैतन्यमविद्यावृतत्वात्स्वयमपि तावन्न प्रकाशते न च स्वयमप्रकाशमानस्य तस्य प्रकाशः प्रदी
पवत्प्रकाश्यसमवभासोऽपि तु क्षमोऽग्निमात्रेणादित्यवत्परिच्छिन्ने प्रापस्थानेन सर्वगतमपि चैतन्यं तिरोधीयते तत्रान्तःकरण
परिणामेनावरणाभिभवात्तत्रैवाभिव्यक्तं चैतन्यं किंचिदेव प्रकाशयतीति । तदपि न युक्तं । कार्यभूतेनान्तःकरणेन स्वोपादानाज्ञाना

पं॰वि॰ भिन्नत्वायोगात्तस्मात्त्वयुक्तं किंचित्तत्वेहंकारोपाधिवर्णनमित्यत्रोच्यते युक्त एवायमुपाधिः सर्वगतस्यापि जीवस्यासंगित
५५ यासर्वैस्तैरसंयोगात्प्रकाशस्य चासंयुक्तं वस्त्ववभासितत्वाद्यत्तु सर्वोपादानतया स्वात्माभिन्नं जगदात्मानमिवावभासय
तिनतुजीवोऽनुपादानत्वात्कथंपुनःसर्ववस्तुदेशाऽव्यवहितत्वयासर्वगतस्यविषयान्तरेष्वसंगितयाऽसंसृष्टस्यान्तःकरण
संसर्गितासंभवेदुच्यते।यथागोत्वादयोजातिविशेषाःकेसरादिमद्व्यक्त्यन्तरप्रदेशसन्निहिताअपिस्वभावविशेषादश्वा
दिव्यक्त्यसंगितयैवतत्तन्निष्पन्नकाश्चापिसास्नादिमत्पिंडसंगितयाभिव्यज्यन्ते।यथावाप्रदीपप्रभाःवाय्वाकाशासंगधादि
प्रदेशव्यापिन्यापिस्वभावविशेषान्नानिनप्रकाशप्रतिरूपसंसर्गितयानदेवप्रकाशयन्त्येवंचैतन्यमपिस्वभावविशेषा
दन्तःकरणेसंसृज्यतेनान्यत्रेतियुक्तं।यथावाचक्षुर्बलेनचन्द्रिकानानदेशस्थमपिनक्षत्रप्रायःपिंडसमारूढेनदृश्यतेतथाहंकार
समारूढेनात्मनाकेवलेननप्रकाश्याअपिविषयाःप्रकाश्यन्तइतिजीवावच्छेदनिमित्तांतःकरणपरिमाणमसंसर्गकृताभि
व्यक्तिकृताद्विषयावच्छिन्नचैतन्यस्यजीवचैतन्यतावच्छिन्नविरुध्यतेब्रह्माकारपरिणतान्तःकरणसंसर्गाभावादनित्यवस्तुग्रह राम॰
णःप्रकाशप्रसंगःनचांतःकरणस्वरूपमात्रसंसर्गिणोऽभिव्यक्तिरंगीकृतानद्दृष्टधर्मादीनामपिप्रसंगाज्जीवाकाराहंवृत्तिपी ५५

णतांतःकरणेनजीवोभिव्यज्यतेऽन्यथानुपपत्तेः।अतःपरिच्छिन्नत्वान्नसर्वविषयावभासिता।अथवाऽज्ञानावृत्तःस्वयमप्रकाश
मानतयाविविधविषयाननवभासयन्नन्तःकरणोपरागदावरणतिरोधानेनतत्रैवाभिव्यक्तस्तत्संसृष्टमेवविषयमवभासयति।
दृष्टंचवृश्चिकवृक्षादिकार्यस्यगोमयमृदादिकारणस्वभावतिरोधायकत्वमितिसिद्धेवात्मनिप्रमाणत्वादिव्यवस्थिति।विषय
स्यचैतन्यविवर्तत्वात्तदभिन्नमपिचैतन्यमहमवभासैकरूपमुक्तंतत्रापसिद्धांतप्रसंगंवादयति।ननुनीलादिविषयोपिचैत
न्यात्किंचिन्नाम्यादपसिद्धांतेसर्वसिद्धांतसंकरःस्यादस्तिचात्रमाहानसिद्धांतेभेदःक्षणिकाद्विज्ञानाद्भेदेनार्थक्रियासामर्थ्य
सत्त्वभूयस्यविषयमाहुर्विज्ञानवादिनस्तत्वदर्शिनिस्वहितीयाःसंवेदनाद्भेदेपिविषयस्यभेदेनार्थक्रियासामर्थ्यसत्त्वस्यापित्वं
भावाधितमस्तीतिवदंतितत्रकथंसिद्धांतसंकरइतिचदिदंसंवेदनैकदर्शायपनिमेयपरस्परव्याप्त्याविसत्वैकरूपत्वाप्रसभि
ज्ञानाद्भेदोपिघटसंवित्पटसंविदित्यवभासतइतितत्राहविच्छेदावभासेपीतिस्वरूपप्रत्यभिज्ञापरोपाधिविच्छेदेननबाध्यतइ
तिभावः।नन्वेकत्वेपिसंविदोविषयाभेदःकिंनस्यादितितत्राहयदिस्यादित्यनुवृत्तस्यव्यावृत्ताभ्याभेदोनुवृत्तंचोदाकाशघटादि
वदित्यनुमानमुक्तमिदानींप्रत्यक्षोपिविषयसंविद्भेदइत्याहकिंचेतरेपीति।नीलात्मकसंविदितिनीलमवभास्यतेयुगपद्विषयवि

षपि संविद्रूपानभ्युपगमान्नप्रत्यक्षगवभासइत्यहं संवेदनमात्रमहं नीलं पश्यामीति कर्तृकर्मतयाभेदः प्रत्यक्ष इत्यर्थोत्र विज्ञान
वादिभ्योद्दपति। नैतद्रूपोरपीत्ययं भावः। संविदो सत् नीलं न तत्संवेदनेऽवभासेत भासने वेत्सर्वं किमिति नावभासते विशेष
संबंधाभावान्नीलस्य संविदो जनकतादिविशेषसंबंध इति चेन्नेंद्रियस्यापि विषयतापसंगात्स्वाभाविका साधारणा
ऽभेदसंबंधादेव विज्ञाने नीलमवभासत इति सिद्धांते तु भेदावभासोपि प्रत्यक्षो युक्त्या कथमपह्नूयत इत्याह कथं पुनरहमिदं
जानामीति विज्ञानवादी तु नैतत्रयमेकसंवित्प्रतिभासि किंतु संवित्त्रयमेतत्क्रमवर्त्तीति परिहरति नापंतद्दवभासइति क्र
मवर्त्तिष्वन्येषु विकालेप्वन्यावभासेतेद् तु त्रितयं युगपत्प्रत्यक्षमेषां च भासते ततः प्रत्यक्षविरुद्धः क्रम इत्याह सिद्धांती कथं पुन
स्तर्हित्याह विज्ञानवादी तद्वासनासमेतसमनंतरप्रत्ययसमुत्थमिति। अहमित्यहंकल्पनोपारूढकर्त्रादिविज्ञानं भवत्समनंतर
वेदमिति विषयविकल्पितं विज्ञानं भवति। तेऽप्य विज्ञाने वासनास्तज्जातीयज्ञानस्य पूर्ववृत्तसजातीयज्ञानमेव वासनानाम्
संस्कार इत्यस्तत्र वासनाद्व्यसमेतात् ज्ञानामीति क्रियाविकल्पप्रत्ययाकारणत्रितयानुरूपेण हमिदं जानामीति वि
षयक्रियाहंकल्पनाविकल्पितं त्र्याकारमेकं विज्ञानमुत्पद्यत इत्याह सिद्धांती किं पुनरेवमिति न हि केवलमहमिति इदमि

ति वा जानामीति वा प्रत्ययादृष्टाः किंतु प्रथमतएव प्रत्ययो हमिदं जानामीति कर्तृकर्मानुभयात्मको दृष्टस्तस्माद्यथा प्रतिभासमेव
हमिति विज्ञानाद्भिन्नमर्थक्रियासमर्थं नीलं वस्त्वनुमंतव्यमिति भावः॥ ॥सत्संतानानुभवमात्रिसंवेदनादभिन्नं नीलं द्वमः
किंतु विज्ञाने नीलस्य प्रतिभासान्यथानुपपत्त्या कथयत्स्त्वापि ते हि विज्ञानविषयोः क्रियानिमित्तासाधारणपरस्परसंबंधादस
धारणो विषयावभासः स्यात् क्षणिकस्य सागंतुकसंबंधाभावे यदि स्वाभाविकाभेदसंबंधोपि न स्यात् तत्रैव तन्येनासंसृष्ट
स्य प्रतिभासएव न स्यात् अतः प्रतिभासानुपपत्तिरभेदं साधयतीति विज्ञानवादिवर्णयति। क्षणविध्वंसिनः क्रियस्तुपपत्तेरि
ति। तत्र प्रत्यक्षेण विज्ञानानां क्षणिकत्वमुच्यते किं वानुमानेन न तु प्रत्यक्षेण तथा हि सवर्त्तमानावभासि ज्ञानं स्यात्स्मनोऽव
र्तमानानुव्यावृत्तिमपिगमयति नीलज्ञानमिवानीलव्यावृत्तं नीलमतीवर्तमानक्षेणमात्रं विज्ञानं प्रत्यक्षमिति न तावत्प्र
त्यक्षेण। विज्ञानानां भेदावभास इत्याह पेप्येवमिति संविद इति। ननु सत्यपि भेदावभासे ऽतिसादृश्यात्र स्पष्टमवभासत इ
ति शंकते ऽथासंतसादृश्यादिति कोपमभिप्रायः यदि ताव संविदोन्योन्यभेदो ज्ञानांतरगम्यस्तु सादृश्यदोषात्स्पष्टं न भास
त इत्यभिप्रायः तदा धर्मिप्रतियोगिसंविदोः संविदंतराविषयत्वात्तत्तयोभेदग्रहः स्याद्धिषयत्वे वा धर्मिप्रतियोगिभेदा

पं॰वि॰ स्वंत्रितयमपि भेदसंवेदनेकल्पितं तदभिन्नं यस्मादथसंविद्रूपमेव भेदः संवेदनमेव तज्ज्ञानमिति तत्राह संविदोपि चेदिन्न
५७ पि चैक्यप्रतिभासे सादृश्यकल्पनं प्रमाणविरुद्धं भिन्नयोरैक्यभ्रमश्च सादृश्यकल्पनायां प्रमाणं तदभावाद्धन सादृश्यसि
द्धिरित्याह। अपि च यद्रूपप्रतिभासइतिनत्वैक्यावभासस्य व्यामोहत्वान्न सादृश्यकल्पना प्रमाणविरुद्धा। ऐक्यभ्रमश्च भिन्ने
षु सादृश्यमन्तरेणानुपपन्न इत्यर्थापत्तिमुखावसा सादृश्यकल्पनातः सिद्धं सादृश्यमित्याह पूर्ववादी तद्रूपप्रतीतेर्व्यामोहत्वा
दिति नैवमैक्यभ्रमसादृश्यसिद्ध्योरितरेतराश्रयत्वादिति परिहरति नेतरेतराश्रयत्वादिति नन्वैक्यप्रतिभासस्य भ्रमारोप
नस्वतः सिद्धमिति किं तु सादृश्यस्य निर्मलत्वप्रमाणविरुद्धत्वापेक्षया सादृश्यस्य च निर्मलत्वं प्रमाणाविरुद्धत्वमैक्यस्य प्र
माणापापेक्षयतितुल्यं तथापीतरेतराश्रयत्वमिति चोदयति स्यादेतदभ्रमो हेपी सैक्यप्रतिभासो न स्यात् सादृश्याभावोपक्षः
किं तु स्वत एव प्रमाणमिति परिहरति नेतरस्मात्सिकमिति। नतु सादृश्यमपि स्वत एव सिद्धमित्यशंक्याह नतु सादृश्यकल्प
नास्वत इति कुतस्तर्हि सादृश्यसिद्धिरित्यत आह। प्रमाणपूर्वकैक्यभ्रमो हि भिन्नेषु सादृश्यं कल्पयतीति भावः॥ ॥ राम॰ ५७
ननु कथं प्रत्यभिज्ञानामयत्नसामर्थ्यलब्धं संविदैक्यं प्रतीयते पूर्वानुभवसंस्कारसहितादिदानीं तनचक्षुः प्रमितिकारणाज्जातेन

कस्य कालद्वयसंबंधविषयं प्रत्यक्षज्ञानं प्रत्यभिज्ञेति चेन्न तत्त्वमसि तत्र संभवति कथं। विज्ञानस्वभावस्यात्मनः स्थापित्वेस्व
यं प्रकाशस्य ज्ञानांतरागम्यत्वात्तद्धि नाशसंस्काराभावात्स्वरूपस्य वा विनाशादविनाशिनः संस्काराभावात्स्वयंप्रकाशस्येदा
नींतनस्वरूपव्यतिरिक्तप्रमाणकारणाभावाच्च न प्रत्यभिज्ञाकारणं नापूर्वात्मनि संभवतीत्यत्र स्वरूपज्ञानमेव प्रत्यभिज्ञात
स्य प्रदीपप्रभावद्वर्तमानप्रकाशिनः पूर्वापरपरामर्शात्मकत्वायोगात्सोहमिति च विषयाकाराभ्युपगमे सत्यहमितिचा
कारभेदेन विषयभेदात् ज्ञानभेदसिद्धेस्तस्मान्नात्मनि प्रत्यभिज्ञेति युक्त्या व्यामोहत्वसिद्धिरित्यत्राह अतः करणविशिष्टता
वदात्मनि प्रत्यभिज्ञानं भ्रमः। ननिष्कलंकात्मस्वरूपमात्रस्य मोक्षावस्थायिनः शास्त्रैकगम्यत्वात्संसारावस्थायामंतःकरण
विशिष्टरूपानपायात्तस्यैव प्रत्यभिज्ञायाः स्थायित्वाभिधानात्तत्रांतःकरणजन्या हि प्रत्ययाधीनत्वाद्धि विशिष्टात्माभिव्यक्तेः
पूर्वकालविशिष्टात्मानुभवनिमित्ताहमिति संस्कारसहितमंतःकरणमेवेदानींतनाभिव्यक्तिनिमित्तं सत्पूर्वापरकालविशि
ष्टात्मविषयं प्रत्यभिज्ञानमुत्पादयति। ननु पूर्वापराभिज्ञयोरविषयतयाभिव्यक्तस्यात्मनः कथं प्रत्यभिज्ञाविषयत्वमिति नैष
दोषः। यथासंवेदनस्य स्वसंविदितरूपस्यापि कालांतरेस्य संस्कारजनितस्मृतिविषयत्वं तद्वदिहाप्यभिज्ञायामविषयस्यापि प्र

पं·वि· सभिज्ञाविषयत्वं न विरुध्येत ननु स्वयंप्रकाशस्य विषयत्वेनानुपपन्नमेवं ह्यदेकाल्यांतःकरणविशिष्टतया विषयत्वोपपत्ते.
५८ यथा धर्मस्यागमैकसमधिगम्यस्यापीदानीं फलदानायोन्मुखीभावादिलक्षणधर्मविशिष्टतया वर्त्तमानफलोदयलि
गादिगम्यत्वं तद्वन्नन्वेकस्यैवात्मनः प्रत्यभिज्ञायां कथं कर्तृकर्मतया युगपद्विरुद्धरूपान्वयः ननु सर्ववादिनां देहव्यतिरेका
द्यनुमानविषयतया कर्तृकर्मभावः संप्रतिपन्नस्तन्नानुमानादौ विषयस्याकारकत्वाभावाद्वा कारमात्रतया विषयत्वान्नत्र क
र्तृत्वेनात्मनो कर्मता प्रत्यक्षेतु पुनर्विषयस्यापि स्वविषयज्ञानजनकतया कर्मकारकत्वात्मा सैवात्मनो युगपदेकस्यां क्रि
यायां विरुद्धरूपद्वयापत्तिरित्युच्यते ऽन्तःकरणविशिष्टतयात्मनो ज्ञातृत्वं पूर्वापरकालविशिष्टतया च ज्ञेयत्वमित्युपाधिभे
दाद्विरोध इति सोहमिति च प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वात्कथं चित्रमित्तं कल्पितमव्यवहाराविसंवादाद्भ्रांति
त्वायोगान्न च सोहमित्याकारभेदादर्थभेदे न ज्ञानभेदो युक्तः। विज्ञानं क्षणिकमित्याकारभेदेनार्थभेदाद्विज्ञानस्य क्षणिक
त्वाभावप्रसंगात्सर्वं विज्ञानं क्षणिकत्वादिधर्मोपरागो विकल्पव्यवहारमात्रेन सत्येनास्तीति चेत्तथा पाचकपित्वादिव्य राम॰ ५८
हारस्य कालादिधर्मोपाधित्वाद्विज्ञानं विकल्पव्यवहारादस्त्यविशेषः इयांस्तु भेदः सति कालस्थापित्वादिविकल्पप्र

त्ययाः सोहमित्यादयस्तु भवसिद्धा व्यवहाराविसंवादिनो ऽर्थक्रियासमर्थाश्च दृश्यंते न तथा क्षणिकत्वादिव्यवहारा इति। अत्र प्रभा
करा मन्यंते नैव प्रत्यभिज्ञायां विषयत्वेनायमात्मा सिध्यति किं त्वाश्रयत्वेनेति। तदयुक्तं। पूर्वापरकालविशिष्टस्य क्षणमात्रवृत्तिप्र
त्यभिज्ञानाश्रयत्वायोगात्तदाश्रयतयास्थायित्वसिद्ध्यभावात्। अत्र पूर्वकालसंवेदनमिदानीमनुस्मर्यमाणं स्वाश्रयं तदानींत
नमात्मानं साधयति स्मृतिः स्वाश्रयतयेदानींतनमात्मानं साधयतीति कालद्वयविशिष्टात्मसिद्धिरिति। नैवं तस्मात्स्मृतिपू
र्वानुभवो हि तत्रकालमात्मानं साधयतो भिन्नप्रत्यक्षद्वयवदेकस्य कालद्वयसंबंधः केन सिध्यतीति वक्तव्यं। पूर्वसंविद्द्वय
मेव साधयतीति चिद्वान घटादिषु भिन्नद्वयव्यतिरेकेण प्रत्यभिज्ञोपादानात्। किं च न तावत्स्वयमेव संविद्द्वयं साधयति। ए
केकस्य कालद्वयवदात्माश्रयत्वाभावात्। न च संभूय पूर्वापरसंविद्द्वयं तद्वन्तमात्मानं साधयति अन्योन्यस्य अन्योन्यसं
विद्विशिष्टात्माश्रयत्वाभावात्। अपसंविद्रूपमेव पूर्वापरसंविद्रूपाश्रयात्मैकत्वविषयं संविदंतरमुत्पादयतीति सिद्धं तर्हि
प्रत्यभिज्ञानमात्मविषयं किं चानुभूतं मयेत्यात्मविशिष्टस्य संविदनुस्मृतेः स्वानुभवसिद्धत्वान्नु स्मर्यमाणतयैवेदा
नीं पूर्वानुभूतात्मसिद्धिः न पूर्वसंवेदनाश्रयतया तस्याविद्यमानस्येदानीमसाधकत्वात्स्वयंप्रकाशमानं हि संवेदनमा

पं॰वि॰ त्वाश्रयं साधयति न स्मृतिविषयतया परप्रकाशमन्यथा धर्म्मादीनामपि परतः सिद्धान्तं स्वाश्रयात्मसाधकत्वाप्रसंगात्त
५९ स्मात्सिद्धमात्मनि प्रत्यभिज्ञानमिति॥ ॥स्यान्नर्थ्यनुमानान्तु क्षणिकत्वमिति पक्षहेतोः साधकत्वं यथा तेष्वयं दर्शनादिति।
घटस्य विनाशानन्तरं पूर्वक्षणविशिष्टसत्वमन्तरस्तु च्यवनेनास्य स्वसत्ताक्षणादुत्तरक्षणे विनाशो दृष्टस्तत्रास्य क्षणावच्छि
न्नसत्त्वात्पूर्वपूर्वक्षणावच्छिन्नघटसत्वान्यादिति स्फुटमेतेनान्यपि स्वसत्ताक्षणादुत्तरक्षणे विनाशव्याप्तत्वान्नियतघटसत्वा
देस्य क्षणावच्छिन्नघटसत्वविदित्यनुमानं ततश्च सत्तानन्तरं विनाशात् क्षणिकत्वसिद्धिरिति क्षणिके घेकस्यास्त्रस्यानि
धनमिति। तत्र प्रत्यनुमानमाह दीसत्तादर्शनादित्यादिरिति घटस्य सत्तावच्छेदकाः क्षणास्तेन्नन्तरमिति विनाशावच्छे
दकत्वेनाभिमतक्षणस्तत्रात्तक्षणाः सघे घटसत्तयाश्च मारतिसाध्येतकालत्वात्स्ववच्छेदककालवदिति प्रत्यनुमानमभा
वानुमचविरुद्धमनेनसत्त्वानुमानमिति चोदयति। क्षपानुभयेति। न स्वस्मिक्षणात्पूर्वक्षणावच्छिन्नघटसत्तानामनन्तरक्षु
यानुमानमपि प्रत्यभिज्ञाविरुद्धमिति परिहरतीहायीति क्षपाऽनुभयोः प्रत्यभिज्ञानुमानयोर्बाधते प्रत्यभिज्ञानुमानाद्दुर्बल राम॰
त्तिनेत्याहनस्फुभयोरिति॥ ॥सर्वे भावाः क्षणिका अर्थक्रियाकारित्वाद्यदक्षणिकं न तदर्थक्रियाकारि यथा शशविष ५९

णमित्यनुमानोत्तरं दर्शयितुं स्थापिनोऽर्थक्रियानुपपत्तिमाहायमन्येनयोसो स्थिरत्वाभिमतइत्यादिना। ननु स्थिरस्यैव निमित्तसं
योगादन्यथा भूतस्य क्रिया पूर्वकं कार्यमुत्पादयितुं सामर्थ्यं न क्षणिकस्येति सिद्धान्ती चोदयति कथमयोगइति क्रमयोगइत्या
दिपरिहारः क्रमशोऽनेकानि कार्याणि सान्तसन्नुकुर्यादित्यर्थः। एकं वाऽनेकं वा कार्यं सहकृत्कृतत्वापरमतइत्याह योगपद्येनेति क्र
मपक्षं दूषयति न तावदित्यनेकानि कार्याणि कर्तुं समर्थक्रमेसुष्कलकारणस्य भावादेकस्यानेककार्यदर्शनाभ्यस्कृदेव कुर्या
दितिभावः। द्वितीयपक्षं दूषयति नह्यपि योगपद्येनेत्यर्थक्रियाकारित्वलक्षणत्वात्सत्त्वस्येति भावः। अतः सकृत्कर्तुः कालां
तरे पुनः कर्तृत्वे निमित्ताभावादेकर्तृत्वे चासत्वास्सकृदेव सत्वमित्युपसंहरत्यतोऽर्थक्रियाकारित्वादेवेति। सिद्धान्ती तु क्षणि
नः सकृदेककार्यकृत्वात्तुष्णीभूतस्यापि नासत्वप्राप्तिः। सत्त्वस्यार्थक्रियाकारित्वलक्षणत्वाभावादित्युपपादयति अयं कथं
मित्यादिना। तत्राह स्वविषयज्ञानजननमिति। एकं वा साधनिमेतादर्शं विषयसर्वं विज्ञानानां तु स्वविषयविज्ञानस्या
जनकत्वान्नसत्वलक्षणमिति दूषयति प्राप्तं तर्हि सार्वज्ञ्यमिति नन्वेकसंतानज्ञानानामसोम्यविषयविषयित्वाऽभावेऽपि पुरु
षांतरज्ञानस्य विषयतया पुरुषान्तरज्ञानं जनकमित्यर्थक्रियालाभः संविदामिति नेत्याह नसंतानान्तरेऽपीति। पुरुषांतरज्ञा

पं॰वि॰
६०

नेप्रतिपुरुषांतरज्ञानस्याप्रत्यक्षत्वादनुमेयत्वादितिभावः।अनुमानज्ञानविषयतयातर्हिसंतानांतरज्ञानस्यसंतानांतरज्ञानंज-
नकमितिचेत्याहअनुमानेपीति।प्रत्यक्षमेवार्थजन्यंनानुमानदीतिनेमतमित्यर्थः।ननुसर्वसंवेदनजातंसर्वज्ञज्ञानस्यवि-
षयतयाजनकंभवतितस्यसर्वविषयप्रत्यक्षत्वादित्यतआह नसार्वज्ञेपीति।साक्षादिति।सहविज्ञानेपुरुषेवस्वपबोध
नेनसर्वज्ञज्ञानेपरकृतयातदभेदेनेत्यर्थस्तमहेतुःसंसारसंविरकरूपत्वप्रसंगादिति।संविद्विषययोरभेदोपगमात्संसा-
रिकज्ञानैःसोपप्लवैःसर्वज्ञज्ञानंदूषितंस्यादितिभावः।ननुसर्वोपिस्वबोधरूपमपितज्ज्ञानंनबाधितत्वात्सदोष
महोऽवेतिनतायद्वेदकज्ञानंसोपप्लवंबाधते।प्राप्तिबाधयोरेकस्मिन्नर्थेऽनुपपत्तेः।ज्ञानांतरस्यतुनसर्वज्ञज्ञानोपप्लवोविष
योर्येनतद्वत्तयोर्नबाधःस्याद्विषयत्वेचबाधज्ञानेप्युपप्लवानामभेदःस्यात्तर्हिविनेयोपप्लवैःसर्वज्ञज्ञानेविज्ञाना-
न्युपरज्यंतइतिचेत्याहातद्रूपत्वादितिसर्वज्ञस्यलोकिकोपप्लवानवभासनाद्रूपदेशायोगइतिभावः।अथनस्वविषयज्ञान-
जननमर्थक्रियाकिंतुसजातीयक्षणांतरोत्पादइतिचोदयति।अथेति।उत्तरमाहचरमक्षणस्यासत्त्वक्षणत्वप्रसंगइतिअथ॰ रा॰म॰
मर्थोऽहमितिसंतानपतितानिविज्ञानानिस्थापित्वानुसंधानकल्पनाभ्यांरागादिदोषैश्चोपप्लुतानिपूर्वंपूर्वंसजाति- ६०

MEMORIAL

यविज्ञानलक्षणसंस्कारेभ्यःउत्तरोत्तरावरफलंघनेनत्रसर्वमिदंक्षणिकमितिभावनयानादिसत्कल्पनानिवर्त्तनेस्वलक्षण-
भावनयाद्रव्यगुणकर्मजात्यादिविशेषणविशेष्यकल्पनाविनश्यतिदुःखमितिभावनयारागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः
क्षीयंते।शून्यमितिभावनयाविषयोपप्लवविरामस्तत्रभावनाभेदश्चतुर्विधश्चतुर्विधसंस्कारविरोधिभिश्चतुर्वि-
धोपप्लवैःक्रमेणमंदीकृतेभावनाप्रकर्षपर्यंतात्समनंतरप्रत्ययात्सर्वोपप्लवविरहिविज्ञानमुत्पद्यतेतच्चसंसारसंतानस्यास्त्यवस्थाअर-
समितितस्यकार्यांतराभावादसत्त्वप्रसंगःक्रमेणसर्वस्यैवपूर्वस्यादितिननुचरमक्षणेपिसंतानांतरज्ञानांतराभावेपिसर्वज्ञज्ञा-
नंविषयतयाजनयतीतिचेत्याहनचसर्वज्ञज्ञानजननेनेति।तुल्यस्वभावयोःकर्मकारणभावएवैकसंतानानामान्चरमक्षणसर्व-
ज्ञज्ञानयोर्विशुद्धतयातुल्यस्वभावयोःकार्यकारणभावादविच्छिन्नःसंतानइतिभावः।माभूत्संतानविच्छेदइतिचेत्याहतुमुक्त्य-
भावप्रसंगादिति।संतानविच्छेदोहिमुक्तिरभिमतेतिभावः।अथसर्वज्ञज्ञानसंतानस्यतुल्यस्वभावतयाजनकत्वात्तत्स्यैवना-
नेक्यमेवमुक्तिरिति।तर्हिविषयतयाजनकत्वमेवनास्तीत्याहनचसर्वविषयसंविदोविषयइतिप्रत्यक्षत्वंविषयत्वात्तेनोच्यते।पुरुषां-
तरसंवेदनस्यानुमेयत्वादपिवाप्रत्यक्षस्यैवसंवेदनस्यदेहांतसंधानाद्वामीयतइतिसर्वप्रमाणाविषयसंविदित्यर्थःवासंविदात्म

नाभेदाभावादित्ययमर्थः संविद्रूपं संविदं तदाकारां संविदाकारेण भिद्यते प्रतियोगिनोः संविद्वप्रसंगादेकासंवित्त्वात्संविदाकारेण
भेदे ऽपि संविदेकैव स्यादिति न संविदो विषयविषयिभाव इति। किं च यदर्थक्रिया नाम कारणसत्त्वहेतुः प्रतीतिनिमित्तत्वेति विकल्प
हेतुत्वे दूषणमाह स्वकारणनिष्पन्नस्येति कार्यात्प्रागेव कारणस्य निष्पन्नत्वादित्यर्थः। न च निष्पन्नमप्यर्थक्रियातः पूर्वमसदिति
शक्यं वक्तुं शशविषाणतुल्यत्वेनाकारणत्वप्रसंगात्। प्रतीतिपक्षे ऽनवस्थादूषणमाह तत्रेत्यादि अप्यन्यतद् इति। ननु कार्यमर्थक्रि
यानाम तन्नानि च पूर्वेषामुत्तरोत्तराणि कार्याणि स्वयं सिद्धानीति न प्रतीत्यनवस्थेति चोदयति। न तस्य सतानार्थक्रियाइति नाहि
कार्यकारणभूतानां ज्ञानानां स्वयं सिद्धत्वान्नार्थक्रियासत्तावगतिनिमित्तमित्याह न तदर्थक्रियातद् इति। मा भूत्कारणभूतज्ञा
नं कार्यभूतज्ञानाधीनप्रकाशं स्वयंप्रकाशत्वात्तथापि स्वयंस्थेनैवावभासनादिति स्वयमेवस्य स्वार्थक्रियेति नेत्याह न हि स्वरूप
मेवेति। तस्मान्नार्थक्रियाकारित्वलक्षणं सत्त्वं किं तु स्वाभाविकमिति सत्कृत्कार्यं कृत्वा उत्तरीभूतस्यापि स्थायिनः सत्त्वेन विरुध्यत
इति॥ ॥इदानीं क्रमेणापि कार्यं कृत्वा सत्त्वं न विरुध्यत इत्याह यत्पुनः क्रमेणेति। शक्तस्यापि सहकारिसन्निधानविशेषक्र राम॰
मापेक्षया कार्यक्रमो युज्यत इत्याह स्थायिनो ऽपीति। शक्तस्य सहकारिकारणापेक्षामपरप्रत्ययकारणस्येति निगूढाभिसंधि ६१

रुत्तरमाह। कारणस्यापि न तदानीमिति मा भूत्तर्हि शक्तस्याशक्तस्य वा सहकार्यपेक्षेति तत्राह। सहकारि विघ्नं स्यादिति। शक्तस्यैव
सहकार्यपेक्षया कार्यकरत्वादनुभवविरोध इति भावः। अशक्ता एव पदार्थाः सामग्रीलक्षणकारणसत्तौ परस्परमपेक्ष्यन्त इति
नानुभवविरोध इत्याशंकते अथ कारणं कारणौ सत्त्व इति कार्यप्रसवशक्ता अपि पदार्थाः सामग्रीकारणं प्रतिशक्ता वा नैवेति
विकल्पयत्र तत्कारणस्येति। भपत्र दूषणं कारणं चेदित्यादि। अथवापेक्ष्यन्त्कार्थे ऽनुशक्ताशक्तयोरपेक्षाभावे कथं सह
कार्यनुभवः कथ्यते ननु कार्यस्याप्युत्पत्त्याविशेषात्सर्वस्मा जन्म किं न स्यात्कारणस्य वा विशेषसंबंधे तस्य सर्वजनक
त्वं किं न स्यादित्यय यस्त्वापां कथं कार्यकारणभावमात्रेण यथा मयस्तावन्वयव्यतिरेकसामर्थ्यात्कार्यकारणनियम
इति सहकारिणो ऽपि तथेत्याह तस्य मन्यते सहकारिजातिविशेष इति यः सहकारिणमपेक्षते तस्यात्मनि स्थाप्यत एव हेतो
रिति कृत तर्हि सहकार्युपयोग इति। तत्र मतान्तरमुपन्यस्य पूर्ववदिदं दूषयति यस्य मन्यते सहकारिजनितविशेष इति यः स
हकारिणमपेक्षते स स्वात्मनि विशेषो ऽसत्त्वो ऽशक्तो वा न शक्तो वेति विकल्प्याहेतुत्वे दूषणमाह विशेषोत्पत्तावपीति। तस

पं॰वि॰ ६२ शान्तसहकारिसहस्रसंनिधानेपि किंचिदकुर्वदनुष्टमित्यर्थः। हेतुत्वेदूषणमाह। अहेतुरिति। तत्र प्रथमविशेषस्य विशेषांत
रापेक्षायामनवस्थाप्रसंगदोषपरिहाराय कंचिदेवसहकारिभिः कारणे विशेषो जन्यते कार्यजननाय कश्चित्कारणे विशेषजन्मा
नपेक्षमेवसहकारिभिः कार्यं जन्यत इत्यर्थव्यवस्थास्वरूपमेव दर्शयन्प्रथमं तं नसर्वकार्यमिति॥ तावत्स्येवाभवद्धेतुत्वेनाविशेषस
त्त्येवेत्यर्थः। नहि शक्तिमता कारणेन स्वार्थमनुपकुर्वन्नपि सहकार्यं पेक्ष्यत इति त्वयैवेवस्वपक्षो निरस्त इति परिहरत्यनुपकुर्व
न्नपि तर्हीत्याह साक्षात्क्षणिकवादिनानुपकुर्वन्निति सर्वस्य सहकारित्वप्रसंगादित्यर्थः। कथं हि उपकार इति तदाह स्वफ
लतुनोपकरोतीति कार्यं हि सहकारिणा जायमानमुपक्रियत इत्यर्थस्तर्हि क्षणिकस्येव नित्यस्यापि कार्यस्योपकारापसहकार्यपे
क्षा न विहन्यत इति परिहरति नित्यस्यापि तर्हि नाधेयापानिशय इति। तदेवं प्रपंचयति। यथैव क्षणिको भाव इति। सामग्रीसाध्यत्वा
दिति बहुकारकव्यापारसाध्यत्वादित्यर्थः पुनश्चापकार्यं कार्यमेवोपकारकसहकारिणमपेक्षते नानुपकार्यं कारणमित्याशं रा॰म॰
कतेऽथ मतं क्षणिकोपि नैवापेक्षत इति। यदत्तसन्निधौ भवति तदपेक्षत इति संबंधः। नित्योपि तर्हि कार्यकारणमेव सहका ६२

रिणमपेक्ष्य क्रमेण भविष्यतीति नेत्याह नित्यस्य जनकस्येति सहकारिणा कारणस्येव सर्वदा भावात्सर्वदा कार्यजनादित्यर्थः न
नु सहकारिणामपि सन्निधानमपेक्ष्यत इति नेत्याह को हेतुरिति। कारणसहकारिणोरपि संबंधः कार्यश्चैकोपिकारणं सहका
रिभ्यां सहाभवतीति कार्यजन्म सदा भवेदित्यर्थः। ननु क्षणिकादपि सहकारिसव्यपेक्षात्किमिति सदा कार्यं न जायते नविशेषव
त्तिसत्ता कार्यजन्माभावात्सर्वोन्तरकालयोर्विशेषाभावादिति तत्राह क्षणिकस्तु यो जनक इति इदमयुक्तं यतं तदस्ययमर्थः। न
तावदग्निस्वलक्षणस्येव धूमस्वलक्षणं प्रति कारणत्वमवगंतुं शक्यं क्षणमात्रापवर्गिणोरन्वयव्यतिरेकबुद्धिद्वयकालावस्थाना
योगात्किं त्वग्निधूमसंतानयोरन्वयव्यतिरेकाभ्यामग्निस्वलक्षणानि धूमस्वलक्षणानां कारणानीति सामान्योपधयोपमातव्यं
तत्राग्निस्वलक्षणानां विशेषाभावादंगारगतादप्यग्निस्वलक्षणात् धूमजन्म किं न स्यात्काष्ठस्वलक्षणाभावादिति चेत्तर्हि न
स्यापि स्वसंतानविद्यमानत्वादग्निकाष्ठस्वलक्षणसंसर्गापेक्षा विद्यत इति चेत्संतानद्वयनित्यत्वेन निमित्तसन्निधानस्यापि
सदा प्रसंगात् तत्राप्यनापेक्षेति चेत् इहापि नित्येपि सहकारिसंनिधानस्य कदाचित्। स्वाकन्नित्यस्य कार्यजननप्रसंगो न युक्तो व
र्तत इति ननु सहकारिसन्निधानादेव कार्योदयनियमेपि धूमकाष्ठसंतानयोर्नेपिकार्योपकारकसंबंध इत्याह किमत्रानुयुक्त

पं·वि·
६३

मितिपरिहरति सत्यपि नियमइति सहकारिणं कार्येणान्वयव्यतिरेकनियममपि नोपकार्योपकारकसंबंधइत्युक्तिविरुद्धइत्यर्थः। न
न्वयव्यतिरेकनियमस्योपकार्योपकारकसंबंधव्याप्तिः॥ दृष्टेति दृष्टाकार्यकारणयोरित्याह तथाहि यः कश्चिदिति। उपकार्यो
पकारकसंबंधाभावजलधूमयोरिवान्वयव्यतिरेकनियमानुपपत्तेरिति भावः। ननु ययोरेवाग्निधूमस्वलक्षणयोः कार्यकारण
भावो दृष्टः तत्रैवान्वयव्यतिरेकनियमो नाग्निधूमसंतानयोर्येनाविशेषोऽस्य बहिस्वलक्षणेषु धूमस्वलक्षणकारणेषु काष्ठ
संयोगासंयोगाभ्यां धूमभावाभावदर्शनेन सहकारिकारणेष्वन्वयव्यतिरेकनियमोऽपेक्षालक्षणोपकार्योपकारसंबंध
श्चस्यात्तस्मात्कार्यकारणलक्षणादन्यत्रसामान्योपाधौ कार्यकारणयोग्यताप्राप्तिरिति तत्राह एवं हि कार्यकारणभावसि
द्धिरित्यादि सामान्योपाधौ हि व्यवहारो दृश्यत इति भावः। अस्तु सामान्योपाधौ जन्यजनकयोग्यतानियमः ततः किमि
ति तत्राह तत्र न यदि क्षणिकं कारणमिति तदेव साधयति। तथाहि हेतुपरंपराप्रतिबंधादिति कारणस्य स्वयं शक्तत्वादित्यर्थः। राम० ६३
नापि कार्यं सहकारिणमपेक्षत इति कारणादेव जननादित्यर्थः। ननु एवं किं स्वलक्षणात् धूमजन्मनि काष्ठसंसर्गस्यापि सन्निधा
नात् तदपि सहकारि कल्प्यत इति तत्र प्रागपि हि किं त्वा तु स्वलक्षणस्य धूमजनने योग्यस्य काष्ठसंसर्गभावात् तद्धेतुत्वलक्षण

व्यतिरेकस्य दर्शनेन मंत्रेणान्वयमात्रान्न सहकारित्वसिद्धिरित्याह काकतालीयमुच्यत इति तर्हि माभूत्सहकार्यपेक्षेति कारणम
पि माभूदित्याह तथा च कार्यकारणव्यवहार इति तस्मात्क्षणिकनिश्चयः सहकारिसन्निधावक्रमस्याविशेषात्कारणत्वमवि
शिष्टमित्युपसंहरति तस्मात्क्षणिकस्यापीत्ययमर्थः यथैकस्मादग्निस्वलक्षणात् समानदेशो बहिरुपरिष्टात् धूमोऽधस्ताद्भस्म पु
रुषो विज्ञानामिति सहकारिभेदात् देशभेदेनैकस्मादनेकानि कार्याणि प्रसूयन्ते तथैकस्मात्कारणात्कालभेदेन सहकारिभेदा
त्कार्यभेद इति तस्मात्सत्यपि विषयाभेदे हंसवेदनस्य यथाप्रतिभासमहणियात्संवेदनाच्छेदे नाप्यर्थक्रियासमर्थतयावस्था
पित्वमस्तीति महदेतत्सिद्धांतवैलक्षण्यमस्तीत्युपसंहरति तदेव महत्कर्तुः सदेकरूपावगमादिति। यत्किंचित्साम्यं न च सिद्धांत
सांकर्यं मंत्रार्थवेदेतिहासपुराणप्रमाणानभ्युपगमाद्वेदानां स्वर्गाभ्युपमोक्षानभ्युपगमात् क्षणिकप्रमाणसंबंधस्य क्षणि
कस्यैव सत्त्वाभ्युपगमाल्लोकायतबौद्धाशाद्ध्यपरिणतः प्राभाकराभेदाभेदाभ्युपगमान्मंत्रायप्रमाणात्र लोकायतक्षपणक
शाद्ध्यपरिणामो वार्तिककारोयस्तु कश्चित्क्षपणकपादायनतश्रिरोविवः नत्वदर्शनेन तन्निष्टपरमहंसपदं पनीतयायुविक्षिप्त
विवेकविज्ञानलवः स्वपरपक्षगुणदोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बंधमोक्षादिसंकरमिव कुर्वन्दुर्जनाश्रयणीयां

वावंजन्मनि सुगतविज्ञानवादसमानोऽयं वेदान्तवाद इति संप्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुध्यमानो नाय
वाच्यः किंतु त्राचनीय इति उपेक्षणीयो विद्वद्भिः ननु विज्ञाने प्रपंचस्य कल्पितत्वे तत्त्वेतस्य वतुल्यं सत्यं विज्ञाने प्रतिभास्यमान
त्वं वर्तमानस्य च तुल्यमिति विज्ञानवादस्त्वदीयं दर्शनं किं न स्यात् सत्यपि प्रतिभास्यत्वे सत्यमिथ्याविभागोस्तीति वेदिरा
पि सत्यपि मिथ्यात्वेप्यर्थक्रियासमर्थसत्वासत्वविभागोस्त्येव कल्पितत्वेनयं विभागसिद्धिरिति चेन्न प्रतिभास्यत्वेपि न सत्यमि
थ्याविभागसिद्धिः इष्यते विभाग इति चेन्न तद्वविभागदर्शनं मम किं न स्यात् घटादेर्मिथ्यात्वमसिद्धमिति चेन्न प्रतिभास्य
सत्यत्वस्याप्यसिद्धत्वात् शुक्तिरजतघटयोरर्थक्रियाभावाभावसत्वविभागदर्शनान्नैवं वदन्ति चमायाप्रीतिहेतुत्वादिकारणं
श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितत्रास्त्रभेदानां दाहच्छेदभेदादिहेतुत्वमित्यलमनतिप्रसंगेन। ननु विषयस्याप्रतीत
न्यव्यंजकतयाऽपरोक्षत्वेऽनुमानादिष्वपि तथात्वापत्तेरन्यथा इष्यते इति चोदयति। ननु नानुमेयादिष्विति अन्तःकरणपरिणाम
संसर्गकृतयोग्यत्वाद्वस्तविषयस्य चैतन्यं प्रति व्यंजकत्वं न तदनुमेयादिषु वर्त्तमानत्वसंभवात्तेषूक्तमानधर्मद्वयोः सत्त्वेपि
गान्नापरोक्षतेति परिहरति नानुमेयादिष्वपरोक्षत्वमिति। अव्याप्तत्वादिति कारकत्वव्यंजकत्वधर्मद्वयानुपपत्तेरित्यर्थः।

नहि विनष्टे घटे मिसंयोगात्लोहित्वमुपपद्यते। न चातीतानागताकारेणानुष्ठानादेर्वर्तमानत्वमपि इष्यते न दृष्टेर्युगपद्दर्शनात्वर्त
र्त्तमानत्वायोगात्। अतीतता धर्मस्यापि वर्त्तमानकालो घटादेर्विना न्वयितयावच्छेदकाः किंतु प्रतियोगितया निघटादिवन्नव
र्त्तमानत्वासिद्धिः किंवातीताकारेण वर्त्तमानस्य नेदानीतनक्रियागुणाश्रयत्वमस्त्यतीताकारतया वर्त्तमानस्य घटस्य वर्त्तमान
लोहितगमनाश्रयत्वादर्शनादेतो नानुमेयादिषु कारकत्वव्यंजकत्वे युक्ते। प्रत्यक्षे पुनरिंद्रियसंयोगस्य गुणस्य गुणिव्याप
मंतरेण व्यापारायुक्तेर्विषयस्य सामर्थ्यं न भावत्इति। कथं तर्हि विषयव्यापाराभावेऽनुमेयादिषु विषयाकारता विज्ञानस्येति न
दाह लिंगादीनामेवेति। न च ऽतीते च वर्त्तमानज्ञानविषयत्वजन्मवत्कारकत्वमपि स्यादिति नेत्याह प्रमेयस्य चेति। विषयत्वं नाम
अनुमेयेषु षुप्तिव्याप्तिः सा चाभावस्तद्धर्मोन भवति विज्ञानाकारतापि न विषयव्यापारः किंतु विज्ञानस्यैवेति नातीतेष्वर्थक्रियाका
रित्वं ज्ञानानेष्वानुमेयादिषु फलापेक्षयास्तकर्मत्वं न कर्मकारकापेक्षयेति सकर्मकत्वे च प्रत्यक्षवदपरोक्षतापि स्यादिति॥ ॥
अर्थमुपवरोपेदानीमस्मत्प्रत्ययविषयत्वादिति भाष्यं योजयति तदेवमहंकारग्रंथिरिति। ननु आत्ममनस्तरस्यादिवद्धिषोपा
धिसंपृष्टमात्मानं वर्णयति अन्तःस्त्र कथमहंकारस्योपाधितेति चोदिते अहंकारे तत्संस्कारोपरक्तज्ञानोपाधिकस्यैवात्मने।

पं.वि.
६५

यस्त्वाश्रयेऽपि वा स्वबहुविधोपाध्यंतरनिमित्तोऽयं व्यपदेश इत्याह। स पुनरेवंभूतो जाग्रत्स्वप्नयोरिति। गतागतमाचरनित्यनेकोपाध्य
परागुड्यते। सविकल्पकेऽधिष्ठाने सविकल्पकाध्यास इति यद्दतो अस्मत्त्वस्य विषयत्वादिति परिहार उक्त इदानीं निर्विक
ल्पकेऽपि सविकल्पकाध्यासः संभवतीत्याह किंच न केवलमिति। ननु मेयानुमेय आत्मा कथमपरोक्षतया सिद्ध इति नेत्याह न
स्वात्मन्यप्रसिद्ध इति स्वपरयोर्मेयपदं विदित्तमिति कर्तृकर्मसंबंधावगमनभ्यन्यत्वाविशेषादनुभवे निमित्तत्वात्। आश्रयत्वमन्त
रस्य विशेष इति चेत्। न आत्मपदार्थानुभवाभावविषयानुभवसंबंधायोगमृत्यायोगात्। अनुभवसंबंधाभावाविशेषे चान्यत्र
आश्रयत्वानानुमानायोगादिति भावः। तर्हि विषयानुभवाश्रयतया सिद्धिरिति नेत्याह न च संवेद्यत्वेनेति। ननु संविद्विषयोपाधि
साध्यपतिन कर्मकारकमिति। ननु आश्रयत्वमुपाधिर्विषये असंभवादाश्रयविषयत्वमुपाधिरिति चेन्न किं विषयत्वं नाम। सं
वित्प्रयुक्तव्यवहारयोग्यत्वमिति चेत्तर्हि विषयः स्यादाश्रयत्वव्यतिरिक्तत्वे सति संविद्यावर्तकमिति चेन्न चक्षुषोऽपि प्रसंगो म
नाश्रयव्यतिरिक्तत्वे सतीति सत्प्रयुक्तव्यवहारयोग्यो विषयः संविदाश्रयसंबंधस्यापि विषयत्वप्रसंगात् न च संबंधो नास्तिनत्र राम:
कात्रोत चेति वक्तुं शक्यं। तस्मात्संप्रयुक्तादिवत्स्वेनावभास इति। अस्तु तर्हि आत्मविषयज्ञानान्तरादिति नेत्याह न च ज्ञानान्तरे ६५

णेति। कुतस्तज्ज्ञानांतरं विषयानुभवसमकालं वा भिन्नकालं वेद्दूषणमाह भिन्नकालत्वे इति एककालमिति चेत्तत्राह न चैककालमिति।
निरवयवस्य युगपदेकदेशे वा भिन्नदेशे वा परिणामद्वयायोगादित्यर्थः एकस्य युगपत्सामस्त्येन परिस्पंदद्वयमनुपपन्नं परिणामस्तु
संभवतीत्याशंक्याह मा भूदिति परिणामद्वयमपि हर्म्यैकान्नयुगपत्संभवतीत्याह नैवमिति। योचनस्तु विरोधः कृत्स्नशरीरवर्तित्वादिति
न च भागेन परिणामो निरवयवत्वादिति भावस्तस्मादिति परिशेषात्स्वयंप्रकाशतयाऽपरोक्षत्वोपसंहारः। अध्यस्यमाने नेंद्रियग्राह्यत्व
मधिष्ठानस्य वक्तव्यमेनापरोक्षतामात्रेणालं तत्समित्यत्राकाशो दृष्टांत इति भाष्यतात्पर्यमाहतुच्छविदिसत्रशब्दस्य वायोरेकेंद्रिय
ग्राह्यत्वोद्भूतरूपवद्द्रव्यव्यतिरेकेणोपलब्धिसंभवाद्विशेषगुणत्वे वक्तव्ये स्पर्शादिगुणचतुष्टयसहवृत्तित्वाभावाद्बाह्येंद्रियग्राह्यत्वाद्धि
कालमनसां। विशेषगुणशून्यत्वाच्च भूतचतुष्टयात्मादिगादिव्यतिरिक्तद्रव्यस्यैव विशेषगुणः शब्दस्तद्गुणश्चाकाश इति वैशेषि
कादयोऽनुमिमते वा हृद्गोकापनात्वनुपलब्धिलिंगकमूर्तद्रव्याभावमाकाशमनुमिमते। प्राभाकरास्तु स्वभावाकाशानु
पलब्धिलिंगामूर्तद्रव्याभावमात्रत्वादृश्यावातस्य च वा भावत्वात् क्षपणकवार्तिककारीयास्तु चाक्षुषमाकाशमिच्छंति तथा स
तिस्पर्शवत्त्वमपि स्यात् अस्त्विति चेत् रूपस्पर्शवत्त्वे वद्द्रव्ये चक्षुरादिप्रवृत्तिनियमात् चक्षुषः प्रसारणस्याकाशानुमानलिंग

पं.वि. ६८ दर्शनेप्यध्यासिद्धत्वात्तस्मादप्रत्यक्षेपि आकाशे इत्युक्तमथवेति साक्षिवेद्यतया मनोमात्रगम्यतया वा परोक्षत्वमित्यर्थः। इन्द्र
नीलमिव नीलमित्यर्थः एवमविरुद्धत्वस्योपदिष्टार्थः। प्रतिपन्नोपाधौ निरस्यमानमर्थमविद्यान्वयव्यतिरेकाभ्यां अवि
द्यामन्यं तदित्यर्थो न केवलमविद्यान्वयव्यतिरेकसामर्थ्याद्विद्योपादानेन पाविद्यात्वं किं तु विद्यापरिणतत्वाच्चेत्याह नादि
वकेनेति। नन्वविद्यापूर्वसंततिस्याः ज्ञानविपर्ययत्वप्रदर्शनेनाध्यासनिवृत्तिसिद्धेः किमध्यासोपवर्णनेनेति चोदयति
य एवमध्यास इति प्रक्रम्य इति पुरुषाकांक्षाया अनर्थनिवृत्तिविषयत्वादनर्थस्यैवाविद्यात्वेन ज्ञाननिवर्त्यत्वं वक्तुमिति
ति परिहरति नेत्युत्तरमिति। अनर्थस्यैवाविद्यात्मकत्वे तदाश्रये विषये वा वस्तुतस्त्विभिन्नगुणदोषाभावाद् ज्ञानेन सर्वा
नर्थनिवृत्तिः फलिष्यतीत्युक्तं त्ववचनमुत्तरभाष्यमित्याह तदेतदाह यत्र यदध्यास इत्यविद्याध्यासविषयत्वप्रयुक्तस्तावद्गु
णदोषाभावः सिद्धोऽत्राध्यासपरिणामितयाश्रयत्वप्रयुक्तगुणदोषाभावः कथ्यते कथमन्यापि विद्याध्यासस्य नित्यचैत
न्यावभासत्वात्तत्राध्यासपरिणामः कारणविलक्षणाध्यासपरिणामस्याविद्योपादानत्वाद्विद्यासंभेदात्माश्रयत्वसिद्धिरिति। राम. ६८
प्रतिज्ञातिसूत्रकारस्य ज्ञानेन बंधनिवृत्तेरर्थोत्सूत्रणमुच्यते। वृत्तसंकीर्तनपूर्वकं उत्तरभाष्यस्य तात्पर्यमाह एवं तावद्युष्मद

स्मदित्यादिनेत्यत्र प्रमातृप्रमाणप्रमेयकर्तृकर्मकार्यभोक्तृभोगभोग्यलक्षणस्य व्यवहारत्रयस्य शरीरेन्द्रियादिष्वहंममा
ध्यासपुरःसरत्वं प्रत्यक्षमिति प्रत्यक्षोपन्यासः कृतो ननु विधिप्रतिषेधपराणि शास्त्राणीत्येवमुक्तमेतन्निष्ठत्वात्सकल
शास्त्रस्य किमिदं मोक्षपराणीति तत्राह मोक्षपरत्वेनेति॥ ॥कथं पुनरित्यादिभाष्यस्याध्यासोपादानं व्यवहारमित्यमित्युक्त
प्रमाणानां तत्प्रश्नविषयत्वं दर्शयति बाढमुक्तलक्षणविपर्यासादि कथं पुनरित्याक्षेपार्थं दर्शयति प्रमाणानामाश्रयं नीत्वविद्याध्या
सपरिनिष्पन्नाहंकारासंस्पर्शिनोपादानत्वे प्रमाणानां न प्रमाण्यमेव सिध्यतीति अस्मिन्नर्थे भाष्यप्रयोजनमिति। अथवा क
थमविद्यावद्विषयाणीत्यविद्यावदुपादानत्वेऽप्रमाण्यानुपपत्तिरिति तदाह अविद्यावद्विषयत्वमुच्यते देहेन्द्रियादिष्वित्यादि
परिहारभाष्यं विभागेनावतारयति। व्यवहारान्वितयमध्यासोपादानमित्यत्रार्थं व्यतिरेकानुमानप्रदर्शनाय यत्राध्यासा
भावः संप्रतिपन्नस्तत्र व्यवहाराभावो दृष्ट इति व्यतिरेकं भाष्यार्थं दर्शयति। न हि देहेन्द्रियादिष्वित्यादिना भाष्यार्थवि
भागेनाध्यासं व्यक्तं प्रतिपत्तो देहेऽहमभिमान इत्यादिना प्रमाणान्तरप्रदर्शनाय व्यवहारत्रयमूलाध्यासप्रत्यक्षमुक्तं अन्तव
इति सर्वो हि मनुष्योऽहमित्यत्रापि प्रयोगो देवदत्तस्य जाग्रत्स्वप्नकालेषु तस्यैव कर्तुः करणभूतदेहेन्द्रियादिष्वहंममाध्यासपूर्वः

पं॰वि॰ ६७ संप्रमातृत्वादिव्यवहारवंतोनस्यैवसुषुप्तिकालादन्यकालसाध्यःकालस्तथाविधव्यवहारवान्नभवतिनसतस्यैवसुषुप्तिका
लादन्यकालोयथातस्यैवसुषुप्तिकालइति।व्यवहारनिलयंवादइति।अध्यासोपादानमंतरेणानुपपन्नमध्यासाभावेव्यवहार
दर्शनात्सुषुप्तइत्यर्थापत्तिः।ननुकर्तृकरणयोःसंबंधमात्रंव्यवहारोपेक्षतेनतादात्म्यसंबंधइति।तत्रपरिशेषानुमानार्थापत्ति
सिद्धयेसंबंधांतराणिव्यावर्त्तयति।ननावत्स्वस्वामिसंबंधइत्याहनस्वत्वेनसंबंधिनेतिसुषुप्तेपितस्यभावादिति।भृत्यःइच्छा
नुविधायित्वमेवव्यवहारनिमित्तंतदभावात्सुषुप्तेपिव्यवहारविपर्ययइतिचोदयति।अपरआह।आत्मेच्छानुविधायि
त्वमिति।अस्त्वात्मेच्छामात्रेणविनियोज्यविनियोजकसंबंधः।ततःकिमिति।तत्राह।ततआत्मनइतिनैवतत्संबंधमूलोयंव्य
वहारइतिकिमत्रप्रमाणमित्यतआह।तथाचोत्तिष्ठामीति।ननुभृत्यादयोपितदिच्छानुविधायिनस्तच्छरीरेणापिव्यवहारःस्या
दितिनेत्याह।नचभृत्यादिषुतदस्तीति।ननुयदिच्छानुविधानयोग्यतामात्रंसंबंधःसुषुप्तेपितदस्तीतितत्रापिव्यवहारःस्या
दयच्छयानुविधीयमानत्वसंबंधोसाधुरतदभावान्नप्रमातृत्वादिव्यवहारोनस्यादथरूपेणायंसंबंधोव्यवहारमूलमिति
नेत्याहनेतरस्मिन्विद्विष्टमानवतोपुरुषमितिनचगौणत्वंमुख्यानुभवविरोधादित्याह।गौणीत्यादिना।इच्छायध्यासमूलेव रामः ६७

त्याह।अपिचेच्छापिपरिणामविशेषइति।अंतःकरणाध्यासमूलेवप्रेतिप्रसक्तमाह।नथाचानुभवइति।नचात्मानात्मनोःसंयोग
तालेभ्यस्तिप्रतिपत्तारमाकांक्षमर्थवादगतं मोक्षं णत्रिसत्रन्यायेनोयसंहृत्य मोक्षकामो वेदांतवाक्यकरणे
शमादीति कर्तव्यतानुगृहीते नात्मज्ञानं कुर्यादिति ससर्वविनियोगविधिरधिकारविधिः समद्यतेः। पु
नः स एव सांगं तत्र ज्ञानमधिकारिणमनुष्ठापयन्प्रयोगविधिः संपद्यत इति पुनश्च सिद्धांती मंत्रेभ्यो

पं०टि०
९१

विहितानां वैलक्षण्यमाह ननु मंत्रेष्विति प्रत्ययपरत्वमित्यत्रापि कारिप्रत्ययमात्रे मंत्राणां तात्पर्यं स्वार्थं तथा
न इत्यर्थः तत्र वेदान्तानां स्वार्थविधिपरत्वप्रयोजनं वदन्नज्ञातार्थावगन्तृत्वादिति तत्र विधिप्रत्ययसमर्पणेन
विधिपरत्वमज्ञातार्थपरत्वं वोभयं न विरुद्धमित्याह स्वार्थमपेक्षितमिति ननु स्वाध्यायविध्यर्थानां क्रमे
ण वायुपस्थानेऽकामिकामिसंभवंति अदस्य तु नासर्यात्स स्वल्कार्यहानेः कथमुभयपरत्वमिति तत्रा
हयस्वार्थानामिति स्तिधातीब्राह्मणपाभिधानिरूपप्रथमप्रत्ययोपगमेनैव स्वरूपार्थसिद्धेन मंत्रेष्विव वि
धिशेषतया द्वितीयप्रत्यया योऽस्ति विनियोगाधिकारप्रयोगविधिकल्पनमपेक्ष्यत इति दर्शयन्नु मंत्रे
भ्यो वैलक्षण्यमाह तदेतदनिरूपितमिवेति विधिविषयसमर्पणेन विधिप्रमतिशेषस्य योऽपि दं ख्या
दिवाक्यस्य तज्जन्यज्ञानस्य वा प्रमेयपरत्वादर्शनादिति वाक्यशेषः ननु लौकिकप्रमाणाभ्यां तात्प्रमेयस्य त

परत्वात्कस्माद्वदहनु विधिब्रह्मणोरलौकिकत्वादुभयपरत्वं स्यादिति नेत्याह न युगपदुभयमिति ज्ञानं प्रति ब्रह्मणः प्रा
यतया प्राधान्यं विधेर्ज्ञानविशेषणतया गुणभावः प्रमेयत्वादुपादेयता विधिप्रतिपत्त्युद्देश्यता प्रमेयत्वाद्विधेयता वि
धानायानुवाद्यतो वेति ब्रह्मणः स्वज्ञानस्य च विधिविषयतया ताप्रमिति शेषत्वे च प्राधान्ये पादेयत्व प्रमेयत्वानित
द्विरुद्धगुणत्वोद्देश्यत्वानुवाद्यत्वानि चैकस्याः शब्दजन्यप्रमितौ प्रसज्यंते तदिदं वैरूप्यं ननु प्रथमज्ञानमर्थ
रं द्वितीयज्ञानविधिविषयतया तत्परमित्यविरोधः किं न स्यात् न शाब्दस्योभयपरत्वाभावेन तज्जन्यज्ञानस्य
सत्त्वजनितस्याप्युभयपरत्वानुपपत्तेर्ननु वैरूप्यप्रसंगो न दोषमावहत्यन्यथा गुणकर्मविधौ नानुपपत्तेरि
ति चोदयति नन्वेवं सति गुणकर्मणामिति क्रत्वंगभूतकारकसंस्कारार्थानि कर्माणि गुणकर्माणि त
त्र क्रियाजन्यातिशयविशिष्टकर्मैव कर्मकारकं कारकविभक्त्यविधेयमित्संगीकृत्य सवैरूप्यमुच्यते प्री

पं०वि०
९१

हीणां तावत्प्रमाणांतरसिद्धत्वात्कारकत्वाच्चानुवाद्यत्वगुणत्वोद्देश्यत्वानि सिद्धानि विधेयप्रोक्षणजन्यातिशयवत्तय
साध्यत्वादुपादेयत्वप्राधान्यविधेयत्वानि विभक्तिसामर्थ्यात्प्रतीयंते इत्येकस्याप्रमितो गुणकर्मसु वैरूप्यमिति न च न
क्रियाजन्यातिशयो विभक्तिकः किंतु तदर्थक्रियाविध्यनुपपत्तिगम्यः ततः आत्मज्ञाने गुणत्वोद्देश्यत्वानुवाद्यत्वा
न्येव प्रतीयंते प्राधान्यप्रमेयत्वोपादेयत्वानि त्वर्थाप्रतिप्रमितत्वान्तरावभासं तदिति ज्ञानमेदात्मैवैरूप्यदोष इति परि
हरति न निराकृतं स्यादिति इहापि तर्हि ब्रह्मज्ञानविधेयज्ञानयोर्भेदाद्विरुद्धत्रिकस्य व्यवस्थयावभास इ
तिनेत्याह यत्र पुनः प्रमाणांतरादिति नन्विहापि ज्ञानद्वयमेवेष्यतां कस्तत्र सामग्रीभेदो न चैकसामग्रीजन्य
ज्ञानसहस्रेयस्यापि प्रमेयभेदः संभवति अस्तु तर्हि विधायकपदव्यतिरिक्तपदसमुदायस्य पृथगेव ब्रह्मस्वरूप
प्रतिपाद्य पुनस्तदनुवादज्ञानं जनयित्वा तस्य विधिविषयत्वसमर्पणेन पुनर्विधायकपदेन पदैकवाक्यतेति नेत्या ९१

ह न सम्यक्समन्वयादिति ननु तर्हि विधिपदैरन्यानि पदैकवाक्यभूतानि तद्व्यतिरिक्तपदानां पृथगन्वयेन ब्रह्मप्रतिपत्तिशेष
त्वात्तां कृतेऽर्थवादपदानामिवैतेषां तर्हि न ब्रह्मवाक्यस्य विधिवाक्यशेषताया अप्यर्थवादत्वेत्याह तद्वस्तुकमर्थवादपद
नामिति नन्विहापि भूतार्थवादार्थवादजन्यज्ञानवद्विधिशेषतेति नेत्याह हे पुनरापरामृष्टेति प्रयोजनपर्यन्तत्वाय विधि
शेषतानभ्युपगमनिमित्तमिति भावः यद्यपि शाब्दज्ञानाद्ग्रहणं निवर्त्तते तथापि मिथ्याज्ञानतत्संस्काराविद्यानिवृत्ति
रूपराक्षादनुभवान्तस्य च शाब्दज्ञानादनुत्पद्यमानफलस्य सिद्ध्यै ज्ञानं विधीयत इत्याशंक्य तेथ पुनः शाब्दज्ञानादि
ति तर्हि विधीयमानज्ञानस्य ब्रीह्यादिवत्कारणकारकं वक्तव्यं तन्न संभवतीत्याह कितज्ज्ञानमिति ननु प्रत्यक्षादी
नामपरोक्षज्ञानसाधनत्वप्रसिद्धमितिनेत्याह प्रत्यक्षादीनामिति ननु शाब्दकारणमिति नापूर्वज्ञानवद्वा फलत्व
त्वप्रसिद्ध्यादित्याह सिद्धमितिनेत्याह शाब्दमेति ननु विधीयमानं शाब्दं ज्ञानमनुभवं फलिष्यति न केवलामित्याशंक्य

पं०वि०
१२

तिसत्यंनश्रावणज्ञानमिति किंतज्ज्ञानंविधीयमानंतथापरोक्षफलंप्राथमिकंज्ञानंतत्संतानोवानतावत्प्राथमिकमित्याहत
द्युक्तंयतावदिस्मभयपरत्वेवैरूप्यस्यदर्शितत्वादितिवाक्यशेषः ननुप्रथमज्ञानेनावगतेब्रह्मणितदुद्देशेनप्रत्ययसं
ताने विधीयतांतत्संस्काराच्चयाद्वापरोक्ष्यसिद्धिरिति शंकतेअथपुनस्तदेवज्ञानमिति किमुपासनविधिसामर्थ्यादिद
मवगमतं किंवात्मन्येवात्मानंपश्येदितिदर्शनविधिसामार्थ्यादिति नतावदुपासनेविधिःश्रूयतआत्मेत्येवोपासीत
आत्मानमेवलोकमुपासीततमेवधीरोविज्ञायेपादेःस्वभावसिद्धप्रसयोपादानेनालौकिकात्मविषयप्रतिपादनपरत्वा
देवकारविशेषणश्रवणात्वाक्यस्यविशेषणपरत्वादुभयप्रतिपादनेवाक्यभेदाविदिध्यासितव्यइतिचात्मप्रतिपाद
नेवाक्येवाक्यभेदाभावायस्कृतिपरत्वाद्दर्शनविधिसामर्थ्यादितिनेत्याहतत्कथंलभ्यतेउपास्तिध्यायत्यादेति १२
ननुज्ञानस्यसर्वत्रप्रवाहेणाविनाभावात्ज्ञानविधानेनसंतानविधिर्लक्षितइति नेत्याहनापिज्ञानेनैवंति अथा

पिकथंविदुपासनविधानंकल्प्येतनिदिध्यासनविधेःतथाप्यपरोक्षफलस्याहेतुत्वादुपासनस्यनशास्त्रज्ञानाविशेष
इत्याह नाप्यभ्यासादित्यभ्यासस्याप्रमाणत्वाद्विषयस्यासंयुक्तत्वाच्चनवस्त्वापरोक्ष्यमभ्यासात्किंतुमिथ्यापरोक्ष्य
मित्यर्थः ननुततस्तुतंपश्यतेनिष्कलंध्यायमानइतिध्यानमपरोक्षफलंश्रूयते सत्यमेकत्रवृत्तिस्यसमवधानतात्
दैकाग्र्यमितिमित्तंभवति तदेकाग्रचेतसासहकारिणाशब्देनवोपनिषदमितितद्धितत्वस्ययसामर्थ्यादपरोक्ष्य
ज्ञानमुत्पादयतिध्यायमानोज्ञानप्रसादेनपश्यतीतिवाक्यस्यान्यत्राचित्तैकाग्र्यस्यसूक्ष्मवस्तुदर्शननिमित्तत्वा
दृष्टेनैवोपकारसिद्धावदृष्टकल्पनायोगात् आपरोक्ष्यकामस्योपासनायांस्वयंप्रवृत्तेरदृष्टार्थत्वानिदिध्यासन
विधानस्याप्युक्तंतदेतदाहनापिश्रूयतइतिदृष्टसामर्थ्यानुवादत्वाद्वाक्यस्यविधिर्नश्रूयतइत्यर्थः नन्वैकाग्र्यद्वारेणा
परोक्ष्यनिमित्तत्वाददृष्टद्वारेणापिप्रवर्तेतामितिवादयति ननुकिमत्रश्रवणेनेति परिहारग्रंथः स्पष्टार्थतोज्ञानाद्या

भावादेकस्य ज्ञानस्योभयार्थतायोगात्र ब्रह्मत्वानं विधेयमिति भावः यत्तु नरिति सप्तदशार्थेन स्वापि वस्तुदृष्टान्तेन तात्पर्योक्तोप
त्शब्दव्यापात्तिरूपमीयद्दत्याहयुक्तं तत्रेति ननु समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यज
तीति यंचवाक्यानि पंचपदार्थान्विधायतेषां क्रममपि विदधति अतः शब्दस्यैव द्वैयर्थ्यमित्युक्तं न तु वदतीत्यदपीदमुक्त
मिति पदार्था एव शब्दगम्याः क्रमस्त्वर्थापत्तिगम्यो न शब्दगम्य इति परिहरति यत्तावदाशु सेकमिति येताव
दित्यर्थः तेषामेव न क्रमस्य विधानमित्यध्याहारः किं पदार्थेभ्यो र्थान्तरभूतस्य क्रमस्य वाक्यैः प्रतिपादनमुच्यते किं
वा पदार्थमात्रस्यैव क्रमस्य प्रतिपादनमिति न तावदुत्तरः कल्प इत्याह नापि क्रमशब्दाभिधेय इति ननु विहितमंगं
भवत्यंगं च प्रयुक्ते प्रयोगविधिरतः प्रयोगवचनप्रयोजनत्वात् क्रमस्यापि विधेयत्वेवाक्यैरन्यथापदार्थस्यापि क्रमस्यावि ९३
विरोधेव्य इति नेत्याह प्रयोगवचनोपीति विहितस्य प्रयोज्यत्वात् पदार्थानामेव विहितत्वादित्यर्थः अन्यथाविहिते

प्रयोगविधिः प्रयोगविधौ च विधिकल्पनेति तदेन राश्रवान्ननु पदार्था एव क्रमः तस्मात् पदार्थान्प्रयुंजानः क्रममपि प्रयु
क्त इति नेत्याह तेते क्रम इत्युक्तमिति अपर आह न क्रमो नाम कश्चिदस्ति कैश्चित् कस्मिन्पदार्थे द्वितीनादने कपदार्था
श्रयत्वे पदार्थायोगपद्यात् क्रमायोगाद्यौगपद्ये चोभयाश्रय धर्मायोगादिति तत्राह न च क्रमो नामेति ननु संयोगवद्
भयाश्रयधर्मी योगादिति त्वे पदार्थयौगपद्यमित्युक्तं तत्राह क्रमो नाम वस्तुभूत इति क्रमत्वादेव न यौगपद्यापेक्षेति
भावः ननु देशकालवस्तून्याधियरामशमन्तरेण क्रमो न दृश्यत इति तत्राह तदेवेति ननु न्वनुष्ठेयपदार्थानामिति
ष्यं च स्वभाव चान्न देशकालवस्तु क्रम इति तत्राह स्मृति विज्ञानमेवेति पाठक्रम एव स्मर्यमाणेनुष्ठेयपदार्थेषूपस्य
त इत्यर्थः सर्वार्थस्योपसंहारः ननु क्रमस्य विधायकं वक्तव्यं न क्रमस्याविधेयत्वात् किं तत्र नु रूपविशेषण तया प्रमीयते
क्रमो न विधीयते ननु ष्टेयत्वाच्चक्रमेत हि प्रमीयते एकस्यानेकपदार्थप्रयोगानुपपत्तेरित्याह तच्चैकत्वात्कर्तुरिति

संन्निहितं चेत्यर्थः क्रमाभावेपि पारक्रम इत्यर्थस्तस्मात्सर्वत्र प्रमाणद्वयेनैव प्रमेयद्वयसिद्धिरिति प्रकारमार्थे नतथेह ज्ञा
नद्वयमित्याशयेनैवोद्घेगमयतीति पर्यंतः स्यशर्थः प्रतिवस्तु संप्रयोगान्निरपेक्षमेव प्रमाणं चक्षुर्न तथा प्रतिपदार्थं प्रमाणं
शब्दः किंतु पत्रता सर्यंत त्वासंग्येव प्रमाणमित्याह उक्तं तत्र यद्यदेव बोधयतीति नत्वाभिधानेक्रमात्मा तत्व ज्ञानं
प्रमेयपरमेव मा भूत् किंतु विधिविषयतया विधायकपदजन्यविधिप्रमितिविषयत्वेन विधिशेष इत्याह ह्रमाभूदिति
कथं तर्हि ब्रह्मा● त्मसिद्धिरिति तत्राह तस्मिन्विहिते र्थादिति ननु ब्रह्मण्यानुपपत्त्या तत्व सिद्धिरिति तत्राह स्वविषयता
दित्यवगमविध्यन्यथानुपपत्त्यैवेत्यर्थः परिहरत्येवमप्यविवक्षितोऽर्थ इत्येकस्मिन्विषये प्रथमप्रतिपत्तिरप्रमाणं तस्मिन्ने
व द्वितीयज्ञानं प्रमाणमिति श्रुतिश्च न प्रमाणं श्रुत्यर्थाप्रतिश्च प्रमाणमित्यादिविरुद्धमित्यर्थः किं वागमविधानानुपपत्ति ९४
नागम्यस्य वस्तुत्वं गमयतीत्याह न चानियोगत इति ननु ज्ञानस्य स्वतःप्रमाण्यं तथाभूतार्थत्वे न युक्ता। ऽन्यथाऽपि

तज्ज्ञानस्य विधेः प्रयोजनाभावादिति तत्राह भवंति हि परिकल्पिते न विषय इत्याभिधानिकप्रत्ययस्य विधि
संसर्गो स्वगापि स्वतःप्रामाण्यं किं न स्यादिति भावः ननु विधेयज्ञानस्यापि स्वविषयप्रमितिरेव दृष्टफलं न तत्परि
त्यागेऽपि न विषयत्वे दृष्टफलं नास्यादिति तत्राह तद्देवाद्ययुक्तमिति सकलप्रमाणविरोधेन दृष्टफलनादृष्ट
फलत्वनमेवयुक्तमित्यर्थः तस्मात्कार्यं निश्चेद इत्यनारंभवाग्वादी सिद्धांतेकदेशीयदूषणमुपसंहरति ननु
वेदांतानां धर्मब्रह्मविषयत्वाभावे ध्ययनविध्युपात्तानामानर्थक्यं स्यादिति नेत्याहेवंवेसत्यपमात्मात्रस्येत्या
दिना तत्रात्मनो वेदांतसंकीर्तितसमस्तगुणविशिष्टस्योपासनोत्पत्तिविधौ शमादिस्वैकर्तव्योपसंहा
रेण विनियोग विधौ मोक्षकामनियोज्यसंबंधितया स्वाधिकारविधौ सांगे कर्मण्यधिकारिणानुष्ठाप
कतया च प्रयोगविधौ वेदांताः पर्यवस्यंति तच्च सर्वं निरूपितमिति अन्ये तु किं शास्त्राणां कार्यान्वितस्वार्थ

पं॰ वि॰ ९५

वबोधसामर्थ्यात्सर्वे विदः कार्यपरतया निरूपितइत्युच्यते किंवा सूत्रकारण्यभियुक्तवचनसामर्थ्यादिति नि
नाद्यस्तथमः कल्पः समन्वयसूत्रेतस्य निराकरिष्यमाणत्वात् अभियुक्तवचनसामर्थ्याच्चेतत्राह स्यादेतदेवं
यदि सर्वस्यैव वेदस्यार्थइति ननु धर्मस्यैवोपकारकत्वेपि प्रासंगीकत्वेनेदं ब्रह्मनिरूपमिति नेत्याहाविचारितेत्यै
ति कथगम्यतेन वेदार्थोपाधो विचारः प्रवृत्तिइति सूत्रभाष्यवार्त्तिककारवचनसामर्थ्यादिसाह यावनाका
र्यनिष्ठत्वेति अत्रायमाशयः। अथातो धर्मजिज्ञासा धर्ममीमांसाशास्त्रं विषयस्तत्किमारंभणीयं नेति
विचारोनारंभणीयमिति पूर्वपक्षः विचार्यमाणार्थनिर्णये तेयेप्रसाक्षादिनामसाधनत्वात् आम्नायस्य
काध्ययनविधिनादृष्टार्थतया विनियोगात् तदर्थमध्ययनविधिरदृष्टार्थोदृष्टार्थोवेति विचार्यतादृष्टसाधनेवि ९५
रयोगादृष्टनियमाद्विधिरदृष्टार्थइतिप्राप्ते ननु स्वाध्यायोध्ययनक्रियाकर्मतयावगम्यमानः संस्कार्यस्वाध्यायेति द

ष्टसंभवे कथमदृष्टार्थता संभवेत् संस्कृतस्य कर्मांतरे विनियोजकप्रमाणाभावात् अत्र तस्य च निष्फलत्वात् नन्वव
गादाम्नायास्य फलवदर्थावबोधे दृष्टफलेनादृष्टं कल्पयितुं शक्यते न दृष्टफलसाधनेप्यत एव प्रवृत्तेर्विधिवैयर्थ्यप्रसं
गात् ननु कर्मकारकप्रधानस्याध्ययनस्य कथं स्वततादृष्टफलत्वं कल्प्येत नानु कर्मकारकस्यैव फला संक्रतुन्यायेन स्वाध्या
येनाधीयीतेति वैपरीत्यकल्पनत्वात् ननु न श्रूयते फलमध्ययनस्यार्थविदेपि तत्रा जपाध्ययनस्य फलस्य शतक्रतुन्या
येन स्वाध्यायत्वादरध्ययनत्वसामान्येन प्रथमाध्ययनेप्यतिदिश्यरात्रिसत्रन्यायेन फलकल्पनादि कर्मस्वाध्यायेनाधी
यीतेति फलविपरीणामात् संस्कारकर्मत्वाभावाच्च न फलश्रुतेरर्थवादत्वा नन्वदृष्टार्थेपि स्वाभाविकस्यार्थावबोधस्या
मर्थ्यस्य काहानिः न विधिविरहेणादि कार्यांतरे विनियुक्तानां मंत्राणामर्थविवक्षाप्रतिबंधदर्शनात् तस्माद्दाष
यस्यार्थविवक्षाभावात् प्रत्यक्षाद्य विषयत्वाच्च प्रमाणानुग्राहकत्वाच्च विचारस्य निरालंबनो धर्मविचारोनारभ्य

।मं०वि०
९६

यइति प्राप्ते आरंभणीयश्चायं विचार इति सिद्धांतः तस्य स्वाध्यायाध्ययनविधिप्रमितकर्तव्यता ननु निरालंबन
त्वमुक्तं आम्नायस्यालंबनत्वात् न च दृष्टार्थो सोऽध्ययनस्य कर्मकारकप्रधानत्वात् स्वतंत्रादृष्टार्थत्वायोगात् ननु कर्म
कारकेन किंचित्प्रयोजनमस्तीत्युक्तं ननु उभयस्याप्युपपत्तेः अध्ययनेन दृष्टद्वारेणाप्यते सांगाध्ययनविधिसा
मर्थ्यात्संस्क्रियते च स्वाध्याय इति ननु संस्कृतस्य विनियोगाभावयुक्तः। नाक्रतुविध्यर्थहितप्रमाणादेव विनि
योगसिद्धेः। क्रतुविधिर्हि स्वविषयावबोधमाकांक्षमाणस्तस्य जनकतया संस्कृतं स्वाध्यायमुपादत्ते ननुपाद
नप्रमाणं ज्ञानस्य जनकतया संस्कृतं स्वाध्यायमात्रमात्तेन संस्कारमिति सत्यमध्ययनविधिसामर्थ्यादेव सं
स्कृतं स्वाध्यायजन्यविशिष्टज्ञानवत्तेवानुष्ठितो यागोऽपूर्वं जनयतीति कल्प्यते अतः स्वाध्ययविधिसामर्थ्यवांक्षमा ९६
णक्रतुविधिः स्वविषयज्ञानजनकतया संस्कृतं स्वाध्यायमुपादत्ते ननु स्वतंत्रादृष्टं कल्प्यतामित्युक्तं न दृष्टार

स्वीकरणतज्जन्यज्ञानादिसमवाय्यदृष्टसंपत्तौ श्रुतिविरोधेन कारकत्वैपरीत्यमदायस्वतंत्रादृष्टकल्पनानुप
पत्तेः आधानवदंगस्याप्यधनस्य क्रतूपकारित्वेन विरुध्यते ननु तव्यप्रत्ययेन संस्कृत्यर्थापरोक्तमपूर्वमेव स्वतंत्र
मभिधीयते न त्वपूर्वाभिधानेऽपि भिन्नपदोपात्तसंस्कृत्यर्थपरक्तापूर्वाभिधानाद्वरमेकपदोपात्तकर्मकारकगतापू
र्वाभिधानं भावार्थजन्यमपूर्वं नद्व्यादिजन्यमित्येतावत्तत्समवायस्त्वन्यत्रापि संभवति अदृष्टार्थतपा च स्वा
ध्यायस्यार्थविवक्षाभावे धयनविधिवाक्यस्याप्यर्थाविवक्षाभावात् अदृष्टार्थतयाध्ययनविधानमेवेन स्यात् न
स्मात्सांगाध्ययनविधिप्रयुक्तादृष्टस्वसमवायितयाक्षरग्रहणार्थबोधक्रतुप्रत्यादिदृष्टफलसापेक्षत्वात् स्वा
ध्यायस्य स्वभावतनिमित्तार्थावबोधप्रतिबंधकताभावाद्विवक्षितार्थमाम्नायमवलंब्य धर्मविचारः कर्तव्य
इति तदेवमेर्थविवक्षाधर्मविचाराप्रसरप्रदर्शनपरेणारंभेण सर्ववेदार्थविचारसिद्धिरिति प्रारम्यमा

पं०वि०

९७

णाविचारो धर्मविषयो न वेदार्थमात्रविषय इत्युपपादयति तथा च शास्त्रारंभ इति ननु वेदवाक्यानि विचारये
दित्यादिभाष्यलिंगाद्वेदार्थमात्रविचारारंभोवगम्यत इति शंकते कथमिति सामान्यसिद्धिविशेषविप्रतिपत्योर्भा
ष्याकारेण धर्मप्रदर्शितत्वात् एव विचारत इत्याह धर्मानायकाश्चित्साधयितुरिति एवं विषयविप्रतिपत्ति
दर्शयित्वा धर्मविषय एव पूर्वपक्षप्राप्तिदर्शिनीत्याह तत्राग्निहोत्रादिलक्षण एवेति नकारः पूर्वापरयोः
संबध्यते एवमाशंकित इत्यंतः प्राकृतो ग्रंथः स्पष्टार्थः एवमाशंकिते शास्त्रारंभे सिद्धांतसूत्रं तत्प्रतिपा
द्यार्थकथने नावतारयति धर्माद्ययं वेदवाक्यानीति तस्याम्नायस्यार्थविवक्षा तस्यैव विचारावसरश्चेति तद
र्थविवक्षा विचारावसरौ विवक्षाविचारौ सूत्रार्थसूत्रयोजनया दर्शयति वेदमधीत्यानंतरमिति ततः कि ९७
मायातमित्यत आह एवं स्थित इति किं तत्र विवक्षितं गम्यत इति तदाह किंतु धर्मातिरिक्त इति अयम

र्थः वेदस्यार्थविवक्षाप्रदर्शनेन वेदार्थविचारः कर्तव्य इति वक्तव्ये धर्मग्रहणं कुर्वन्नाभूत्सर्ववेदार्थविचारप्रति
किंत्वेकदेशविचारोयमिति मन्यते सूत्रकार इति गम्यत नन्वथातः शब्दाभ्यां स्वाध्यायस्य पूर्वनिर्वृत्ततया वि
चारहेतुत्वमुच्यते स्वाध्यायो हि स्वार्थविचारहेतुर्भवति न धर्मविचारहेतुः अतोऽथातःशब्दविरोधान्न ध
र्मविचारः प्रतिज्ञातुं शक्यत इति चोदयति तत्कथं यत्तावदिदमिति सामान्यविशेषाभ्यां विचार्यमाणप्रधाना
निधायि धर्मपदग्रहणसामर्थ्यात्तस्यैव विप्रतिपत्त्या पुरुषार्थसाधनतया च जिज्ञासितत्वात् सामान्यप्रति
पादनात्प्राग्वेदार्थे सामान्यप्रतिपत्तिविशेषविप्रतिपत्त्या तु पुरुषार्थसाधनत्वादीनामनवगमाज्जिज्ञासितत
त्वयोगात् धर्म एव विचार्यत इत्याह उच्यते धर्मो नामेत्यादिना तत्र धर्मजिज्ञासासायोग्यत्वप्रदर्शनेन वेदार्थेन तद्
भावं विवक्षति लोकप्रवादादिति ननु धर्मविचारे स्वाध्यायस्य पूर्वनिर्वृत्ततया हेतुत्वमर्थमविवक्षायाः प्रदर्शि

पू०वि०
९८

नेत्यनुपयोगीत्युक्तं सत्यं अग्निहोत्रादिरपि धर्मस्कंधत्वादेवगत्या ह्यग्निहोत्रादिरपि वेदार्थ इति यत इति वप्रति
पत्तिस्कंधत्वादित्यर्थः तेन विवक्षितो सौ स्वाध्याय इति प्रदर्शनीयमित्यर्थः ननु पुरुषार्थत्वाच्चेद्धर्मविचारो ध्यय
नेनैव तन्निषेधः किं धर्मेति विचारेणेत्यत आह तत्राध्ययनमात्रादिति अतो नाथातः शब्दविरोध इत्यत आह अतोध्य
यनानंतरमिति किंच धर्मशब्दस्य प्रधानत्वादथातः शब्दविरोधेपि धर्मविचारस्य वयुक्त इत्यत आह इति वादिनं प्र
तिग्रहणं युक्तमिति पुरुषो हि धर्ममेव जिज्ञासते न वेदार्थं तस्यापि धर्मप्रयुक्तत्वादुपादानस्येत्यत आह यतो न वे
दार्थमिति सामान्यग्रहणविशेषविप्रतिपत्तिपुरुषार्थसाधनत्वधर्मशब्दग्रहणो धर्मविचारपरं प्रथमसू
त्रमित्युक्तं द्वितीयमपीयसूत्रं तथैवेत्यत आह पुनरपि धर्मस्येति धर्मलक्षणपरं सूत्रमर्थात्प्रमाणप्रतिज्ञेति भा ९८
भाकराः मुखतः प्रमाणप्रतिज्ञार्थं धर्मलक्षणत्वमिति वार्तिककरीयाः सर्वथा प्युभयं विवक्षितमिति नत्वे

दग्रहणे प्राप्ते सर्वविदो धर्मविषयो मा भूदिति चोदनाग्रहणमिति गम्यत इत्यत आह तल्लक्षणमिति ननु चोदना
ग्रहणं सर्वविदस्य धर्मे प्रामाण्यं परिहाराय न भवति किं त्वन्यदेव प्रयोजनमित्यत आह अत चोदनाग्रहणेस्येति
अयमर्थः लिङादिशब्दव्यापारपुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभाव्यनिश्चयस्थानकरणकः
स्तुतिनिंदार्थवादादिज्ञानेतिकर्तव्यताको लिङादेशब्देनाख्यातत्वसमान्यादर्थभावनाभिधायिनापि
लिङ्गविशेषेणाभिधीयमानः शब्दभावनेति कथ्यते शब्दरूपप्रदर्शितां ज्ञानयति। शेष शब्दभावना शब्द
गुणोवा वर्सेत्र हि करणमिति कर्तव्यतानुग्रहीतं भाव्यनिरत्निद्वारेणैव भावनां प्रति करणं भवतीति तत्र शब्द
भावनाविषयत्वानं लिङादिशब्दजन्यप्रवर्तकज्ञानत्वात् स्तुत्यादिज्ञानानुग्रहीतं पुरुषप्रवृत्तिनिर्वृति
रनुरितिभाव्यनिर्वृत्तिद्वारेण शब्दभावनां प्रतिकरणमभित्युच्यते साच शब्दभावना पुरुषप्रवृत्तिमु

पं०वि०
९९

त्पादयंतीत्यस्यापुरुषार्थविषयत्वमंतरेणेनोत्पादयितुं स्वमते पुरुषार्थपुरुषस्याप्रवृत्तेस्तत्रश्चोदनाप्रयुक्त
पुरुषप्रवृत्तेः समानपदोपात्तमपुरुषार्थं धात्वर्थं भाव्यं विहाय पुरुषविशेषणमपि स्वर्गादिकं भाव्यत्वेनो
पादाय धात्वर्थकरणिकाप्रयाजादीतिकर्तव्यताका स्वर्गादिभाव्यनिष्ठा पुरुषप्रवृत्तिरर्थभावना संपद्य
ते तदेवं विध्यर्थभावनानिष्पत्तये शाब्दभावनायाः प्रवर्त्तकत्वद्योतनाय चोदनाग्रहणमिति ननु स्वारभ
ध्ययनविधिरित्यादिपरिहारः तस्यायमर्थः स्वाध्यायोध्येतव्य इति तव्यप्रत्ययव्यापारः शाब्दभावना अध्यय
ने पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यनिष्ठा स्वविषयप्रवर्त्तकत्वज्ञानकरणिका अध्ययनफलार्थवादादिति
ज्ञानेतिकर्त्तव्यताका भवति सा च पुरुषप्रवृत्तिलक्षणामर्थभावनामध्ययनकरणिकां स्वाध्यायभाव्यनि
ष्ठामुखत्वादिति कर्त्तव्यताकामुत्पादयति सा च भाव्यस्य स्वाध्यायस्य फलवदर्थज्ञानजनननिमित्तत्व ९९

मंतरेणार्थभावनामुत्पादयितुमसमर्था स्वाध्यायगतत्वलिंगादिशब्दाभिधेयक्रतुभावनानां स्वर्गादिविषयत्वं
परंपरया कल्प्यादिति तदध्ययनविधिसामर्थ्यादिवेदस्य विधिशिष्टफलविषयभावनानां प्रतिपादकत्वसि
द्धं अतो वेदग्रहणेनैव भावनानां धात्वर्थं विहाय स्वर्गाद्यालंबनत्वं सिध्यतीति अपि च चोदनाग्रहणे वे
दांतानामर्थांतरपरत्वशंका स्यात्तन्निवृत्तये वेदग्रहणमेव युक्तमित्याह अपि च वेदग्रहणमेवेति संदेहां
तरमाह चोदनाग्रहणेपीति ननु वेदाध्ययनानंतरं धर्मविचारं प्रतिज्ञाय चोदनालक्षण इति ब्रुवन् वैदिक
चोदनामेव ब्रवीति न तत्र विशेषाभावात् अनेन च सूत्रेण तत्रापि सर्वचोदनावचनं तर्हि किं न स्यात् प्रकां
णांतरेण वैदिकचोदनानियममाहाथवेदाधिकरणादिति लक्षणंसूत्रे प्राप्तं वेदग्रहणं विहायान्यत्र तु व
त्बुद्धिपूर्वा कारिस्यादिति परिहरति सोयमाभारणक इति अतो वेदांतानां धर्मपरत्वमित्याह यदुदा

पं०वि०
१००

सायचोदनाग्रहणमित्याहाश्चोदनाग्रहणादिति तस्मात्सूत्रभाष्यवार्त्तिककाराभिप्रायेणब्रह्मपरत्वमेवनर्थ
पिरत्वमित्याहतस्त्वेवंसूत्रकारइति ननूक्तेषामेवत्वस्तस्यवेदस्याधर्मेविनियोजकवचनमस्तीत्याह नन्विद
हितस्यार्थइति सत्यंधर्मचोदनासूत्रप्रक्रमसामर्थ्यादुक्तंसामान्यवचनप्रयुक्तेविशेषउपसंक्रियतइत्याह
सत्यंतत्प्रक्रमवत्वादिति सामान्येनपरिहारमभिधायप्रत्येकमाहापिवदष्टोहितेति नन्वाम्नायशब्देनसक
लवेदस्यधर्मवबोधेयविनियोगःस्पष्टइतिचोदयतिकर्ममिति नविनियोगकत्वपरंभाष्यंकिंत्वाम्नाय
स्यार्थसिद्धवपरंपथास्वंप्रत्यक्षमित्युक्तेनसंवप्रत्यक्षस्यरूपेविनियोगःकिंनुरूपस्यप्रत्यक्षान्वयमात्रंकथ
नितद्वदितिपरिहरतिवेदाध्ययनानंतरमित्यादिना अयोगव्यवच्छेदइतिवेदस्यकर्मावबोधनासंबंध १००
निराकृत्यसंबंधःप्रतियावतइति नान्ययोगव्यवच्छेदइतिवेदस्यार्थांतरसंबंधोनास्तीतिनाभिधीयतइत्य

र्थःननूक्तकर्मशब्दःप्रमेयमात्रपरयाधर्मब्रह्मणोरविशेषःकिंनस्यादितिनेत्याहकर्मशब्देनचेतिक्रियायांविषय
मेवचप्रसिद्धस्यशब्दस्यकुतःक्रियापरत्वमितिप्रकरणादित्याह यतस्तदववोधेति तस्मादित्यस्यसंहारःय
त्सनरित्युक्तानुवादः आनर्थक्यशब्देनाभिधेयाभावःप्रयोजनाभावोवाभिधीयतेननावदभिधेयाभावइत्य
ह तत्रायद्यानर्थक्यमर्थाभावइत्यादिनाथेतिनिःप्रयोजनत्वमनूद्यदूषणमाह भवत्वनुसारोदितीति ननु
तेषामपिपूषाप्रपिष्टभागइत्यादिसंसर्गविवक्षयोजनंकल्प्यतामितिनेत्याह रूपकचाकत्वादिति ननुध
स्ताश्चमिधंधारयन्ननुद्रवेत्नुपरिहिदेवेभ्यइत्यपरिधारणस्यापूर्वेणेकवाक्यस्यविधानवत्सप्रयोजनोवि
धिकल्प्यतामितिनेत्याह कल्पायितुंचाशक्यत्वादिति वेदांतवाक्यान्ययितर्हिप्रयोजनशून्यस्तत्राया
स्तत्रमित्याह अथःक्रियार्थानीतिनेत्याहयानिपुनरपस्तात्शेषाशिवमितिअतःसूत्रंक्रियाप्रकरणयदि

तवाक्यविषयस्वयमपुरुषार्थत्वादिति क्रियाप्रकरणपठितानामेवप्रयोजन्यश्रुत्याभांस्त्वावकत्वेनक्रिय
चयोदर्शितोनवेदांतानामित्यत्रलिंगमाह तथाचतद्विधान्येवेति नेवेदांतवाक्यंकिंचिदर्थवादाधिकरणे
क्रियाशेषत्वेनोदाहृतमस्तीत्यर्थः यदपि केचिदितिप्रभाकरणाशास्त्रारंभप्रकारं दर्शयति अयमाशयः अ
ध्ययनविधिर्हि विचारं विदधातिस च स्वाध्यायस्यफलपर्यंततामाकांक्षन्वेदार्थविचारमेव विदध्यान्न धर्म
विचारमिति ननुसामान्यप्रतिपत्तिविशेषविप्रतिपत्तिभ्यां जिज्ञासितोर्थो विचारमर्हतिनतथावेदार्थइतिन
न्वाहकिंतर्हि अधीतवेदस्येति उद्भिदायजेतपशुकामइत्यत्रपशुकामामुद्दिश्ययागोविधीयतेयागविधानंवो
द्दिश्यपशुकामाधिकारः किंवोभयमिति तथासत्रेयजमानाः स्वर्त्विजइति पजमानानुद्दिश्य शालस्यावोवि १०१
धीयते किंवर्त्विजउद्दिश्ययजमानोभावोविधीयतइत्यादिवचनव्यक्तिसंशयादिचारइति अथातोधर्मजि

ज्ञासावेदार्थविचारोविषयः सकर्त्तव्योनवेति विशयः नेतितावत्प्राप्तं आलंबनप्रमाणाभावात् नचाम्नाया
वलेविचारोवनस्यात् नअध्ययनविधिशेषतयाम्नायस्यस्वार्थविवक्षाभावात्कथं अध्ययनंतावदध्यायन
विधिप्रयुक्तानुष्ठानत्वात्तद्धर्मतामश्नुतेस्वाध्यायोपयनंनिरत्तिपरोविषनिर्हरणादिवाक्यवन्नस्वार्थविव
क्षामर्हतीति केचित् अन्येतुस्वाध्यायविधिवाक्येनव्यवहृत्ययेनापूर्वस्यप्रतियादनान्तदंगतावत्स्वाध्यायस्याधि
गतानंत्रविहिताध्ययनस्यप्रयोजकत्वात् अध्यायनप्रथमविधेः वगतामपूर्वांगतामनयास्तस्यैवाध्ययतेनाध्य
यनंनिर्दृश्यतइतितत्तश्चापूर्वांगत्वादविवक्षितार्थत्वाद्विचारानारंभः प्राप्तः तत्रारंभणीयोविचारः स्वाध्यायस्य
विवक्षितार्थत्वात् नत्वध्ययनविधिशेषः स्वाध्यायइत्युक्तं नप्रयुक्तिमात्रेणांगत्वानुपपत्तेः नह्याधानमुत्तर
क्रतुप्रयुक्तमात्रात् तदंगंभवति ननुलिंगसरव्याप्रयाजादीक्रतु विधिप्रयुक्तानुष्ठानात्वदंगतामश्नुवतेनप्रम

पं॰वि॰
१०२

रणादिविनियोगप्रमाणसामर्थ्यादंगभावः तदंगत्वाच्च तत्प्रयुक्तानुष्ठेयता न तथेह विनियोगप्रमाणमस्ति
न च प्रयुक्तिमात्रादंगत्वविशेषः अतः स्वातंत्र्याद्विवक्षितार्थः स्वाध्याय इति यत्त्वध्ययनापूर्वांगत्वेति तत्राप्यपू
र्वस्य प्रयोजनाकांक्षायां दृष्टसंभवे अदृष्टकल्पनानुपपत्तेः स्वाध्यायसामर्थ्यजन्यं वा हि ज्ञानं फलत्वेन कल्प्यते ननु न
नैयोगिकं तत्र किंतु दृष्टसामर्थ्यजन्यफलं विज्ञानं सत्यं नैयोगिकफलस्यैव विज्ञानस्यानुष्ठानांगतया प्र
योपकारः कल्प्यते अथवार्थतात्पर्यं विज्ञानस्य नैयोगिकफलत्वाधीनमिति कल्प्यते लौकिकतात्पर्यनि
मित्तविवक्षाद्यभावादेवं विवक्षितार्थत्वाच्छास्त्रमारंभणीयमिति तत्र वेदार्थविचारारंभेपि न वेदांतानां ग
तार्थत्वमिति परिहरति तत्रापि न निखिलवेदार्थेति वेदार्थोपधि विचारेपि धर्मग्रहणसामर्थ्यात्तदेकदे १०२
शो विचारित इति भावः ननूक्तस्वाध्ययनविधिप्रयुक्तो विचारः कथमेकदेशविषयः स्यादिति चोदयति

कथमिति परिहरति तथा सत्यथात इति प्रतिवाक्याध्ययनविचारं विधिव्यापारभेदात्प्रयोजनवशादेकदेशवि
चारेपि न विधिप्रयोजकत्वविरोधो यथा चक्षुषा रूपं पश्येदिति विधिप्रयुक्त्या रूपैकदेशनीलदर्शनेपि न तत्प्रयुक्ति
न विरुध्यते तद्वदित्यर्थः अन्यथा विध्यनुसारे शाकृत्स्नवेदार्थविचारविवक्षायां धर्मग्रहणं न स्यादित्याह यतो
न धर्म इति कृत्स्ने हि धर्मग्रहणस्य न वेदार्थैकदेशविचारैर्यथोदासः प्रयोजनं किंतु वेदार्थस्य पुरुषार्थतासिद्धिः प्र
योजनमिति शंकते सत्यं तथापि शास्त्रकारणामिति परिहरति एवं तर्हीति धर्मशब्दस्य हि वेदार्थे प्रयोग
निमित्तं वक्तव्यं न तद्वृष्टिश्चैत्यवंदनादावपि प्रयोगविप्रतिपत्तेः अथान्वयव्यतिरेकसिद्धः श्रेयःसाधनाभि
धायि धर्मशब्दः तथाभूतत्वाद्वेदार्थस्यापि धर्मशब्दः तत्र प्रवर्तत इति एवं तर्हि स्वाध्यायपाठाद्ब्राह्मणः
प्रतीयमानस्य धर्मशब्दाभिधेयत्वाभावात् तस्यार्थात्पर्युदस्तत्वाद्धर्म इत्येतावत्त्वाविचारो युक्तः अन्यथा

पात्तप्रतिपन्नधर्मब्रह्मसंग्रहणायनायवेदार्थजिज्ञासितिवक्तव्यमितिभावः नह्यनुष्ठेयश्रेयःसाधनवद
नुष्ठेयश्रेयोरूपमपिब्रह्मपदान्वयमात्रादेवविचारात्प्रागूनप्रतीयतइतिशक्यंवक्तुं लक्षणसूत्रमपिध
र्मविषयंनवेदार्थविषयमित्याह तथाचोत्तरमपीति लक्षणंहि लक्ष्यस्यान्यत्रप्रसंगविभ्रमनिरासप
रंतत्रधर्मस्यचैत्यवंदनादौप्रसक्तत्वाद्विप्रतिपन्नोनवेदार्थः अतोलक्षणस्योक्तार्थत्वायधर्मस्यैवल
क्ष्यत्वइत्याह धर्मस्वरूपविप्रतिपत्तिनिरासपरमिति ननुवेदार्थेपिविप्रतिपत्तयःसंतिकिमर्थंवा
रं लक्षणइतितन्निरासायलक्षणमुच्यतइतितत्राहेतरथावेदार्थविप्रतिपत्ताविति मंत्रादिषुकार्य
स्याप्रतीतेर्येनयत्प्रतीयतेसतस्यार्थइतिनियमात्नैवंविप्रतिपत्तिरितिभावः ननुधर्मग्रहणेप्यर्थवादल १०३
क्षणत्वनिरूपस्यचोदनालक्षणत्वंवेदार्थस्यकिंनसिध्यतीयतआहयतोनधर्मग्रहणेसतीति वेदार्थविप्र

तिपत्तिनिराकरणप्रतिभासाभावाद्धर्मविप्रतिपत्तिनिरासइतिप्रतिभासादप्रतिपन्नवेदार्थविप्रतिपत्तिनि
रासग्रहणायोगादित्यर्थः अथधर्मशब्दस्यवेदार्थेप्रयोगात्तद्विप्रतिपत्तिनिरासएवविवक्ष्यतामितिचोद
यति कथमिति तत्रनतावद्रूढिमाश्रित्य धर्मशब्दस्यवेदार्थेप्रयोगइत्युक्तं नापिलक्षणयानिधेयान्य
स्यलक्ष्यत्वेनवेदार्थस्याधर्मत्वप्रसंगात् इदानींस्वार्थप्रक्षेपेणवाप्रवृत्तिःशब्दमात्रस्यगसंज्ञासंज्ञिसं
बंधिपरंतथाप्रयोगइतिपरिशिष्यते तत्राननारवस्याप्रक्षेपेणेत्याह यत्तावच्चोदनालक्षणोर्थइति चो
दनालक्षणस्यधर्मत्वेभिधीयमानेस्यमस्यगवोदनालक्षणत्वेवेदार्थस्तेनावानितिननिर्णीतंभवति चोद
नाधर्मशब्दयोर्वेदनदर्थाभिधायित्वाभावात् यथायच्चाक्षुषंतद्रूपमित्युक्तेनसर्वस्यप्रत्यक्षस्यरूपमर्थइत्यु
क्तंभवतितद्वदितिभावः चोदनालक्षणोर्थेधर्मसंज्ञाविधिपरत्वंसूत्रस्यनिराकरोति अथपुनरित्यादि

पं०वि०

१०४ ना अङ्गीकृत्यदूषणमाह अथापिकथंत्विति अयंभावश्चोदनालक्षणस्यवेदार्थत्वेर्थशब्दस्यवैयर्थ्यंस्यात् श्ये
नादीनामपिचोदनालक्षणत्वाद्वेदार्थत्वाच्चतद्व्यावृत्त्यनुपपत्तेः अचोदनालक्षणत्वेवेदार्थत्वेचताभ्यामेवश्येय
नादिनिरस्तेरर्थशब्दवैयर्थ्यंस्यात् धर्मविचारलक्षणत्वादेनुमात्रानुपपत्तेश्चप्रमाणप्रतिज्ञायामथार्थश
ब्दवैयर्थ्यंस्यात् धर्मविचारपक्षेश्येनादिःप्रतिषेधाचोदनाविषयस्यानर्थत्वेनाधर्मत्वसिद्धिःप्रयोजन
मिति तथाचोदनाशब्दोपिचेत्स्ववेदलक्षणापरोवक्तव्यःकथंचोदनाव्यतिरिक्तोपिवेदभागोस्तिवान
वानास्तिवाचोदनालक्षणोर्थः चोदनार्थइतिलक्ष्यलक्षणयोरेकमेवस्यात् अस्तिचेत्सोप्यर्थवावे
दभागोनिरर्थकोवा अथचाश्चेत्कथंचोदनाप्रमेयाचोदनाभागस्यार्थःस्यात् अर्थशून्यश्चेच्चोदनाव्य १०४
तिरिक्तोवेदभागःकथंनहिचोदनार्थोयोनर्थवद्भागद्वयसमुदायवेदार्थःस्यात् तस्माच्चोदनाशब्दःकृत्स्नवे

वलक्षापरइतिचोदनालक्षणोवेदार्थोइतिवाक्येशब्दद्वयंदूषणमभिप्रेत्याथापिकथंविदिकृत्स्नं तथास
तिवेदस्यप्रामाण्यादर्थवत्वनिश्चयेविचारात्प्रागेवसंजातेकिंवेदार्थचोदनालक्षणः किंवार्थवादादिल
क्षणइतिविनुयेनार्थवादादिलक्षणःकिंतुचोदनालक्षणोवेदार्थइतिनिर्णयपरसूत्रंस्यात् तच्चानुप
पन्नमनिश्चितत्वादर्थवत्वस्येत्याह तथासतिवेदनलक्षणइति ननुप्रथमसूत्रेसाध्यायस्यार्थविवक्षा
याःप्रदर्शितत्वादर्थवत्वनिश्चयात्तद्द्वितयविलक्षणविधानंयुक्तं नानिश्चितेप्रामाण्येर्थविवक्षायोगा
त् तत्रवाध्ययनविधिप्रयुक्ताप्रामाण्यमात्रनिराकरणेनार्थविवक्षादर्शितानुनयोरुषेयत्वापौरुषेय
त्वेप्रामाण्यंतस्योपविषयत्वादिनिमित्तमप्रामाण्यंतत्रनिराकृत्यप्रामाण्यंव्यवस्थापितं तस्मादर्थव
त्वानिश्चयाद्वेदार्थश्चोदनालक्षणइतिनियंतुशक्यते अथप्रथमसूत्रेसामर्थ्यादर्थवत्वसंगीकृ

पं०वि० १०५ त्य लक्षणविधानमिति तत्राह तत्रानन्तरं प्रामाण्यप्रतिपादनं न युज्यत इति ननु तस्यैव दृढीकरणाय
पुनः पुनः प्रतिपादनेन अर्थवत्त्वेन निश्चिते दृढीकरणप्रयोजनाभावादिति निश्चिते च लक्षणप्रवृत्त्य
भावात् ननु वेदप्रामाण्यस्यापि वेदार्थतत्त्वप्रतिपादने वेदस्यार्थवत्त्वनिश्चयायेति न वेदप्रामाण्यस्यावि
वेदार्थत्वे सिद्धे वस्तुनि प्रामाण्यप्रसंगात् भाष्यकारश्च द्वितीयाध्यायमारभमाणोऽतः प्रमाणलक्षण
मिति प्रथमाध्यायेन वेदस्य प्रामाण्यमेव साधितं दर्शयतीति तन्न युज्यते वेदस्यार्थवत्त्वनिश्चयपूर्वं विना
रेतो धर्मे प्रमाणप्रतिज्ञैव लक्षणं वा द्वितीयसूत्रेण क्रियत इत्याह प्रवृत्तं प्रमाणलक्षितमिति चेति
किं त्वास्मिन्नेव सूत्रे मंत्रार्थवादयोर्धर्मप्रामाण्यनिराकरणादर्थवादाधिकरणमनपेक्षितं स्यादित्या
ह मंत्रार्थवादेषु चेति स्वावरुद्धे नानयप्रकारप्रतिपादनार्थमधिकरणमिति वेदान्तेष्वेव धर्मप्रामाण्य

निराकरणाद्ब्रह्मस्य प्रतिपादकतया तत्र पूर्वपक्षानुदयात् उपसंहरति अतः पूर्वोक्तेन न्यायेन कार्यनिष्ठ
एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठ इति अतो वस्तुजन्य निष्ठं वेदभागं विचार
यितुमिदमारभ्यते॥ ॥अथातो ब्रह्मजिज्ञासेति॥ ॥५॥ ॥इति विवरणे द्वितीयवर्णकं समा
प्तं॥ ॥ श्रीरामचन्द्राय नमः॥ ॥तत्र लोके अथशब्दस्य चत्वारोऽर्थाः वृद्धव्यवहारे प्रयोगसामर्थ्यात् प्र
सिद्धाः आनंतर्यमधिकारो मंगलारंभः प्रकृतादर्थादर्थान्तरत्वं चेति तत्रेतरव्युदासेनानंतर्यमथश
ब्देनोपादीयत इत्यस्मिन्नर्थे सति चानंतर्यार्थत्व इत्यतः प्राक्तन भाष्यस्य तात्पर्यमाह तत्राथशब्द आ
नंतर्यार्थ इत्यादिना कथं जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वसंज्ञीकायाः कर्तव्यतया प्रारंभानुपप
त्तेः प्रत्यधिकरणं प्रतिपाद्यत्वात् अधिकारार्थोऽपि शब्दः ब्रह्मज्ञानेच्छाया मंगलाचरणार्थत्वस्य प्रसिद्ध

BHAU DAJI

पं॰ वि॰ त्वादप्रसिद्धत्वेपि प्रत्यासायत्तरयार्थवादत्वप्रसंगात् सूत्रस्य न मंगलाचरणार्थता इच्छायाश्चकृतश्चि
१०६ प्रकृतादर्थादर्थान्तरभावस्य प्रसिद्धतरत्वात्तदभिधाने स्यमिति अथशब्दस्य न तदर्थतेति नन्विच्छाया
कृतश्चिदानंतर्यमपि प्रसिद्धं सत्यं हेतुफलभावेनानंतर्यस्य विवक्षितत्वात् आनंतर्याभिधानमुखेन प्र
कृतयुष्कलकारणमथशब्देनासत्यं इच्छोदयप्रभृतीष्यमाणज्ञानोदयपर्यंतस्याकार्यस्य पुष्कलकारणत
या पूर्वप्रवृत्तस्य शास्त्रीयस्याधिकारिविशेषणस्य प्रतिपत्तिपरत्वात् अथशब्दस्यात्र दोषः नत्वातिपत्ति
ष्यमाणज्ञाने प्रवृत्तिपर्यंतेच्छोदयद्वारेण प्रवृत्त्यंगभावं भजत इति तेनानंतर्याभिधानमुखेन प्रवृत्ति
निमित्तविशिष्टेच्छोदयप्रभृतेर्ज्ञानोदयपर्यंतस्य कार्यस्य पुष्कलकारणतया पूर्वनिरुक्तधात्वा न च तु १०६
ष्ठ्यावद्योतनायानंतर्यार्थोथशब्द इति सूक्तं ननु जिज्ञासाशब्दस्य विचाररूढस्य कथमवयवार्थे

नार्थवत्त्वमादीयते रूढिर्हि योगमपहरतीति न्यायादित्याक्षिप्ति अयं तु जिज्ञासाशब्दो विचारवचन इ
त्यारभ्योच्यत इत्यतः प्राक्तनो ग्रंथः स पूर्वार्थ उच्यते नायं जिज्ञासाशब्द इत्यादि परिहारोयमाशयः चत्वा
रः शब्दस्य वृत्तिप्रकाराः तत्र रूढिर्यया शब्दो व्यवहारे भिधानाभिधेयव्यतिरिक्तमनपेक्ष्यैव प्रयोगसा
मर्थ्यादखंडाभिधानसंबंधः योगः समासादिनैकपदमायत्तः स यत्र शब्दस्यावयवगतानेकाभिधानश
क्तिद्वारेणाविशिष्टार्थाभिधानं एतच्चोभयं मुख्यावृत्तिधानं एतच्चोभयं मुख्यवृत्तिः इत्युच्यते गौणः
स्वाभिधेयादर्थांतरे लक्षणया वृत्तिरिति तत्रैकस्यैव शब्दस्यार्थांतरे रूढस्यार्थांतरे च योगवृत्तिसंभवे रूढि
योगमपहरतीति न्यायेन योगः परित्यज्य रूढिरूपादीयते रूढियोगमुख्यवृत्तिसंभवे गौणः परित्यज्यते।
तत्रैकस्मिन्नर्थे शब्दस्य योगवृत्तिसंभवे तत्रैव तस्यैव शब्दस्य रूढिं न कल्पयन्ते क्लृप्तसामर्थ्येनैव प्रतिपत्तिसं

पं॰वि॰
१०७

भेदेनैव तस्यैव शब्दस्य शक्त्यनंतरं कल्पनानिमित्तकार्यांतराभावात् ननु पंकजादिषु योगरूढिरिति शक्त्यं
तरं वा शक्तिद्वयं वा कल्प्यत इति न तत्रापि योगस्यैवार्थप्रतिपत्तेः ननूत्पलादिवनं तरं विहाय पंकजशब्दा
त् उत्पलादितामरसे प्रतिपत्तिदर्शनाच्छक्त्यंतरमेव कल्पनीयं न प्रयोगबाहुल्यादेव विशेषप्रतिपत्तिः प्र
थमप्रतिपत्तिदर्शनात् यथा नवस्वर्थेषु शक्त्यविशेषेऽपि गोशब्दात्सास्नादिमत्स्वेव प्रयोगबाहुल्यादेव
प्रथमप्रतिपत्तिः तस्मात्क्रमसामर्थ्यादेव प्रयोगप्रतीयते संभवे न शक्त्यंतरकल्पनेत्याह नायं जिज्ञासा
शब्द इति कथमित्यतः प्राक् नो ग्रंथः स्पष्टार्थः नन्ववयवार्थसंसर्गस्य योगस्यापि शब्देन प्रतिपाद्यते वि
चारस्तन जिज्ञासाशब्दावयवार्थः कथं तदवगमस्य क्रमसामर्थ्येनैवान्येवासिद्धिरिति चोदयति कथमन्य १०७
था सिद्धत्वमिति स्वयमवयवार्थलाभाद्वेयवयवार्थे संसर्गाविनाभावादपि तत्र लक्षण्याप्रयोगात्प्रत्यये

यपपत्तेर्न शक्त्यंतरकल्पनानन्यथासिद्धकार्याभावादिति परिहरति अंतर्नीतविचारार्थत्वादिति ननु ज्ञा
नमात्र इष्यमाणं कथं विचारेणाभूतमिति तदाह तथा हि किं न प्रमाणामिति तदाह एवं प्रयोगप्रत्यययोरि
ति ज्ञानं एव त्विष्यमाणविषयेण सहावगतमिष्यते न वगतविषयेच्छायोगात् तश्च प्रतिपत्तेवस्तु निर्ज्ञा
नमिष्यमाणं संदिग्धे निश्चयफलं वा परोक्षे फलत्वेष्यते तच्चोभयं प्रमाणादिविचारप्रयत्नसाध्यमिति प्रति
पत्तेवस्तु निर्विशिष्टज्ञानमिष्यप्रमाणादिविचारमविनाभावेन गमयतीति विचारसापत्त्याने प्रयोगप्रत्य
ययावित्यर्थः ननु नेच्छामात्रं सूत्रेण प्रतिपाद्यते प्रयोजनाभावात् किंत्विष्यमाणज्ञानप्रदर्शनमुखेन तत्सा
धनं विचारमंतर्नीतमुपलक्ष्य सर्वत्रासर्वेण प्रतिपाद्यते नो विचारः ज्ञानब्रह्मणामन्यतमस्यतात्सर्येण प्र
तिपाद्यस्यारंभायाथशब्द इति चोदयति नन्वेवमपि कुत एतदिति तदेव प्रपंचयति अंतर्नीतविचारमा

पं०वि०
१०८

श्रयेति अर्थलक्षणेनप्राधान्येनानंतर्येनविचारमाश्रयेतेति संबंधः अत्रत्रयाणामन्यतमस्याधिक्रियमा
णत्वमंगीकृत्येति योजना तत्राथशब्देनानंतर्याभिधानमुखेनशास्त्रीयसाधनचतुष्टयसंपन्नाधिकारिवि
शेषस्यन्यायतः समर्पणाभावेविचारारंभार्थत्वेनकर्तव्यतया विधीयमानो विचारोनिराधिष्टननुष्टयःस्या
दितिपरिहरति उच्यतेशास्त्रस्यनारंभप्रसंगादिति ननुविचारविधिरेवविश्वजिन्न्यायेनाधिकारविशेषं
कल्पयित्वाप्रवृत्तिपर्यंतो भविष्यति किमथशब्देनेति ननुकर्तव्यतयावगतो विचारेऽपिप्रारंभमर्थात्क्षम
यति किं विचारप्रारंभाक्षेपेणाथशब्देनाननुविधिसामर्थ्यादुभयथाप्यौकल्पनंनिर्णयो विध्यपेक्षितोपा १०८
धित्वाद्यानंतर्याभिधानमुखेनाधिकारसामर्थ्यमेवयुक्तमित्याह अधिकारार्थत्वेप्रयोजनमितिप्रवृत्तिद्वा
रेणप्रयोजनपर्यंतताऽस्येत्यर्थः ननुमोक्षकामः कल्प्यते न प्रसज्यप्रतिषेधप्रसंगात् तथाहि कर्तव्य

इत्युक्ते विशेषात्सर्वाधिकारप्रतिपत्तौदनुपपत्याविशिष्टाधिकारः कल्पनीयस्तत्रोत्तरमथशब्देनोपविशिष्टाधि
कारिसमर्पणमितिभावः ननुरात्रिसत्रन्यायेनार्थवादगतमेवमोक्षंब्रह्मज्ञानंवाप्रयोजनंनसाध्यत्वेनपरि
णमय्यमोक्षकामोब्रह्मज्ञानकामोवाविचारयेदिति विधिप्रतिपत्तिसमयेऽधिकारिविशिष्टविधिप्रतिप
त्तिसमये न प्रसज्यप्रतिषेध इति चोदयाति ननुब्रह्मज्ञानेप्रयोजनमिति तत्रेदंवक्तव्यं किं सर्वेषां फलका
मितयासर्वाधिकारंशास्त्रमुच्यते किंवाविशिष्टाधिकारमिति विशिष्टाधिकारत्वेविधिप्रतिपत्त्यधीनत्वा
दर्थवादसामर्थ्यालभ्याधिकारिकल्पनायाः प्रसज्यप्रतिषेधव्यापारगौरवंतदवस्थमेवातोऽथशब्देनश्रो
तत्वादिविधिप्रकरणविहितसाधनचतुष्टयसंपन्नाधिकारिप्रतिपत्तिपूर्वके विचारविध्यवगमेना
सोदोषइत्यथशब्देनश्रौतविशेषाधिकारिसमर्पणमेवयुक्तमिति अथस्वविधिकारं शास्त्रं किं

पं॰वि॰ १०९

तिनप्रसज्यप्रतिषेधः नापि विशेषाधिकारि सर्व्वमेणेत्याद्यपेक्षेति तत्रवक्तव्यं किं फलतः सर्वाधित्वात्वं किं
वाविधितो नत्तावत्फलतः सर्वेषां फलार्थित्वाभावादित्याह नब्रह्मज्ञानेर्थित्वानुपपत्तेरिति माभूद्ब्रह्मज्ञानार्थि
त्वं ततः प्रान्तेनोयं ग्रंथः स्पष्टार्थः नन्वध्ययनविधेस्त्रैवर्णिकाधिकारत्वात्तत्प्रयुक्तत्वाच्च विचारस्य विधित एव
सर्वाधिकारत्वात्सत्रमितिचोदयति माभूद्ब्रह्मज्ञानार्थितेति ननु विधिर्नामस्वविषयस्यतदुपकारकस्य वा
नुष्ठाननिमित्तं भवति न च विचारोध्ययनविधेर्विषयस्तदुपकारको वा तत्कथमध्ययनविधिर्विधेयो
विचार इति तत्राह स्वाध्यायाध्ययनस्यार्थावबोधफलत्वादिति अयमाशयः दृष्टफलस्याध्ययन
विधेर्थावबोधफलं व्यापारात् विचारमपि फलविधित्वेनाध्ययनविधिरनुशाययतीति ननु वि १०९
षयतदुपकारिव्यतिरिक्तस्य व्यापारस्य फलानधिगतेस्तया विधिप्रयुक्तो निष्टयत्वं क दृश्यते अथवा

नादिष्विति चेत् न विधेयावघातस्येव फलपर्यंतमावर्तमानत्वात् विचारस्य स्वतंत्रमेव भावार्थात्तरं क
थं विधीयत इति वक्तव्यं नैदोषः आरत्तिगुणस्याविहितस्य विहितानुपकारकस्य च विधेः फलपर्यं
तत्वानुपपत्त्या विधेयत्वकल्पनवद्विचारस्यापि तदुपपत्तेरिति तत्र किं विचारसाध्यात्तानमर्थनिश्च
यफलमध्ययनस्यान्वयव्यतिरेकसिद्धं दृष्टफलं किं वा तदुद्देशेन विधानादधिकारिविशेषणत्वया
शास्त्रीयं फलं किं वा विधिप्रयोजनपर्यंतसामर्थ्यलभ्यं फलमिति नतावद्दृष्टं फलमध्ययनमात्रादा
वृत्तिगुणकादप्यर्थनिश्चयानुदयादापातदर्शनस्य च विचारानपेक्ष्यत्वात्तो नार्थनिश्चय दृष्ट फ
लाध्ययनाक्रियेति सिद्धांतयति स्यादेवं यद्यर्थावबोधफलाध्ययेनक्रिया स्यादिति ननु तत्यप्र
त्ययेन स्वव्यापारः शाब्दभावना विधिरूपतयाभिधीयते सा च शाब्दभावनाध्ययनकरणिकाम

र्थभावनां निष्पादयंती फलवदर्थावबोधं पुरुषार्थमर्थभावना भाव्यत्वेन कल्पयति अपुरुषार्थे पुरुष
प्रवृत्त्ययोगात् तत्रश्च भाव्यांतरलाभात् समानपदोपात्तमध्ययनमात्रनायाः करणत्वमापन्नं भाव्यस्यार्थाव
बोधस्याभिनिर्वर्त्तकतया करणं भवति कुठारादीनामपि छिदिक्रिया भाव्यद्वैधीभावनिर्वर्त्तनद्वारेण छि
दिभावनाकरणत्वप्रदर्शनात् अतोऽध्ययनविधेः प्रवृत्तिकल्पान्यथानुपपत्त्या अर्थभावनाकारणस्या
ध्ययनस्यार्थावबोधः फलमिति सिद्धमन्यथा समानपदोपात्तस्याध्ययनस्यैव भाव्यनया स्वाध्यायावा
प्तेरपि विधिफलत्वाभावप्रसंगादित्यतश्चाह्यसाह्यधीमानावाप्तिफलत्वादक्षरग्रहणं नेत्ययमा
शयः न च प्रत्ययेन भावना कर्मकारके अभिधीयमाना स्वाध्यायस्यावाप्तिफलत्वेन भाव्यांतरकल्पनी
यं भावनाकर्माभिधायित्वाच्च विरोधादिति ननु न भाव्यमात्रेण पुरुषप्रवृत्तिर्विधिना जन्यते वि ११

नापुरुषार्थभाव्यापेक्षायैवतत्त्वश्रवाद् विरोधेऽपि भावनानिष्पत्तयेऽर्थावबोधो भाव्य इति शंकते अथाक्ष
रग्रहणं निष्प्रयोजनमिति परिहरति भवतु न हि सर्क नांगतिरिति अयमाशयः अर्थनिर्णयस्या
ध्ययनमात्राद् अनिष्पत्तेः श्रूयमाणस्य स्वाध्यायस्यावाप्तफलत्वादध्ययनमात्रस्य चाप्रयोजनतया भाव्य
त्वायोगात् स्वाध्यायाध्ययनेन स्वर्गं भावयेदिति कल्प्यत इति ननु व्याकरणस्याप्यंगत्वात् सांगादध्य
यनाद्विधीयमानादर्थनिश्चयो जायते तस्य विचारोऽपरिहार्य इति विचारः प्रयुज्यते नो दृष्टे सत्यदृष्ट
कल्पनान्याय इति चोदयति तदपि नाक्षरेभ्यः प्रयोजनवदिति परिहरति न न हि निष्प्रयोजनानीति श्रू
यमाणस्वाध्यायलक्षणकर्म एवाध्ययनभावनया भाव्यमानात् फलवदर्थावबोधसिद्धेः पश्वा
दीनां प्रयोजनां प्रतिपरं परया साधनानामपि भाव्यत्वदर्शनात् श्रूयमाणस्वाध्यायावाप्तिपर्यंतस्यैव वि

पं०व० धिव्यापारइति भाव नन्वक्षरग्रहणपर्यंते विधिव्यापारे फलवदर्थावबोधस्य निर्निमित्तस्यादिति न तत्रा
१.११ हफलप्रयुक्त एवार्थावबोधइति अयमाशयः लौकिकाप्तवाक्यानां विधिमंतरेणापि फलवदर्थावबो
धकत्वदर्शनात्सांगाध्वकर्मणो विधीयमानत्वध्यानादिषु विवादृष्टजन्मनियमान्न विधिफलमर्थावबो
धः किंतु स्वीकृतस्वाध्यायमात्रजन्यमिति विधेकृदृष्टसमवायदृष्टमेव किंचित्फलमिति दृष्टफला
विरोधेनादृष्टसिद्धो न तद्विरोधित्वतंत्रादृष्टं कल्प्यायेन युक्तमिति किंच फलवदर्थावबोधफलेध्य
यनविधौ यस्य यस्मिन्कर्मण्यधिकारस्तस्य तद्वाक्याध्ययनमेव स्यान्नावाक्यांतराध्ययनं तत्रप्रवृत्त्या
दिफलाभावादिति न कृत्स्नवेदाध्ययनसिद्धिरिति स्याहापि वाक्षरग्रहणांते विधिरिति ननु कृत्स्न १११
स्वाध्यायाध्ययनस्य नित्यतया विधेयत्वेपि सकलस्वाध्यायावाप्तिसमवेतस्यादृष्टस्यानधिकृतकर्म

वाक्यगतस्यार्थावबोधानुष्ठानादिद्वारेण कथमपूर्वसिद्धिहेतुनेति नेष दोषः प्रायश्चित्तजपाद्युपूर्वोपि
कारिपपत्तेः नन्वध्ययनादक्षरणवाप्तेः को विशेषोस्त्यत्र विशेषः स्वाधीनोच्चारणक्षममत्तन्नामाक्षरधर्म
वाप्तिस्तदर्थावाप्त्यनसव्यापारो ध्ययनमिति नन्वधिकारिविशेषणमर्थावबोधमुद्दिश्याध्ययनं विधातव्
निरधिकारविधानायोगादर्थावबोधमुद्दिश्यैव बोधिधितः शब्दोच्चारणे सति वाक्यतात्पर्यसिद्धेरर्थावबोध
मुद्दिश्य रागप्रयुक्तशब्दोच्चारणे लोकेतात्पर्यदर्शनादिति चोदयति ननु चाश्रूयमाणाधिकारोध्ययनविधि
रिति अधिक्रियते स्मिन्कर्मण्यनेनेत्यधिकारो पुरुषसंबंधनिमित्तजीवनकामादिश्चरूते ननु विश्वाजिन्न्या
येनाधिकारीतिप्रकरणाप्रमाणोमकल्प्यतामिति नेत्याहाहदृष्टश्चाक्षरग्रहणेर्थविबोधः सकल्पनामधेकार
स्यनिरूपणित्सादिना भवतुनामाध्ययेनेनार्थववोधंभाभावयेदर्थावबोधकाम इति विधिस्तथापि विचारेण

थावबोधभावयेदिति विचारेऽप्रवृत्तिरध्ययनविधिना न विधीयत इति तत्राह दृष्टाधिकारेष्वप्रत्यक्षत इति
तत्र किमर्थसामर्थ्यादेवाध्ययनस्यार्थावबोधः साक्षाद्दृष्टं यस्याथवा फलमिष्यते किं वार्थावबोधकाममु
द्दिश्यविधानमित्यभिप्रेत्याहाथोच्यत इति प्रथमः कल्पोङ्गीकृत इत्याह नवेदध्ययनविधेरिति द्वितीय
पक्षोनुपपन्न इत्याह नाधिकारहेतुत्वेनाध्ययनात्प्रागर्थावबोधस्याप्रतिपन्नस्य कामनायोगान्नार्थावबो
धकाममुद्दिश्यविधानमित्यर्थः ननु कथमर्थावबोधस्याप्रतिपत्तिरध्ययनात्प्राग्वेदार्थस्य प्रतिपत्तेर्वि
शेषणापरिज्ञानेन तद्विशिष्टावबोधानवगमात् ननु वेदस्य प्रागपि वाक्यप्रमाणत्वादाप्तवचनवदर्थो विद्य
त इत्यर्थसद्भावमात्रमनुमानेनावगम्यते नार्थवत्त्वज्ञानमात्रस्यानुमानसिद्धात्तत्र न कामनायोग ११२
दग्निहोत्रादिविशिष्टवाक्यार्थानामप्रतिपन्नतया तद्विशिष्टज्ञानकामनायोगादुपपद्यत एवाग्निहोत्रा

दिविशिष्टवाक्यार्थविशेषाः प्रतिपन्ना इति चेत् न हि वाक्यार्थविशेषज्ञानामपि सिद्धत्वात्तत्र कामना
संभवेथो यदेशिकज्ञानस्याप्रमाणत्वान्निर्णयज्ञानं काम्यत इति वेदप्रामाण्ये निश्चितेन तत्र निर्णयज्ञा
नकामनार्थस्य विभ्रममात्रत्वादौपदेशिकज्ञानस्य संदिग्धप्रामाण्यत्वात्प्रामाण्यविचारस्यैवावसरो नाध्ययन
स्य किं च सर्ववाक्यार्थज्ञानानां युगपदेकबुद्ध्यारोहणासंभवात्सम्भाव्येनोद्दिश्यशब्दोच्चारणाद्यामर्थमात्रज्ञा
नेत्राद्दृश्यतात्पर्यसंगादग्निहोत्रादिविशेषज्ञाने तात्पर्याभावाद्वाक्यशास्त्रानुसारेण विशिष्टतात्पर्यकल्प
नायामर्थज्ञानमुद्दिश्याध्ययनविधिस्तात्पर्यानिमित्तत्वप्रसंगात् तस्माद्विशेषज्ञानानां प्रागसिद्धत्वान्न
तत्काममुद्दिश्यविधानमित्याह प्राक्काधिकारज्ञानेन प्रयोजनमिति किं चोद्दिश्यविधानेपि नाध्य
यनमात्राद्दृष्टफलतयार्थावबोधसिद्धिरदर्शनादित्याह तेन विधेरिति नन्वार्थावबोधमुद्दिश्यशाब्दे

चारणायां तात्पर्यं लोके दृश्यते न त्ववक्त्रोनुच्चारणात्तात्पर्यमिति सिद्धं लोके तदभावात्तु वक्तृरुच्चारणा वेदे
यो दूषयता तात्पर्याभावप्रसंगात् तस्मात्स्वभावत एवार्थप्रतिपादनसमर्थस्य शब्दस्य पुरुषसंबंधकृतदोषप
रिहारायार्थज्ञानमुद्दिश्य शब्दोच्चारणापेक्षते तात्पर्यमपि शब्दधर्म एवेषद्विध लिंगगमनेन पुरुषधर्म
इति वक्ष्यते इदानीमध्ययनविधेर्निरधिकारतां प्रतिपादयितुमधिकारिविशेषणाभावादनध्ययन
मेवेत्यध्ययनप्रवृत्तिमाक्षिपति यद्येवमधिकाराश्रवणादिति तत्रा विधिर्हि स्वविषये प्रवर्तकतया प्रतिपत्तिस्त
दन्यथानुपपत्त्या मम्नायां नियोग इति प्रवृत्तिसमर्थमधिकारिणं कल्पयति यदा पुनर्विधिविषयस्य निमि
त्तान्तरादनुष्ठानं संपद्येत तदा विधेः प्रवर्तकत्वं प्रतिबध्यते प्रतिबद्धप्रवर्तकभावश्च विधिः प्रवृत्तिसिद्ध्यु ११३
ये न स्वामिनमधिकारिणं कल्पयित्वा प्रवर्तयति तत्राध्ययनविधिरपि स्वविषयस्याध्ययनविधिप्रयुक्ता

नुष्ठानत्वात्स्वयं प्रतिबद्धप्रवर्तकभावो नाधिकारिकल्पयित्वा प्रवर्तयतीति प्राभाकराः प्रत्यवतिष्ठन्त इत्याह
न केचिदाहुरिति न च अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेति श्रुताध्यापनविधिरश्रूयमाणाधिकारः स्व
मध्ययनं प्रयोजयेत कल्प्यते ह्यधिकार इति चेत् अध्ययनेप्यधिकारिकल्पयित्वा स्वविधिप्रयुक्तिरेवाध्यय
नस्य गम्यतां संनिधानात् ननु कल्पिताधिकारेध्ययनविधौ तत्प्रयुक्तानुष्ठानत्वादध्ययनस्य न तत्राधिका
रः कल्प्यत इति चेन्न विपरीतं किं न स्यादध्ययने कल्पिताधिकारे तत्प्रयुक्तानुष्ठानत्वादध्ययनस्य न तत्राधिका
रः कल्प्यत इति ननु लिखितपाठादप्यध्ययनसिद्धेर्नाध्ययनविधिरध्यापनं प्रयोजयति तर्हि अविहिता
ध्ययने नापि अध्यापनविधिसिद्धेर्न विहितमध्ययनमध्यापनविधिः प्रयोजयते दृष्टाध्ययनाध्यापनयोर्माण
वकस्य प्राङ्मुखत्वपवित्रपाणित्वादिनियमसाम्याद्विहितमेवाध्ययनमध्यापनविधिः प्रयुङ्क्त इति अध्यापन

स्याध्ययनविधिप्रयुक्तावपि समानमेतत् । किं चाचार्याधीनो वेदमधीयीतेति नियमविधानात् लिखितपाठे
न युक्तोऽध्ययनादुत्तरभावित्वादाचार्यकरणविधिप्रयुक्तोऽधीयीतेति वा क्वार्थ इति चेन्न तत् । द्वितीयजन्मतद्य
स्मात् । आचार्य इत्युपनयनमात्रादाचार्यत्वश्रवणात् आचारान् ग्राहयतीति सुलसा वाचार्यत्वस्य प्रागेव सि
द्धेराचार्यकरणविधिप्रयुक्त इत्यध्याहारात् आद्यस्य भाविवृत्त्याश्रयणस्यैव लघीयस्त्वात् तस्मादधिकारक
ल्पनासाम्यादितरेतरप्रयुक्तिसाम्याच्च विधिप्रयुक्तिसंभवेऽध्ययनस्य कथमध्ययनविधिप्रयुक्तिरिति तत्रा
ह चार्यकारणविधिप्रयुक्तस्यानुष्ठानमित्यत्ययमाशयः समानेनोसंजनाचार्यकरणजानमिति विगण
नव्ययेषु निपद्इति संमाननादिषु साध्येषु नयतेर्दात्तोरात्मनेपदं विधीयते तत्रोपनयितनमध्यापयीते
त्यकप्रयोगतावगमादुपनयताध्यायनयोः माणवकस्याध्ययनं प्रति कर्मकारकत्वेनगुणभूतत्वान्माणव १९४

क्तमोसुयादेयमेवानुष्ठापयति किंनुयच्चदृदेन्यमुपादेयं वा विनाकाम्यमानेन न सिध्यतितत्सर्वं विधिसह
कारितयानुष्ठापयति एवं विधिरागयाविभागदर्शिनाद्यथा सौवर्णापिवेसमुपविशोदिति विधौ तथा वि
धीपीभावे विधिनानुतिष्ठति रागस्कृतथा तथा विधयीवमुत्साद्यापितत्र निवेशयति एवमाचार्यकरणक
मनैवाध्ययनमाचार्यविरणाद्वारेण माणवकेन निवर्तयत्स ध्यायनसिध्यर्थमिति अत्राध्ययनविधिरेव निस
धिकारेण साध्ययकारोऽध्ययने न प्रवर्तयतीति प्रतिपादयेनुमध्यायनविधिप्रयुक्तं निराकरोतितदयुक्त
मित्यपर इत्ययमाशय न तावदाचार्यत्वं स्वयमेव विधेयमिति युक्तमुपनयनाध्यापनाभावार्थविषयत्वा
द्विधेर्नापिविधिपदाभिधयतया विद्धिरूपमाचार्यत्वं आत्मनेपदमात्राभिधेयत्वान्नापि तैयोगिकफलमाचा
र्यत्वमाचारान् ग्राहयतीति प्रयोजककर्तृत्वनिबंधनत्वस्याचार्यत्वस्य लौकिकत्वात् अथ माणवकविषयनय

त्यर्थजन्यमाचार्यत्वमलौकिकं स्यान्नो ननु यस्मात्सत्त्वाचार्य इति स्मृतौ माणवकसंस्कारं प्रति हेतुकर्तृत्व
स्यैव लौकिकस्याचार्यशब्दनिमित्तत्वावगमात् सहचरितानां च संमाननादीनां लौकिकैराचार्यत्व
स्यालौकिकत्वेप्युपनयननियोगफलं भविष्यति तेनाध्यापनविधेः पुनः साधिकारता अथ तमध्याप
यीतेत्येकप्रयोगतावगमादुपनीयाध्यापयीतेति विधिः परिणम्यत इति तथाप्यंगफलस्यार्थवादस्थन
प्रधानविध्यधिकारत्वमित्यताकल्पनीया आचार्यकरणकामो माणवकमुपनीयाध्यापयेदिति तदे
वमध्ययनविधिरप्युपनयनप्रकरणपाठाद्वाजसनेयिनां सर्वस्मृतिषु चोपनीतोऽधीयीतेति प्रकरणप्रमा
णात्साधिकारत्वसिद्धः स्वविधिप्रयुक्तमेवाध्ययनमितियुक्तं युक्तमानवं वचनमुक्तं तत्स्वविषयमेव नामूलत्वं ११५
त्यनुमानेन गानाचार्थकरणकामस्य किंचिद्धाति किंतु यच्छाद्धोपवर्धादुपनयनाध्ययनोनुव

कः केनोपकारेणाध्ययनविधिं निर्वर्त्तयेदिति वीक्षायामुपगमे नाध्ययनं कुर्वन्नध्यापने विधेरूपकरोतीति ग
म्यते तत्रोपनीयाध्यापयेदिति प्रयोगैकत्वकल्पनायानयत्यर्थधाध्ययमेवाचार्यकरणमध्ययनस्यापि
फलं गम्यते ननु नश्रोपनीयाध्यापयेदाचार्यकरणकाम इति श्रुतस्यैवाचार्यत्वफलस्य कामोपबंधम
त्रकल्पनासाधिकारेध्यापनविधिः संपद्यते अथवोपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः सकल्पस
रहस्यं च तमाचार्यं प्रचक्षते इति उपनयनाध्यापनयोः प्रयोगैक्यादध्यापने विधिश्रवणादाचार्यत्वफल
श्रवणाच्चाचार्यत्वकामो माणवकमुपनीयाध्यापयेदिति विधिर्निष्पद्यते अध्ययने तु नाधिकारनिमित्तं कि
चित्फलमस्तीति विशेषः ननु चाध्ययनविधिविषयतदंगताभावेध्ययनस्य स्वतंत्रविध्यंतरविहितस्य स्वयं
कथं स्वतंत्रविध्यंतरप्रयुक्तानुष्ठानतेति तत्राह प्रधानस्यैव कामश्रुतिप्रयुक्तस्य त्वयमाम्नायः आम्नो

पं०वि० श्रीतादधीतेतिश्रूयते तत्र न तावत्स्वरूपमुद्दिश्य स्वातंत्र्येण नित्यमाधानं विधीयते द्रव्यपरतयाप्रोक्षणा
११८ दिवत्कर्मकारकसंस्कारकर्मताप्राप्तेः अश्रूयमाणफलत्वादेव न स्वतंत्रकाम्याधिकरता न वसंक्रान्या
येन गुणप्रधानवैपरीत्यान्नित्यकाम्याधिकारता यदाहवनीये जुहोतीति संस्कृताग्नीनां कर्तृत्वंतरे विनि
योगात् तस्मादुभयविधाधिकारशून्यो नाधानविधिराधानप्रवर्त्तयितुं क्षमः तर्ह्युत्तरक्रतुविधिप्रयु
क्तानुष्ठानमाधानं स्यादुच्यते न तावदग्निहोत्रदर्शपूर्णमासादिविधिप्रयुक्तानुष्ठानमाधानमाहवनीय
स्योद्देश्यतयानुपादेयत्वात् क्रतुविधिप्रयुक्तानिष्ट्यत्वायोगदुपादेयमेव हि विधिरनुष्ठापयत्यन्यथा स्वर्ग
कामादीनामप्यनुष्ठेयत्वप्रसंगात् तस्मादुत्तरकाम्यविधिप्रयुक्तमेवाधानस्यानुष्ठानमिति न हि विधिरव ११८
कामोऽप्युपादेयमेवानुष्ठापयत्यपि किंतु यद्यदुत्तोद्देसुपादेमक्तमेवाधानस्यानुष्ठानमिति न हि विधिरव

र नक्तुराचार्यसंज्ञामेव विदधतीतमाचार्यप्रचक्षत इति वचनात् संज्ञायाश्च वक्ष्यमाणनमस्कारपूर्वादिविधा
नांगत्वात्तस्मादाचार्यकरणविधिप्रयुक्तिरस्त्विति तन्नेवमप्युभयत्राधिकारकल्पना नयुक्तान्यतरेणोवन्यत
रस्यप्रयुक्तिसिद्धेः अतः कस्यान्यतरस्य कल्प्यत इति वा क्षायां माणवकस्य प्रबुधत्वात्स्वाधिकारप्रतिपत्त्यानुष्ठानु
सरान्क्त्वादध्यापनविधिरेवमाधिकारोऽध्ययनं प्रयुंक्त इति चोदयति कथमिति तत्रोत्तरमाह आष्टवर्षं ब्राह्मणमुप
नयीतेतियद्ययमाचार्यस्य नियोग इति आचार्यस्य कारणकामस्य नियोग इत्यर्थो यमभिसंधिः आचा
र्यकरणविधिस्तावन्नाविहितमध्ययनं प्रयुंक्ते ध्ययनानधिकारिणां तत्रप्रयोजनशून्यतयाचार्यगुणभावेन प्रव
त्तयोगात् अथ विहितमेवाध्ययनं प्रयोजयति तत्र कर्तव्यं किं विधिस्वरूपनिद्धारणोपाधितत्वोभिधिकारिणं
प्रयं चापेक्षतेन विति स्वरूपोपाधितया विषयमपेक्षतेनाधिकारिणं प्रवर्तवक्तोपाधित्वादधिकारिणइ

पं०क्रि० ११७

तिचेत्तर्ह्यस्यार्थं विधिरिति विहितस्याच्येत विशेषस्यापरिज्ञानात् यं कंचिदध्यापयेत्तत्र दत्तदाहमाणवकोन
नियुक्तो भवतीति अथ स्वरूपोपाधित्वेनैवाधिकारित्वे चाध्ययनविधेः साधिकरत्वं तत्र प्रकरणदुपनीतोऽधिका
रिसंपद्यते साधिकारित्वेनाध्ययनविधेः प्रयोजनवित्त्वमपि सिध्यति यदप्रयुक्तो नुष्ठानं संभवेत्साधिकारिणि
विधिनैव प्रवर्त्तितस्येत्यर्थः नन्वेकस्मिन्नप्रवर्त्तमानेप्यन्यः चेतत्राहानियुक्तस्य च स्वाध्यायाध्ययन इति अ
नियुक्तस्येति स्वाधिकारविधिनैव प्रवर्त्तितस्येत्यर्थः नन्वेकस्मिन्नप्रवर्त्तमानेप्यन्यः प्रवर्त्तिष्यत इति स्वेतो
रूपेणाध्ययनस्य सिद्धिरिति नोपनेतृत्वस्यापि तद्गतत्वान्न मवोपनीतमध्यापयेन्नान्येनोपनीतमन्य
थांगवैकल्यात् अधिकारानिष्पत्तेः आचार्यत्वफलासिद्धेः तथ्यनान्यपि उपनीयाध्यापयेत्तत्र स्वसर्वे च माण ११७
वकान प्रवर्त्तते निप्रयोजनया व्यारद्ध तिनाध्यापनं सिध्यति ननु बालस्य कथं स्वाधिकारप्रतिपत्तिः सं

ध्योपासनसमिदाहरणादिकर्त्तव्यताप्रतिपत्तिवदुपदेशसामर्थ्याद् अध्ययनकर्त्तव्यताप्रतिपत्तिरिति न
विधः किंवा नित्येन आध्यायनविधिना नित्यस्याप्यध्ययनस्यानुष्ठानेत्तदुपरमे नित्यमध्ययनं स्यादर्थेनुन
शक्यतइत्याह किं चान्यदाचार्यकरणविधिरिति अयमाम्नायः काम्यमानमाचार्यत्वं न तावत्स्वयमेव पुरु
षार्थः परंपरया च सुखदुःखप्राप्तिनिरसोरेव पुरुषार्थत्वात् तत्राचार्यत्वस्याध्यापनमात्रस्य च प्रयो
जनाकांक्षायां दृष्टस्य दृष्टकल्पनानुपपत्तेः द्रव्यार्जनोपायत्वेन च विधिनाषस्मांनुकर्म्मणामस्य त्री
णि कर्म्माणि जीविकायाजनाध्ययने चैव विशुद्धाच्च प्रतिग्रहात इति स्मरणात् माणवकस्य चाध्ययनांग
त्वेन गुरुदक्षिणादिविधानात् अंगिनध्ययनजुष्टायकस्याध्ययनविधेई क्षिणां शुश्रूषां चगे च
नुष्टायकत्वात् द्रव्यामेव प्रयोजनात् अप्रयोजनवत्तयाकाम्यत्वात् नित्यवत् प्रयोक्तत्वसिद्धिरिति उप

११८ गमनात्स्वयमेनेन स्वनित्योऽइति नेत्याह । उपनयनाख्यस्तु संस्कारो नित्य इति ननु प्रायश्चित्तस्याप्यकर
णो दोषः श्रूयते इति तच्चिरकाले तु द्विगुणव्रतमर्हतीति तत्र कथं प्रत्यवायश्रवणादुपनयनस्य नित्यतेति उ
च्यते न प्रायश्चित्ताकरणनिमित्तदोषनिरासाय द्विगुणव्रतमुच्यते किं तु प्रायश्चित्ते न निराकर्तव्यस्य पूर्व
दोषस्यैवातीते चिरकाले द्विगुणव्रताय स्थैर्यव निरास इत्युच्यते न्यथा प्रायश्चित्तानवस्थाप्रसंगात् ननू
पनयनसंस्कारोस्य नित्यत्वेप्यध्ययनस्य कथं नित्यतासिद्धिरिति तत्राह संस्कारश्चेति अंगुपाधिवि
हितत्वादिंगत्वोपहितांगनित्यतां स्वोपधिरध्ययनस्याप्य नित्यत्वं कल्पयतीति ननु अध्ययनमनारभ्या
धीयमानमुमारनयनं कथंमध्ययनांगं स्यात् न वोपनयनसंस्कारे विधिमात्रमेवानुपपत्त्या शेषित्वे ११८
नाध्ययनं कल्पयति श्रुत्यादिविशेषसंबंधनिमित्तप्रमाणाभावे ध्ययनविशेषेण संबंधासिद्धेः यथा

हिरण्यं भार्यमिति विधिः श्रूयते इति हिरण्यसंस्कारार्थोपि श्रुत्यादिविशेषसंबंधप्रमाणाभावात् संस्का
र्ये हिरण्यपदार्थसामर्थ्यात् क्रतुसंबंधे सर्वक्रतुसंबंधप्रसंगात् एकस्य संस्कार्यस्य सर्वक्रतूपकारित्वा
नुपपत्तेश्चान्यांगतामश्नुवानः संस्कारकर्मत्वं परित्यज्यादृष्टफलः स्वतंत्रो विधिरभ्युपगतः एवमुप
नयनविधिरपि श्रुत्यादिप्रमाणविरहात् संस्कार्यमाणवकसामर्थ्यात् क्रतुसंबंधे सर्वक्रतुसंबंधप्रस
गादन्यांगतामनश्नुवानः संस्कारकर्मत्वं परित्यज्य स्वतंत्र एवादृष्टफलः स्यात् कर्मस्वरूपविधिहि
सर्वस्य भावसामर्थ्यादिदं वंगगागीभावं सामान्येन प्रमिमाणां श्रुत्यादिसहकृत एव विशेषसंबंधप्रमिमीतइ
ति इतोपनयनस्य संस्कारकर्मता सिध्यतीति अत्रोच्यते ध्ययनविधिरेव श्रुत्यादिप्रमाणानपेक्षया वानु
ष्ठिके न प्रमाणेनोपनयनमात्मीयांगत्वेन स्वीकारोत्याचार्याधीनो वदेम धीयेत्यादि नियमविधानात्त्वि

पं॰ वि॰ ११९ खितपाठादिगतिषेधे सत्याचार्योपगमनमन्तरेण माणवकाध्ययनानिरत्ययोगात् ननु दृष्टमाचार्योप
गमनमध्ययनविधिसामर्थ्यादुपादीयताम् अदृष्टस्तूपनयनसंस्कारः कथंमगतयीषादि। यतदूच्यते
आचार्योपगमनविधिरेव नानाविधेतिकर्त्तव्यताकलापानुगृहीतो दृष्टं संस्कारमुत्पादयति सचाकिं
विधिप्रयुक्तप्रयोजनमीक्षमाणो दृष्टोपगमनाध्ययनद्वारेणाध्यापने विध्यमकारे संभवति नादृष्टं कल्प
यति दृष्टं कल्पनानुपपत्तेः दृष्टफलातिशये दृष्टे संभवति स्वतन्त्रादृष्टकल्पनानुपपत्तेरित्यर्थः तदेवम
ध्ययनविधिसामर्थ्यादुपनीयमाने सत्याचार्योपगमने तदाश्रितोपनयनविधिजन्यसंस्कारस्या
पितद्वारेणाध्ययनविधिसंबंधस्योपनयनविधिसामर्थ्यादेव सिद्धेरुभयविध्येकयाक्षनसामर्थ्याद ११९
ध्ययनांगमुपनयनविधिरिति सिद्धं ननूपनयनस्य संस्कारकर्मतायां सिद्धायां संस्कारविधेः प्रयो

जनाकांक्षांततश्चाध्ययनविध्याक्षिप्ताचार्योपगमनदृष्टद्वारेणोपनयनविधिरध्ययनांगतामात्मनः
सामर्थ्यात्प्रमिमीते नचोपनयनस्य संस्कारकर्मत्वमप्रमाणमित्युच्यते परस्परोपाधानसामर्थ्यादेवोप
नयनाध्ययनयोरंगांगिभावसिद्धेः किमुपनयनं प्रोक्षणादिवत्संस्कारकर्मतयाग किंवा प्रयोगादि
वदध्ययनफलोपकार्यंगमिति विषये संस्कारकर्मतयांगमुपादीयते ऽगिस्वरूपोपकारत्वामान्संन्नि
यत्वांगत्वात्फलगतत्वात्फलोपकार्यंगानां विप्रकृष्टतयांगत्वाद्विप्रकर्षात्संनिकर्षग्रहणस्य प्रयुक्तत्वा
दतो माणवकसंस्कारतयोपनयनमध्ययनस्वरूपोपकार्यंगमुभयविध्युपादानसामर्थ्यात्सिद्धं किंच
अष्टवर्षं ब्राह्मणमुपगच्छेत्सोऽधीयीतेति वाक्यविपरिणामस्य वक्ष्यमाणत्वात् स्वदृष्कृत्तिरेवोपनयनसं
स्कृतमाणवकमादाय स्वाध्यायाध्ययनं विनियुक्त इति श्रुत्यनुगृहीतत्वेनोपनयनविधिरध्यय

पं॰वि॰
१२०

नांगतमात्मनः प्रतिपादयति तच्छब्देन संस्कारो न परामृश्यते किंतु माणवक एवेति नियुक्तं वचनं च
मेतरप्रकृतत्वात् संस्कारस्याध्ययनयोः परस्परमाकांक्षत्वस्य दर्शितत्वादाकांक्षितसमर्पणत्वाच्च
श्रुतेरविभक्तेऽपि प्रतिपादकस्यान्विताभिधायितया संबंधप्रतिपादकत्वात् तस्माच्छ्रुत्यनुगृहीतस्य
वचनविधिरंगांगिभावं प्रतिपद्यत इति किं च वाजसनेयिनां सर्वस्मृत्यनुमितश्रुतिषु चोपनयनं प्रकृत्या
ध्ययनविधानात्फलवदध्ययनप्रकरणानुगृहीत एवोपनयनविधिरध्ययनांगतामात्मनः प्रति
पादयति तस्मादुक्तः संस्कारोऽस्य स्वाध्यायाध्ययनार्थ इति॥ ॥ ननु काम्यत्वेऽप्याचार्यकर
णविधिर्नित्यसमीहितफलत्वात् नित्य एव ततश्च न नित्यानित्यसंयोगविरोध इति चोदयति न १२
नु कथमाचार्यकरण इत्यादिना फलस्य नित्यसमीहितत्वमंगीकृत्य परिहरति भवदेवं नित्य

ता फलवत्त्वान्न त्यागादिति ननु फलसामर्थ्याद्वा शास्त्रसामर्थ्याद्वानुष्ठेयं नित्यकर्तव्यत्वेन क्रियमाणवि
शेषणं हि यत इति तत्राह तथा हि फलस्य नित्यसमीहितत्वादिति वास्तवी फलवत्त्वसामर्थ्यनिबंध
नेत्यर्थः तत्राध्ययनेन कश्चित्फलसाधनकामनाधीनाकर्तव्यताप्रतिपत्तिः अन्यत्र तु शास्त्राद्धि कर्तव्यताप्र
तिपत्त्यधीनाध्ययने फलसाधनेच्छा किमत्राध्ययनस्य नित्यकर्तव्यताप्रतिपत्तेरायातमित्यत्रा
ह शास्त्राद्धि नित्यकर्तव्यताप्रतिपत्ताविति अस्य त्वविशेषकत्वं अध्ययनविधिर्हि शब्दान्नित्यतया
प्रतिपन्नोऽविशेषेण स्वाधिकारोपाधौ सर्वदा सर्वानुप्रत्यनुष्ठेय इत्यामुत्साधयन्नयति प्रामाणिककर्तव्या
ताप्रतिपत्तेरुपाधौ संकोचाभावादिच्छाधीनेन तु कर्तव्यतावगमेन तु संकोचादेव कर्तव्यतावगमस्य संको
चान्न नित्यत्वमध्ययनसिद्धिरिति ननु प्रामाणिकनित्यकर्तव्यताधीनापीच्छा कविद्देशे कालेवस्था नि

पं०वि०

१२३ चकारकसामर्थ्याभावादिवञ्जत्तो विलास्यतिदूंष्यते तत्र कथं नित्यकर्त्तव्यताधीन नियेच्छाद्वारेण नि
यतदनुष्ठानमिति तत्राहञ्जो विसादिभावपीति प्रमाणनस्तावन्नित्यो ध्यायनविधिः प्रत्यवायभया
देवयातच्छक्यमिच्छादिद्वारेणाधिकारिणमनुष्ठापयतीत्यर्थः तेनेतिस्य ह्यर्थः ननुप्रमाणा
ताविधिनित्यत्वेवदिच्छतोपि कर्त्तव्यतानियत्वं किं तस्यादिति नेत्याह फलवञ्जाभुकर्त्तव्यताप्र
तिपत्ताविव्यनित्येवसास्यादित्यध्याहारः नन्वर्थस्य नित्यसनिहितत्वात्कर्तव्यताप्रतिपत्तेनिमि
त्तका[illegible]प्रि[illegible]त्स्य एवेसत आह यथेति उपेयनित्यत्वेप्युपायभेदादध्यायनकर्त्तव्यताप्युनि
त्यैवेत्यर्थः ननुकस्याचिदुपायांतरसमर्थस्यतदेकोपायात्वाविनकर्त्तव्यत्वेति तत्राह तदेकोपाय १२२
त्वेपीत्यतो नित्यानित्यसंयोगविरोध इति इदानीस्वतो नित्यत्वाभावेपि नित्यपुत्रोत्पादनवि

ध्यापयतयोयनयनाध्यायनयोनित्यत्वात्र नित्यानित्यसंयोगविरोध इति चोदयति ननु पितुः पुत्रो
त्पादनविधिरिति तत्र पुत्रोत्पादनविधेः पितॄणां परलोकगतानामस्मिंल्लोके पिराउपितृयज्ञाद्य
नुष्ठानद्वारेण तृप्तिसंपादनं प्रयोजनं न चोपनयनाध्यायनाधानादिव्यतिरेकेणानुष्ठानं संभ
वति ततश्चानित्यं स्यात्पुत्रोत्पादनविधेः फलपर्यंतताऽपेक्षितमनुष्ठानं तत्त्वोपत्तया विदधातित
स्मात्पुत्रमिति वाक्यं ततश्च पितुरेव नित्यपुत्रोत्पादनविधिसामर्थ्यादुपनयनाध्यायनादिविधी
नां नित्यत्वमागमत् ततश्चार्थज्ञानपर्यंतत्वादनुष्ठानस्याध्ययनमप्यर्थज्ञानफलमित्याहक
थं नाध्ययनस्येति परिहरति उच्यते न हि न पुत्रानुशासनं विधीयत इति अथातः संप्रतिर्यदा
प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति वदेतदर्थं तत्फलानां स्यानुष्ठेया वानुपुत्रे

पं॰वि
१२२

समर्प्यमाणानां सत्पुत्रः प्रत्याह। हं ब्रह्माहं यज्ञोहं लोक इति पुत्रेणानुष्ठेयतया स्वीकरणं संप्रतिकर्मेत्यत्र
च पूर्वानुशासनमंतरेण कस्मादेवं सकलकर्त्तव्यसंग्रहानुपपत्तेः फलपुत्रोत्पादनविधिनाक्षिप्तसम
नुशासनं पूर्वं निर्वर्त्तमेवार्थ्यवादत्वयानुवादत्वेन तद्वाक्यमिति भावः मा भूदेतद्वाक्यमनुशासन
विधायकं तथापि नित्यपुत्रोत्पादनविधिसामर्थ्यादेव पितुरुपनयनाद्यनुशासनविधिर्नित्यत्व
प्राप्त इति तत्राह गर्भाष्टवर्षणेत्यादिना अयमर्थः नित्यपुत्रोत्पादनविध्यधिकारिणः पितुरायु
नियमाभावादनुशासनपर्यंतमवस्थानानुपपत्तेः कर्त्तव्यार्थोपदेशेन मेकमनुशासनं नानुष्ठापनमतो
नित्यपुत्रोत्पादनविध्याक्षिप्तत्तया पित्रोपनयनादिविधेर्नित्यतेति ननु पितुः कर्त्तव्योपदेशेनमे १२२
नुशासनेनोपनयनाद्यनुष्ठापनमिति कथमवगम्यते तदाह तथा च लिंगश्चेत्केनुत्विरि ततश्च नि

त्यानित्यसंयोगविरोधस्तद्वत्स्वत्रायेत्याह तद्देवमनित्येनेति ननु माणवक एव स्वत एकस्मिन्नाचार्यैर
णादिना निरस्ते पुनराचार्यांतरमाश्रित्य नियममध्ययनं संपादयिष्यतीति नेत्याह किंचाचार्यव्रत इ
ति नतावत्माणवकः स्वनियोगेनाश्रयमाणः स्वाधिकारं निर्वर्त्तयितुमाचार्यांतरं संपादयत्यनंगीक
रणात् नाप्याचार्यनियोगात् नाधिकारिणोभावे नियोगस्य कर्त्तव्यताप्रतिपत्त्यभावात्केनव्यानु
ष्ठानाय साधनसंपादनायोगादिति भाव साधनांतरप्रति निष्पादानवदधिकारिणोपि प्राप्ति
निष्पादनेन कर्त्तव्यं माणवकः संपादयेदिति नेत्याह नह्यधिकारीप्रति निधीयत इति अत एव
कर्त्तव्यस्याध्ययनानुष्ठानिप्रत्यवायात्तदनुष्ठानाय हि मुख्याभावे प्रति निधिराधीयते अधिकार्यभावेम
मिदं कर्त्तव्यमिति संबंधानवगमात् अकर्त्तव्ये नियोगे कस्यावश्यानुष्ठानाय प्रति निधिराधीयते नत्त

पं०वि०
१२३

वन्मतस्य तस्य विधिसंबंधनिमित्तनिवृत्तेः कर्त्तव्यत्वात् नापिप्रतिनिषेधेराचार्यस्येदं कर्त्तव्यं तस्य कर्त्त
व्यह्यासिध्युत्तरकारलत्वात्तस्मान्नाधिकारिणप्रतिनिधिसंबंधनन हि सर्वत्रप्राप्तनिधिवार्त्तव्यकारा
इति तत्राहाधिकारी स्वाधिकारसिध्यर्थमिति नन्वाचार्येणैतेन्यः कश्चिदाचार्यः स्वाधिकारं निर्वर्त्तयि
तुं माणवकं स्वीकरिष्यति किं माणवकस्याचार्यांतरकरणव्यापारेणेति न पुनरूपनयनाभावात् उपनेतृ
त्वागस्याचार्यव्यापारस्याभावेंगं ध्यायननिर्वृत्तेर्योगात माणवकांतरेगं निर्वृत्त इति मिति चेन्न तेनैव
ध्ययनस्यापि सिद्धेर्न्न माणवकांतरस्वीकारो निपनितं चाध्यायनपीतांगस्य निवर्त्तत्वात् दृष्टप्रत्यय
थः संग्रह इति चेन्न दुरिडस्य माणवकस्य संग्रहप्रसंगात् अल्पव्ययवहितग्रामवासिनां वमाणवकानां १२३
माचार्यसंपादनयथा मातरंगमनं न स्यात् नहि तत्र तत्राध्याययितारः श्रोत्रिया ह्यवश्यंते तथा च
७८

माणवकस्योपनयनादिसिध्यर्थं स्वयमेवाचार्यगमनं श्रूयते सत्यकामोतावालोब्रह्मचार्य भगवतिव
त्साम्यहं भगवंतमित्यादि श्रुतौ उपसरति एवंस्तेषां बहुदोषेति नु खविधिप्रयुक्तत्वेसत्कगमना
ध्ययनयोस्तत्प्रयुक्ततयोपनाध्यायनसिद्धेः तत्र विधानमनर्थकमिति नायंप्रयोजकव्यापारयो
विधेः किंतुपगमनाध्ययनयोः कर्त्तव्यापारस्यो विधिरस्मादिसायह तस्मान्माणवकस्यैव नियोग
इति ननु णिजर्थसंसृष्टाभिधायिनि विधिपदे कर्त्तव्यापरिविधिसंसर्गो वाक्यप्रमाणविरुद्ध इति
चोदयति कथं गुणकर्तृव्यापारसंबंध इति किं न्यायविरोधउच्यते किंवा शारद्ध विरोधः नता
वच्छृद्धविरोधोन्यत्रापि दर्शनादिसाहायथे तयाग्रामकाम इति नापि न्यायविरोधः प्राप्तानु
वादेनाप्राप्तविधानादिसा हग्रामकमस्य यागो विधीयत इत्यादिनानन्नूपनयनेमा भूत्

पं॰वि॰ ३२४ नन्वाध्यापनयाजनयोः कर्तृप्रयोजकव्यापारत्वावगमादन्यतरानुवादेनान्यतरो विधेय इति युक्तं
उपनयेनेनु धात्वर्थस्य प्रयोजकव्यापारत्वादनमी। धीयमानः कर्तृव्यापारः कथं विधीयत इति चोद
यति युक्तं यजयेदित्यादिना ननूपनयनेनमाभूत्माणवकव्यापारविधिरध्यापनेनुभविष्यति त
त्रवाक्यसारूप्यादित्याह तदेवमाचार्यकरणे विधिप्रयुक्तत्वादिति तत्र प्रयोजकव्यापाराभि
धायिनमपि नयमिति धातुनामाणवकव्यापारस्यानभिधीयमानस्यापि ग्रहणम् ततश्चार्थज्ञा
नपर्यन्तत्वादनुशासनस्याध्ययनमप्यर्थज्ञानफलमित्याह कथं चाध्ययनस्येति परिहरति ३२४
उच्यते न तिनपुत्रानुशासनं विधीयत इति अथातः संप्रतिरिति हाविष मन्यतेथ पुत्रमाह त्वं ब्रह्म
त्वं यज्ञस्त्वं लोक इति वदितत्र र्थतत्फलानां स्वानुष्ठेयावाप्तुपुत्रे समर्प्यमाणानां सुपुत्रः प्रत्याह अहं

ब्रह्माहं यज्ञोऽहं लोक इति पुत्रेणानुष्ठेयतया स्वीकरणं संप्रतिकर्म तच्च पूर्वानुशासनमन्तरेणाकस्मादे
व सकलकर्तव्यसंग्रहानुपपत्तेः फलपुत्रोत्पादनविधिना क्षिप्तमनुशासनं पूर्वं निर्वृत्तमेवार्थवा
दतयानुवादस्येतद्वाक्यमिति भावः माभूदेतद्वाक्यमनुशासनविधायकं तथापि नित्यमुपुत्रोत्पादन
विधिसामर्थ्यादेव पितुरुपनयनाद्यनुशासनविधिर्नित्य एव प्राप्त इति तत्राह गर्भाष्टमेषु इत्यादिना अथ
मर्थः नित्यपुत्रोत्पादनविध्यधिकारिणः पितुरायुर्नियमाभावादनुशासनपर्यन्तमवस्थानानु
पपत्तेरकर्तव्याथोपदेशोनमेकनुशासनं नानुशापनमत्तीनित्यपुत्रोत्पादनविध्याक्षिप्ततया
पिनोपनयनादिविधेर्निसतेति ननु पितुः कर्तव्योपदेशासनमेवानुशासनं नोपनयनाद्यनुश
पनमिति कथमवगम्यते इत्याह तथा च लिङ्गं श्रुतकिनु इति ततश्च नित्यानित्यसंयोगविरोध

पं०वि०
१२५

स्त्वद्धस्थ्यरावेत्याह तदेवमनित्येनेति ननु माणवकस्यैकस्मिन्नाचार्ये मरणादिना निवृत्ते पु-
नराचार्यान्तरमाह्वयतीत्यधिकारानिर्वृत्तिमध्ययनं स्यादिष्यतीति नेत्याह किंचाचार्यप्रति इति
न तावन्माणवकः स्वनियोगेन प्रार्थ्यमानः स्वाधिकारं निर्वर्त्तयितुमाचार्यान्तरस्याध्ययनस्याङ्गीका-
रणात् नाप्याचार्यनियोगनाधिकारिणो भावे नियोगस्य कर्त्तव्यताप्रतिपत्त्यभावात् किन्त्वनु-
ष्ठानाय साधनसंपादनायोगादिति भावः ननु साधनान्तरप्रतिनिष्पादनेन वाधिकारिणो-
ऽपि प्रतिनिष्पादनेन कर्त्तव्यं माणवकाः संपादयेदिति नेत्याह न ह्यधिकारी प्रतिनिधीयत
इति अवश्यकर्त्तव्यस्यानुष्ठानप्रसवायात् तदनुष्ठानाय हि मुख्यवे प्रतिनिधिराधीयते ऽ १२५
धिकार्यभावे ममेदं कर्त्तव्यमिति संबंधानावगमात् अकर्त्तव्ये नियोगे कस्यावश्यानुष्ठानाय प्र

ति निधिराधीयते न तावन्मतस्य प्रत्यक्षविधिसंबंधनिमित्तनिवृत्ते कर्त्तव्यताम्यमानत्वात्स
स्ववधानुना लक्षणयोपादाय विधीयते न प्रयोजकव्यापारः स्वयं प्राप्तेरिति परिहरन्ति उच्यते मा
णवकस्यैवायमिति ननु माणवकव्यापारो गम्यमानस्तथा वा कथं प्रतीयते कथं वा प्रयोजकव्या-
पारः प्राप्तानुवादयतीति चोदयन्ति कथं यत्तावदिति माणवकव्यापारस्य गम्यमानत्वमुपपादयितुं
प्रथममाचार्यव्यापारस्य विधेयतामुपपादयत्युपनयतेस्तस्याभिधानतो न्यायश्चेति माणव
कस्य विहितेऽस्मिन्कर्मणि माणवकस्यात्मसमीपागमनमभिधानतः प्रतीयते यथा बालान्क्षरा-
णि वकसमीपगमनं अन्यथा माणवकमुपगच्छेदिति वचनं स्यात् न्यायतश्च प्रतीयते य-
था बालान्क्षराणि शिक्षयन्लौकिकः पुरुषो न बालगुणभावं गच्छति किंतु बालानेवस्व

पं०वि० यमात्मगुणं भावं नयेति नन्वेवमप्याचार्यव्यापारो नप्राप्तानुवादः कथं शुश्रूषायां संगसहि
१२८ ते ध्ययने माणवकस्य विहितस्य विधिप्रयुक्तेर्वाध्ययने इत्यर्थः तया वा प्रवृत्तिःप्राप्तोतिरित्यर्थे
प्रवृत्तो वशात्तायां तदनुवादेन माणवकः व्यापारो ध्ययनादिर्विधानुशं क्यत इतरेतराश्रयप्र
संगात् ननु यामकामं याजयेदित्यत्रापि समानोयं दोषः अथस्वविधिप्रयुक्तेषु यागान्तरेषु
सामान्येन रस्त्वर्थतयाप्राप्तप्रयोजकव्यापारमनूद्य यामकामस्य यागविशेषो विधीयत इति
तर्हीहापि विध्यन्तरेषु सामान्यप्राप्तप्रयोजकव्यापारानुवादेन माणवकव्यापार उपगम
नाध्ययनादिर्विधीयतां अथवा माणवकव्यापारविधिसामर्थ्यादेव प्रयोजकव्यापारः प्रा १२८
प्यते न प्रयोजकव्यापारविधानेन माणवकव्यापारः प्राप्यत इत्युक्तं तत्र माणवकव्यापा

रविधानादिवं भाविनी प्राप्तिमनूद्य माणवकः व्यापारः कदाचिदप्यप्राप्तो विधीयत इति तदेतदाहे
मत्र सर्वत्र स्वर्थत्वेन ब्राह्मणास्यान्यत एव प्राप्तमिति ननु प्रयोजकव्यापारप्राप्तमेवानूद्य गुणा विक
राधिविशेषविधिपरं वाक्यं किं न स्यादिति न तावदधिकारविधिपरं वाक्यजीवनादिति स्वक
म्याधिकारयोरश्रवणात् अतो गुणविधिरेवद्धातुहानित्यादिवत्सारिशेष्यन इत्याह तत्र कमध्य
ययेदिति भवतर्हि गुणविधिरितिनेत्याह तत्र प्राप्ते व्यापार इति श्रयमाशयः यदि विशेष्यो
पि पदार्थः प्रमीयेत तदा नानागुणविशिष्टतया सएकोपि विशिष्टः पदार्थः प्रमीयत इति न वाक्य
भेदः स्यात् यदा तु विशेष्यमनूद्य विशेषणानि प्रमीयन्ते तदा विशेषण्यानामन्योन्यविशिष्ट
तयैकत्वापस्समावादन्यान्यानपेक्षतमावान्योन्यानपेक्षतया प्रत्येकं प्रमेयभेदाद्वाक्यभिद

पं०वि०
१२८ तइति ननुसर्वत्र विशेष्यं सामान्यद्वारेणानुगाद्यमेवासत्यं- विशेषण्यान्यपितया किंतु विशे
षाकारेणान्यान विशिष्टतया पदार्थाः प्रमीयंत इति तस्मादुत्पत्यस्यकारगुणविधयः प्रयोजक
व्यापारे न संभवतीत्युपसंहरति अतो नाचार्यस्येति तत्र माणवकव्यापारस्य गम्यमानस्यैव
धातुनासमर्पयाणयोपादायो विधेयत्वं दर्शयितुं चोदयति ननु माणवकस्यापीति परिहरं
ति अस्तीति ब्रूम इत्यादिना ननु कर्तृव्यापारेवशो गमनादिषु दृश्यत न कर्मकारकस्य ग्रामदे
माणवकश्च नयत्यर्थकर्मभूतः कथं गम्यमानव्यापार इति चोदयमिति कथमिति परिहर
तियद्वेवायनपीमेत्युपनयनसंस्कार्योपीत्युपगंतापीत्यर्थः नयत्यर्थकर्मणो नीयमानस्येति ग १२८
मनव्यापारः सुप्रसिद्ध इति भावः ननु तर्हि माणवकस्य गमनप्रयोजकव्यापारो दैवसिध्यति

किमिति तद्विधीयत इति न विधामंतरेण सिद्धिरित्याह तस्य वयेक्षाप इति ननु विधानेपिका
म्यविधिः स्यादिति नेत्याह विद्यमानस्यापीति कथं तर्हि विधिरिति परिशेषान्नियमविधिरित्या
ह विधितो वश्यकर्तव्यतामिति कथं तर्हि वाक्यं परिणम्यत इति तदाह तेनाष्टवर्षं ब्राह्मणमिति
ननु नियततया विधेयत्वेपि विधिपुरुषसंबंधो वा विधिपुरुषसंबंधनिमित्तं वा प्रवृत्तिर्वाधिकारश्रा
वणं न लभ्यत इति चोदयति नैवमप्यधिकारो न लभ्यत इति अयमाशयः ननु सामान्येन गम्यमा
नस्यायं गं नुर अष्टवर्षं ब्राह्मणमिति विशेषणश्रवणादिदमेवाधिकारनिमित्तं संपत्स्यते नैवं स्यैकैकस
विशेषणस्याधिकारनिमित्तत्वानुपपत्तेः विशेषणयोश्च परस्पराविशिष्टताभावादेकैकस्यावि
शेषणस्यभावादिभिधानिकेक्रियासंबंधेरुणयेकहायन्यादिवदर्थात् परस्पविशिष्टतयाधि

पं०वि० १२८ कारनिमित्ततेति चेन्न विधिपुरुषसंबंधनिमित्तस्याधिकारत्वप्रसंगादिति परिहरति अस्यत्रा
धिकारहेतुर्नित्यनिमित्तमिति विधिपुरुषसंबंधस्य प्रवृत्तेर्बहिर्हेतुरित्यर्थः नित्यमिति यावत्पु
रुषविशेषस्य नियतभावीत्यर्थः नन्वत्राद्यमेव सर्वत्राधिकारनिमित्तं सांगकर्मानुष्ठानसा
मर्थ्यस्याप्यत्राद्यस्याधिकारनिमित्तत्वाद्यक्तस्यादिमि कारादिति अथवा क्रियासंबंधाभिधा
नमुखेन विशिष्टसमर्प्पणशाब्दद्यत्तात्यर्थकल्पनादाधिकारनिमित्तस्याशाद्दत्वे न विहन्यते ए
वमपि विशिष्टस्यानाधिकारनिमित्ततेति वादयति ननु जातिवयसी विशेषणमुपादेयस्य।
ति अयमभिसंधिः उपादेयनाम साक्षात्परंपरस्या वा विधिविषयतयानुष्ठेयं तद्विशेषणं १२८
च क्रियाकारकतद्गुणसमदायइत्यर्थः न चोपादेयविशेषणानि दंडीप्रेषानन्वाह लोहितो

ष्णीषाः ऋत्विजः प्रचरेतीति कर्तृविशेषणानि व्रीहिभिर्यजेतेत्यादौ वहुत्वादीनि करणविशेषणानि
ज्ञायस्वरातुद्रत्यादीनि संप्रदानविशेषणानि न चोपादेयविशेषणमधिकारसंबंधनिमित्तमनु
पयकारकविशेषणविधितयाविधिप्रतिगुणभूतत्वादधिकारिणास्तु विधिप्रति स्वामितया
प्राधान्येनान्वयात्कथं पुनरत्र माणवकस्योपादेयत्वमवगम्यते उच्यते प्रयोजकव्यापारं प्रतिमा
णवकस्य कर्मताभिधायिनी द्वितीयाविभक्तिः स्वव्यापारं प्रति कर्तृत्वं गमयति कर्तृविषयत्वा
प्रयोजकव्यापारस्य तत्र प्राप्ता प्रयोजकव्यापारानुवादेन कर्तृव्यापारो संबंधमात्रं परिणम्यते न
त्वाकृष्यमाणवकत्वपराक्रिया इत्युपादेयमाणवकविशेषणमधिकारहेतुरिति वि
धिप्रयुक्तानुष्ठेयतद्विशेषणव्यतिरेकेण विधिसंबंध्यनुपादेयो यथा जीवन् गृहदाहवानू स्वर्ग

पं०वि०
१२९

कामइत्यप्रसिद्धानेनपरिहरन्तुनियोगपक्षमंगीकरोतिसमस्तमस्तीयंस्थितिरिति अयंभावः
यत्रातिङादिप्रत्ययेननियोगोवाक्यार्थतयाप्रतिपाद्यतेतत्रवाक्यार्थभूतनियोगाकांक्षानिमित्तत्वा
त्पदार्थांतरसंबंधानांनियोगस्यचकस्यकस्मिन्नितिस्वरूपोपाधित्वेनवाधिकारिविषयसापेक्षत्वा
त्स्वर्गकामादिर्नियोगाकांक्षायामधिकारित्वेनसंबध्यतेममायंनियोगइतिस्वामितयान्वयित्वंनि
योज्यत्वमधिकारित्वंनामतत्रप्रथममममायंनियोगइतिप्रतिपद्यनियोगस्यकार्यतावगमानंतरमनु
ष्ठानायधात्वर्थविषयेपश्चात्कर्तृतयान्वेतिनियोगोहिसाध्यतयावगम्यमानःप्रथमान्वयिनोधि
कारिणोममायंनियोगइतिप्रतिपत्तिंनियोगनिर्वृत्तिसमर्थधात्वर्थकर्त्रन्वयमंतरेणानुपपद्यमा १२९
नस्तदन्वयमर्थायत्तंप्रतिपादयतासाधिकारान्वयपुरस्सरःकर्त्रन्वयइतिप्राभाकरामन्यते तत्रभ

वत्वनुपादेयविशेषणमधिकारहेतुःभावनावादेत्वनुपादेयविशेषणमप्यधिकारहेतुरित्याह
किंतुकर्तुरधिकारइत्यपस्थितान्यायविदइति अयमाशयः लिंगादिप्रत्ययैर्यदापुरुषप्रवृत्तिभा
नावाक्यार्थतयाप्रतिपाद्यतेतदाप्रधानांशादिमितत्वात्संबंधस्यक्रियायाश्चस्वरूपोपाधित्वेनम
र्त्तुंकरणमपेक्षणीयत्वात्पुरुषार्थधात्वर्थयोश्चानायत्तकरणत्वेनान्वयात्सरिशेषात्स्वर्गकामाद
यःकर्तृत्वेनान्वीयंतेतत्वश्चकर्तृविशेषणतयाविविमार्थातिजीवनगृहादाहकामनादीनितत्रप्र
थमंकर्तृत्वेनान्वयंप्रतिपद्यकर्तुरेवफलसंबंधात्मदीयमिदंफलसाधनंकर्मेतिकर्मस्वामित्वल
क्षणमाधिकारान्वयंपश्चादनुभवतिकर्मफलभोक्तृत्वमेवहिकर्मणिस्वाम्यान्वयइतिततश्चाम
र्त्तंविशेषणान्येवतस्यैवफलभोक्तृतयाकर्मणिस्वाम्यन्वयंनियमयंतीतिकर्त्तुरधिकारस्थितिः

पं॰वि॰ ३२ एवंभावनावाक्यार्थोपादानेनापि माणवकस्याधिकारसिद्धिरिति भावः अथवा यथा राजसू
ये राजत्वं कर्तृविशेषणमप्यनेनाधिकारिणा राजत्वस्य कर्तृतया विशेषणतया संपाद्यपितुमाश्रि
त्वादधिविशेषणमपि संपद्यते तद्वदिहापि स्यादिति ननु नायं परिहार उपपद्यते श्रेयःसाध
नस्य लिंगादिप्रत्ययैर्वाक्यार्थत्वेनाभिधीयमानत्वादस्य च प्रथममधिकरणान्वयोपेक्षत्वात् कु
तः श्रेयो हि भोक्तारमपेक्षते अतस्तत्साधनमपि भोक्त्रन्वयि भवतीवस्यादश्रेयःसाधनं प्रमेदमभि
लषितसाधनमिति च स्वान्वयाकांक्षादर्शनात् कस्यायं नियोगो ममायं नियोग इति व
द्भावनानुक्रियाकर्त्रश्रियतया वक्ष्यमाणात्तमपेक्षते ननु श्रुतियोग्यमेव श्रेयःसाधनं विधिः ३२
कर्तुरिच्छयाऽयाविधिरिस्वरूपगमात् ततश्च क्षतिः कर्तारमपेक्षते इति तर्हि नियोगस्या

धिकार्यत्वयावगमान्नरूममिति निमित्तः कर्तृन्वय एव स्यात् ननु कृति नियोगोपसर्जनतयैव त्व
देवाभिधीयते न चोपसर्जनाकांक्षयापदार्थान्वयः किंतु प्रधानाकांक्षया न तत्र प्रधाननि
योगाकांक्षया प्रथममधिकारान्वय इति समानमेतदिष्टसाधनेऽपि कृत्युपसर्जनतयाभि
धानात् ननु श्रेयसोऽप्युपसर्जनत्वात् सामर्थ्याल्लभ्यो भोक्त्रन्वयः कथं साधनस्यास्त्येष दो
षः साधनत्वस्य सोपाधित्वात् श्रेयसस्तस्य च नियमेन भोक्त्रन्वयात् कर्तृभोक्तृसाधनेन साधनस्य
सोपाधिश्रेयोनुसारेण भोक्त्रन्वयनियमसिद्धेः तस्मान्ममाभिलषितसाधनमिति प्रथम
मधिकारान्वयो वाक्यार्थभूतेन विधिना श्रेयःसाधनेनापेक्ष्यते यत्र स्वादभिलषितसाधनत्व
स्याश्रयधात्वर्थविषये विधिसामर्थ्यादेव कर्त्रन्वयः प्रतिपद्यत इति एवमपि तत्र नाविरो

BHAU DAJI

पं०वि० धइत्याह किंनेहनमाणवकोजातिवयोविशेषउपादेयइतिचेद्वोपनयनाध्ययनादिमा
१३१ णवकव्यापारस्यसामान्येनाभिलषितसाधनत्वलक्षणोविधिःशब्देनप्रतिपाद्यतेतत्रासा
मान्यस्यश्रेयोविशेषाकांक्षायांपरंपरयापुरुषार्थसाधनमुपनयनेसंस्कारंमाणवकंग
तश्रेयोविशेषपरिकल्पितसाधनत्वलक्षणोविधिर्माणवकव्यापारप्रतिपादितोभवति त
तःसंस्कारफलभोक्तृतयाविधीयमाणवकःस्वामित्वेनान्वेतितत्रचस्वामितियमार्थब्राह्मण
पादिविशेषणंतच्चैवपश्चादभिलषितसाधनत्वविधेयमाणवकव्यापारेकर्तृत्वनियम
यतीतिग्रन्थार्थः ननुप्रयोजकव्यापारविषयतयाकर्तृत्वेनैवान्वयोवाक्यात्प्रतिपन्नःसत्य १३१
तत्रविधिसवधर्म्मसामर्थ्यात्भोक्तृत्वंप्रतिपद्यकर्तृत्वनियमःकल्प्यतेनत्वमप्यधय

नस्यनस्याधिकारनासिद्धिरितितत्राहतदेवमुपनयनस्याध्यापनार्थत्वादिति प्रसिद्धत्वा
त्रिषुपनयनमध्ययनांगमिति वाजसनेयिनंयनयनेप्रकृत्याध्ययनंविधीयते विधिश्चसा
मर्थ्याच्चोपादानप्रमाणंदर्शितइत्थापितमध्यापयीतेत्युपनीततच्छन्दनयरामच्छास्त्रगामिनोन्न
काधिकारत्वादुपनीतोब्राह्मणोधीयीतेतिसंपद्यतेत्र्यगाधिकारनिमित्तस्यकालस्यसर्वत्रा
गिन्यन्वयनियमाभावात्प्रवपसोनाध्ययनाधिकारनिमित्तमिति ननुनित्याधिकारेणा
प्यध्ययनविधिनार्थावबोधभाव्यातमितिनेत्याह्यक्षरग्रहणभावेचेति ननुसत्स्वध्ययन
देवनित्याध्ययनविधिसिद्धेरावृत्तिःकेवलभ्यतेअर्थविबोधफलपर्यायकथंलभ्यते फलाव
तानानुपपत्त्येतिचेद्दिहापिसमानभक्षणवास्तेःफलत्वात्तदृष्टमेवविधिफलमित्युक्तंस

मानमर्थावबोधपक्षेपि न न्यूनत्वमापि दृष्टफलमर्थावबोधस्तस्य वाक्षरस्वीकरणविचाराद्यप
क्षितेत्तदर्थमारब्धिसिद्धिरिति नत्वारभ्यतां तर्हि पुरुषयत्नाक्षेप्यपत्नीकृतेभ्योर्थावबोधदूरेन
तु न तदर्थमारब्धापेक्षायुक्ता जपस्वाध्यायविधिसामर्थ्याच्चाक्षरस्वीकरणायारब्धिः कृत्स्ना
तेनार्थावबोधसामर्थ्याध्ययनमारब्धव्वाधीयमानानामापि पर्यन्तव्यापारस्य मुख्यपारब्धाभि
धायकः सत्कृदुच्चारणादेगोणत्वादारब्धिसिद्धिरिति ननु वेदस्यैवाप्यनिरपेक्षतया विचारहे
तुत्वं वदन् भाष्यकारो ध्ययनविधेर्न विचारमाहेति चोदयति ननु चैवमधीतो वेद इति सत्यं वि
चारस्य प्रयोजकोन्तरविधिपदं अनद्वारेण विचारहेतुस्वाध्यायोनाध्ययनविधिविधेयतादरेणे १३२
ति परिहरति सत्यं तथैव तस्तृत्यादिना ननु स्वाध्यायारापात्तप्रतिपत्तौ तरविधिरनिश्चितः कु

थं विचारं प्रयुक्त इति तत्राह अथातो वेदोऽधिकरणीयानि त्यर्थः आपाततः प्रतिपन्नानामुत्तरविषयवी
चीनामनुष्ठेयनिर्णयस्तानसापेक्षत्वात् तत्प्रिपया यथा विचारप्रयोजकत्वमिति काम्यगम्यविचारम
ध्याधानवत्फलकामनेव प्रयुक्ते ननु लोके विधिप्रयुक्तिकल्पनाद्वारमध्ययनविधिप्रयुक्तिकल्पनं नवि
चारस्य नानिधेयतदुपकारिव्यतिरिक्तस्य विचारस्याप्रयोजकत्वादध्ययनविधेरिस्फलत्वात्
अर्थावबोधफलत्वाभावात् अवघाताद्विबत्फलापेक्षयापि न विचारविधिरिस्फलत्वाद्धुतरवि
धिविधेयोपकारित्वात् विचारस्य तत्प्रयुक्तिः संभवति प्रतिवाक्यनिर्णयज्ञानभेदाच्च विधिभेदो नावि
रुध्यते अन्यथा यागाद्यनुष्ठानस्याप्यध्ययनविधिप्रयोज्यत्वं स्यात् स्वर्गादिसिद्धिपर्यन्तत्वात् अध्य
यनविधिफलस्य ननु अध्ययनविधिप्रयुक्तं किं न स्यात् अध्ययनमन्तरेण विचारनिर्णयपक्ष

पं०वि० १३३ तुधानाधप्रसिद्धेरितितत्राह अतः प्रागध्ययनादप्रतिपत्तेरिति प्रागध्ययनादुत्तरविधिनामप्र
तिपत्तेनाध्ययनप्रयोजकत्वमित्यर्थः अध्ययनविधिश्चसंध्योपासनादिविधिवन्नित्यादिभ्यः श्रू
यमाणः प्रवर्त्तयतिनचसकलोत्तरविधिनामध्ययनात् प्राक्श्रवणं भवतीत्युक्तो अस्तितर्हिब्रह्म
ज्ञानस्यापि त्रैवर्णिकाधिकृतोत्तरनित्यविधिप्रयुक्त एव विचार इति नेत्याह न तथा ब्रह्मज्ञानामि
ति नतधर्मब्रह्मविभागसिध्यर्थं नित्याग्निहोत्रादिविधेरेवब्रह्मविचारयत्यायात् दर्शनेनैव
विधित्वभूतवस्तुविषयत्वात्तस्मादित्यवांतरप्रकारेणोपसंहारः तदेवमितिमहाप्रकारेणोप
संहारः नन्वोंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्वा विनिर्यातौ तस्मान्मांगलिकावु १३३
भावितिमंगलार्थत्वादथशब्दस्यशास्त्रारंभे च शिष्टाचारपरिपालनाय विघ्नोपशांतये च मंग

लाचरणं कर्त्तव्यमिति तदर्थोथशब्द इति नेत्याह मंगलस्यापीति नतावन्मंगलं ब्रह्मजिज्ञासायाः
कर्तृकरणभावेनवान्वयार्थेन्वेतिकर्त्राद्यन्यतमभावेप्रमाणाभावात्कारकांतराणां विद्यमानत्वाच्चनापि
सामानाधिकरण्येनान्वयप्रसंगजिज्ञासामंगलमितिप्रशंसापरतयार्थवादत्वप्रसंगान्नतु कर्त्तव्यमेव
मंगलाचरणमिति तत्राह श्रुतिमात्रेणयोगादिति ननु प्रकृतादर्थादर्थांतरविवक्षयाप्यथशब्द
प्रयुज्यते मथार्थांतरेभिनेत्यंतरविवक्षयाप्रवृत्तीस्यथैवमन्यस इति तदर्थोप्यथशब्द इति चोदयति नन्
प्रक्रियमाणादिति हेतुफलभावेनानंतर्यविधाने प्रकृतादर्थादर्थांतरत्वमंतरेणतया सिध्यतीति
तात्पृथग्वक्तव्यमिति परिहरति नैतदानंतर्यव्यतिरिच्यत इति नन्वर्थांतरमेवाभिधायानंतर्यमंतरे
णैनं किमिति न गृह्यत इति चोदयति कथमिति तत्र किं नियमेन पूर्ववृत्ततया हेतुभूतो वस्तुविशे

पं०वि०
१३५

षोऽवयोगस्ते किं वा यत्किंचिदस्तु पूर्ववृत्तमपेक्षत इति तत्र न तावत्प्रथमः कल्पः आनन्तर्याभिधानमन्तरे
ण हेतुतया पूर्ववृत्तवस्तुविशेषनियमासिद्धेरित्याह एवं तत्र क्रियमाणस्य नियमेन पूर्ववृत्तमित्यथोत्तर
कल्पस्तत्राह अन्यथा यस्मिन्कस्मिंश्चिदिति नन्वानन्तर्येऽपि हेतुतया पूर्ववृत्तं नावगम्यते सर्वं पुष्कलका
रणात्फलस्यानन्तर्यमेव मुख्यं भवत्यवधानादव्यभिचाराच्चाहेतुफलयोस्त्वानन्तर्यं कदाचिद्ग्रामिवरे नि
ष्टाविश्रुवधीयते चेति गौणमेव स्यात् तस्मान्मुख्यानन्तर्याभिधानेन पूर्ववृत्ते पुष्कलकारणेव द्योतितर्थां
तरभावोऽर्थान्तरं भवति नाथान्तराभिधाने मुख्यमानानन्तर्यमन्तरं भवति स्पष्ट संहरति अतो हेतुभू
तार्थोपेक्षितव्य इति उक्तेऽर्थमाथभवतरयति तदेतदाहेति ननु फलं वेद्दृश्यते किं पुष्कलकारणाव १३५
गमेनानाधिकारिविशेषणत्वेन फलपर्यन्ते च यावद्विचारादिप्ररोगभति पत्यपेक्षतेत्यादित्याह स

वानन्तर्यार्थ इति ननु प्रस्तानमेव पूर्ववृत्तं धर्मजिज्ञासासूत्रे इत्याशंक्याह स्वाध्यायानन्तर्यं नुस
मानमिति भाष्यार्थं विवृणोति येन विनानियमेनासादिना योजनान्तरमाहाथवेति न पुष्कलका
रणमित्यर्थः ननु वेदाध्ययनविधिप्रयुक्तस्वाध्यायाध्ययनस्यैककर्मावबोधप्रयोजनत्वे वक्तव्ये ध्ययनविधि
प्रयुक्तत्वाभावेऽपि स्वतन्त्रवेदार्थविचारस्यैकफलप्रयुक्तत्वाद्धर्मब्रह्मविचारयोरन्योन्योपकार्योपका
रकभावेनैकफलत्वाद्वोपतावुपकारकधर्मवबोधानन्तर्यमुपकार्यब्रह्मावबोधस्योच्यत इति चोदय
ति नन्विह धर्मावबोधानन्तर्ये विशेष इति धर्मब्रह्मविचारयोरुपकार्योपकारकभावं दर्शयति
तथाच वक्ष्यन्तरेण। वर्णितमित्यधिकारः प्रवृत्तिः संस्कारफलं वरन्ति परंपरया फलपरंपरया वेदै
र्थाथवा संस्कार इति कर्मभिः पुरुषसंस्कारोऽभिधीयते शास्त्रत इति वत्तत्रप्रमाणमुच्यत इत्यधिग

पं०वि०
३३५

तानंतरं धर्माधिगत्यनंतरमित्यर्थः अस्मिन्नर्थे शास्त्रकारसंवादांतरमाहान्यापि स्वरतोनर्णितमित्या
दिना एकफलत्वं तावन्निश्चनुनतावत् धर्मब्रह्मजिज्ञासयोः उपकार्योपकारकभाव इत्याह नध
र्मजिज्ञासायाः प्रागप्यधीतवेदांतस्येति माध्यार्थविवरणोतिवेदांताध्ययनं यद्यपि स्यादिना ननु धर्म
जिज्ञासायां न्यूनत्वमेव प्रामाण्यं यदपदवादार्थवादर्थतदृपेक्षितत्वान्न कलायस्यैवत्र सविचारादि
नुरुपक्रमत इति चोदयति कथमिति अनुपकारदर्शयितुं धर्मजिज्ञासां विभजते तत्रतावद्धर्मजिज्ञा
सायां त्रयं रत्नमिति त्रिविं तद्दिति द्वादद्वादशलक्षण इत्यादिना तत्र न्यायसहस्रं अनुपकारं दर्शयितुं
न्यायमपि विभजते तत्रयः प्रथमसूत्रे इत्यादिनाध्ययनविधेरर्थावबोधफलपर्यंततावेक्षिता ३३५
न्यायो अथ शास्त्र सूचितः प्रथमे पादेन चयावान्वेदप्रामाण्यपेक्षितोन्यायः स सर्वोपेक्ष्यतां प्रथमस्यपा

यादस्य धर्मब्रह्मजिज्ञासयोः साधारणत्वात्तदानंतर्यं धर्मजिज्ञासानंतर्यमित्यर्थः नान्विहापि शास्त्र
त्वानित्यत्वादेर्जरावचनिरस्तत्वमित्यादेर्वेदप्रामाण्यपेक्षितो न्यायः सूचितया कुतः प्रथमपादापेक्षेति सुसंग
मिहेत्येतदुक्तमितिन विरोधः ननु श्रुत्यादिलिंगाप्रामाण्यानामिहापेक्ष्यमाणत्वादत्तरोपिन्यायः पूर्ववत्तत्
यापेक्षत इति नेत्याहेत्तरस्यनुपनाशिति उत्पत्तिविनियोगप्रयोगाधिकारविधिकार्यापेक्षितो हि न्या
यस्तत्र प्रतिपादितो न चानुष्ठेयभूतवस्तुप्रतिपादने सानुप्रयुज्यते कार्यार्थिसाम्येपि प्रसध्याय म
कांतरप्रमेयभेदेन न्यायभेदो येक्ष्यते किमुवक्तव्यमकार्यभूतवस्तुप्रमेयमेदितिभावः श्रुत्यादयस्तु
लोकप्रसिद्धाएवोपादीयते ननु कात्स्निप्रतत्याब्रह्मप्रतिपन्निर्णितामितिनेत्याहयतो न निरस्ता सि
द्धोपेति अप्रतिज्ञातस्याप्यपेक्षितन्यायो न्यायत्वेन दर्शित इति नेत्याहानंतसन्निपादन सामर्थ्यं दर्शि
ननु गुणोपसंहारेणाविध्यपेक्षितोपिन्यायस्तूपजिव्य इति तत्राह यत्तु नः प्रथमं तत्र सिद्ध इति ५

पं॰वि॰ ननु सगुणविद्यापि ज्ञानमेवेत्यत आह तत्र च मानसी क्रियेति तद्वदभिरूपसंहारः मा भूद्धर्मजिज्ञा
१३६ सातत्तदर्थमर्थविद्याशास्त्रविचारानंतर्यस्यादेवेति नेत्याह यत्पुनः स्वाध्यायस्यार्थावबोधोपयोग इति
नच वेदाः प्रमाण्यमित्येतावताब्रह्मविचारे नैकायासवहुक्तेः कश्चित्सर्वतत्त इत्यर्थः तर्हि धर्मनिर्णय
ज्ञानं ब्रह्मजिज्ञासाधिकारहेतुरिति नेत्याह यस्तु नारिति उपयुज्यमानो धर्मनिर्णयो ब्रह्मविचा
रउपयोगि स्यात् किं वा ब्रह्मनिर्णयायोपयोगीति वक्तव्यं न तावत्प्रथमः कल्प इत्याह नह्यनेन विषयं ज्ञान
मिति नापि द्वितीय इत्याह तदपि हि नास्तीति कार्यकारणसंबंधप्रपंचेनापि ब्रह्मानुमानाच्च धर्म
निर्णयायेक्षेतिभावः परिशेषात्कर्मणामुपयोग इत्याशङ्क्य ततः कर्मणामुपयोगस्तोति शिष्यत इति १३६
तदपि न संभवति कथं विमृश्यास्वितिभावः तत्राधिकारपरंपरया ब्रह्मज्ञानोपकारश्चेन्न संभव

तीत्याह केयमधिकारपरंपरेति नन्वनुष्ठानं परंपरेयं यथा हि संध्योपासनमारभ्य पूर्वपूर्वाल्प
तरकर्मप्रहाणेनोत्तरोत्तरकर्मोपादाना सहासंबंहरे निरतिशये कर्मणा पास्ततः परिशेषात् ब्रह्मज्ञा
नेन वर्ततीति नेत्याह यथा नावस्थासा दृश्मारूढ्सोरिति उत्तरकर्मोपादानात् पूर्वकर्मपरित्यागपरि
षाद्ब्रह्मज्ञानावतारे च प्रमाणाभावादितितर्हि परंपरया कर्मलक्ष्य कर्मफलावाप्तौ तत्र कामनाभाव
नित्यत्तकामः परमानंदकामनया तत्रावतरतीत्याशङ्क्य तेथकामोपमाना इति तदेव प्रपंचयति तथा
ला च सार्वभौमादीति अधिकारपरंपरया फलपरंपरयेत्यर्थः परिहरति कर्मानुष्ठानानंतर्यतां हि
प्रकृत्यमिति कर्मानुष्ठानफलप्राप्त्यनंतरभाविलोद्ब्रह्मविचारस्य न मनुष्याधिकारशास्त्रत्वंस्यादि
त्यर्थः किं च कर्माण्यपि ब्रह्मज्ञानस्यान्यथोपकुर्वंतीति तिन कामप्रविलयनद्वारेणेत्याह कथं वा क

पं०वि० मावासिः कामोपशमहेतुरितिसत्यमित्यतःआह्नःस्पष्टार्थः हैरण्यगर्भादिभोगानांप्रासातिक्षणं
१३८ क्षीयमानत्वादनागतभोगनिवृत्तकामनोपपत्तेनकामविलयनेनब्रह्मज्ञानविलाइत्याह सत्यमुक्तंयथा
हैरण्यगर्भोभोगइतिकुतस्तर्हिसर्वेषांकामविलयइति तदाहात्मोविषयस्यक्षयादिदर्शनादिति
स्मात्सर्वत्रस्कपसंहरति किंचनखिलविषयावाप्तौकामपशमःशास्त्रसामर्थ्यादुच्यते किंवान्वय
व्यतिरेकसामर्थ्यत्राद्यइत्याह नचैवंलक्षणेआगमइति तत्रान्वयव्यतिरेकसामर्थ्यादितिचोदय
तिननुकामावाप्तोविति परिहारयंथःस्पष्टार्थः वैदिकशास्त्राःसर्वेसंभूयदेहात्मत्वादिज्ञपववित
यप्रतिमितिपराइतित तेषोधिकारःसचप्रतितिविरोधादेवनिरस्तइति ननुतर्हिकर्माण्यनुष्ठी १३८
यमानानिपुरुषसंस्कारतयाब्रह्मज्ञानकार्याण्यतोधर्मानुष्ठानानंतरंब्रह्मजिज्ञासेतिचोदयति भव

नुतर्हिसंस्कारद्वारेणेति ननुसर्वस्तेपुरापलोकाभवंतीतिसंततंपुरुषार्थसाधनानरंकर्मणा कथंसंस्का
रकर्मतयाप्रोक्षणादिवद्गुणकर्मतास्मृतिसामर्थ्यादितिचेन्नश्रुतिविरोधान्नत्रुसंस्कारोनामगुणाध
नादितियोगिनःकर्मकुर्वंतिसंगत्यक्त्वात्मशुद्धयइतिआत्मनिमलापकर्षःसंस्कारःसिध्यतिविध्य
न्यथानुपपत्याचात्मन्यपूर्वगुणाधानंगम्यतेतःश्रुत्यवगतमेवसंस्कारकर्मत्वंइदमेनेनांगंसास्थित
तइतिश्रुतेः नचक्रत्वंगद्रव्यसंस्कार्यतयानित्यकर्मणामितिकर्तव्यतोच्यतेयेनसंततंवफलवि
शेषस्यात् किंनुद्रव्याजनविधिवदुपकारमात्रमिति सत्यपापक्षयापूर्वलक्षणसंस्काराद्भ्यफल
लश्रूयेवगतनब्रह्मज्ञानशेषताइाकाभरस्यैनुस्मृतिसामर्थ्यादिति उच्यते नित्यनैमित्तिककर्मानु
ष्ठानैःसंस्कृतस्यात्मनोयदिश्रवणमनननिदिध्यासनाभ्यासादीति ज्ञानसाधनानिसंपद्यतेतदासंस्कार

१०वि० कर्माणि सहकारिविशेषादात्मज्ञानमवतारयंतीति यदा तु सहकारिकारणविरहस्तदाक्षयफल
१३९ मिति व्यवस्थोपपत्तेर्न श्रुतिस्मृत्योः परस्परविरोधः ननु यस्यैतेऽष्टचत्वारिंशत् संस्कारा इत्यत्र स ब्रह्म
णः सायुज्यं सालोक्यं च गच्छतीति सालोक्यलिंगाद्धिरण्यगर्भावाप्तिः संस्कारफलं गम्यते न परब्रह्मा
वाप्तिर्येन सहकारिसामर्थ्यात्कर्मणानुरूपसंस्कारेण मोक्षफलता स्यात् उच्यते संस्कारशब्दस्या
वद्धि व्रीहिसंस्कारवत्स्वतंत्रफलसाधनांगभूतद्रव्यशोधकतां कर्मणां प्रतिपादयति तत्र सर्वक
र्मणां संस्कारतयान्वयासंभवे विशेषार्थापत्त्यानात् ज्ञानशेषतया मोक्षफलता कल्प्यते ब्रह्मणः सा
युज्यं सालोक्यमिति च फलद्वयोपादानात् तथेति भगवानाह स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः १३९
नैष्कर्म्यसिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे इति चारभ्य बुद्ध्या विशुद्धया युक्तो धृत्या

ज्ञानं नियमवान् ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरमि
ति च कृत्वा नित्यकर्मभिः संस्कृतस्य सिद्धिशब्दाभिधेयविशुद्धांतःकरणस्य ध्यानयोगादिसहका
रिसंपत्तौ ननु ज्ञानजन्मद्वारेण मोक्षं दर्शयति स्वे स्वे कर्मणीति तत्र नित्यकर्माण्युच्यते सिद्धिश
ब्देन चात्मनैर्मल्यं ब्रह्मज्ञानयोग्यतापत्तिरुच्यते परमसिद्धेस्तत्राभिधानात् योगिनः कर्म कुर्वन्ति सं
गं त्यक्त्वात्मशुद्धये इत्यत्र चान्यत्र तथा महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ननु ज्ञानमुत्पद्यते पुंसां क्षया
त्पापस्य कर्मणः कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते इति वचनस्य संस्कारशब्दसामर्थ्याल्लभ्यं
तरश्च नित्यकर्माणि मलापकर्षगुणाधानलक्षणपुरुषसंस्कारद्वारेणात्मज्ञानयोग्यतामाप
द्यत ज्ञानजनकतया मोक्षं ज्ञानेन सह समुच्चीयंते तथा व्रीहिप्रोक्षणादीति संस्कारकर्माणि

पं॰ दिं॰ १३९ दर्शपूर्णमासस्वरूपोत्पत्तिहेतुतया स्वर्गे समन्वीयत इति ननु प्रोक्षणादेर्वेदेऽधिकारतया गुण
कर्मत्वे वानैत्यकर्मणः शामानात्व्रह्मज्ञानस्याविधेयत्वादात्मनः संस्क्रियमाणस्याविधेयकर्मगु
णत्वाभावाच्च न हि संस्कारकर्मता विहिता गङ्गाद्यसंस्कारकर्मसु तत्राप्रसिद्धेनाविहितभोजनाग
ह्यादिसंस्कारप्रसिद्धेः ननु विध्यहेतोः करणतया विहितानां नित्यकर्मणां करणता विरोधिनी वि
ध्यादिसंस्कारवदात्मज्ञानेतिकर्तव्यतापि नेष दोषो यथैव विता सोत्रामण्या यजेत वाजपेयेन बृ
हस्पतिसवेन यजेतेति सोत्रामणिबृहस्पतिसवयोरन्यवकरणतया स्वतंत्रविध्यंतरविहित १३९
योरप्यग्निचयनराजसूययोगतयेतिकर्तव्यतादर्शनात्तत्र करणेतिकर्तव्यताविधिवाक्यप्रमा
णभेदात् युक्तं सौत्रामाणपोदरूभयथात्वमिति वेत् इहार्थविरोधाभावे सति नित्यवि

धिविसामर्थ्यात् संस्कारस्यानुमितश्रुतिसामर्थ्याच्च करणतयाऽफलत्वापत्तात्मज्ञाने इति कर्तव्य
ताङ्गे संभव यथा त्वमिहापि कल्पतां न तापार्थद्रव्यसंस्कारमात्रत्वादिति कर्तव्यताऽऽधा
नेदर्शनात्मस्तुताये ऽद्वयत्वात्त्वानं गतेतिवेदिहापि संस्कृतशुद्धान्तःकरणं विरक्तं विविदिषु
हृदयज्ञानसाधनविधानाददविरोधः प्रत्यक्षेण विशुद्धिप्रत्यक्प्रवणता च वित्तस्य कर्मफल
मवगन्तुं न जन्मान्तरानुष्ठितकर्मानुमायस्याज्ञानस्यान्तरंगसाधनेषु प्रवर्तिष्णुरिति तस्मात्स्वतंत्रवि
ध्यन्तरविहितद्रव्याद्युनस्यसकारिकारणसंपत्तिभेदात्क्रत्वनुभोगयोः शेषत्ववन्नित्यकर्मणामपि
सहकारिभेदादात्मज्ञानाभ्युदययोः शेषत्वं न विरुध्यत इति योऽपि कश्चित्सर्वसहरवादिवे
र्शितार्थसूक्ष्मदर्शिनस्तस्य विज्ञानो वेदान्तार्थस्यदूषको न संस्कारार्थनित्यानि कर्माणीति

पं॰वि॰ वर्त्तिं संज्ञास्वार्थविभागज्ञानशून्यत्वादुपेक्षणीय इति अथ काम्यसंबन्धिष्वेव कर्मसु फलसाधनविधि
१४० विहितानि संयोगभेदेन जीवनकामनाधिकारविध्यंतरवशादनुभवकामोपक्रमादीन्यनुतिष्ठेदित्यधि
कारांतरविधिविधेयानि भविष्यंतीत्याह यत्नेनदानेनेत्यादिना कथमात्मनः स्वापरोक्षानुभवस्यावाप्य
माणतया स्वर्गादिवद्भावनासाध्यत्वावगमः पुरुषार्थत्वावगमाद् इच्छाज्ञानेन संजानीत कामनायोगादसंजाते वि
ष्यानवगमादेव तत्र कामनायोगाद्वस्तुतावगते परोक्षज्ञानामिष्यत इतिमुक्तं तत्त्वसाक्षात्कारसाध्याभि
ज्ञिपुरुषस्यादृष्टिं तत्र यज्ञादीनामिच्छोपसर्जनतया रव्यतमिति हितभावनकरणतयावगतानां
साध्येन वान्वयाद्यज्ञादीनि अपरोक्षानुभवसाधनान्यकरणानि ततश्चापरोक्षानुभवकामो यज्ञादीन्यनुति १४
ष्ठेदिति विधिः परिणस्यते न चेच्छामात्रेण संयोगस्तस्या असाध्यमानतावगमात्र वि विविदिषंतीति वर्त्मा

नतावि रोधं लोके वरिन्यहरा विधेरेवावगमात् न च विप्रकाम्या विकारांतरविरोधः ए
कस्य कर्मणोऽनेकाधिकारविधिसंबंधावगमात् कुंडपायिनामयने मासमग्निहो
त्रं जुहोतीत्यग्निहोत्रस्य प्रकरणांतरत्वात् प्रसिद्धाग्निहोत्राकर्मात् ॥ एवं दधि वि दि
देशवाक्यस्य प्रकरणांतरस्थाप्रसिद्धाग्निहोत्रादीनामविनियोगः कथमपि तु इच्छ
न्तेतः कर्मान्तरत्वे होमस्य विकाराभ्यासह विधीयते ॥ नैतन्फलं कुंडपायिनामयने ग्निहो
त्रशब्दस्य लौकिकाभिधानत्वादाख्यातपरतंत्रतयानुवादार्थाभिधायिनः स्वातंत्र्येणाप्र
वेदैर्ग्नोतरविहिताग्निहोत्रस्य परामर्शकत्वानुपपत्तेराख्यातस्य च जुहोतेः सामान्यवा

पं० वि

३४३ चिनः स्वसंनिहितकारकादिनिरूपितं क्रमं तिरो विहाय व्यवहिताग्निहोत्रपरामर्शायोगात्
कर्मान्तरमेवमासगुणविशिष्टं विधीयत इत्युक्तं मिह तत्कव्ययनय इहानन्तयोगात्यागदा
रानां लौकिकाभिधानतया स्यात् आम्र देवतान्तरविहितान्यवयनादिप्रशामनेऽपि प
ते स्तान्य च कर्माणि संयोगभेदेन विधीयन्तइ रूपपघलेनचे विमृपबल जञानं दृष्टप्रमा
णासामर्थ्याजपत्वान दृष्टमपेक्षते सति प्रमाणकारणे यज्ञादिप्रमाबात् ज्ञानोत्पत्यार्थाऽङ्गा
भावादेतत् दृष्टकारणाद्वृतेऽतिरेकप्रमाणानभूतत्वात् केवलव्यतिरेकस्य न दृष्टापेक्षा ३४३
उत्पन्नेरहेतुसुरस्पष्टकारणावातिरके भाविधानादेवादृष्टसापेक्षत्वलसम्भा

गज्ञोनेपिविध्यनादेवादृष्टसापेक्षत्वमुपपद्यते ननु कर्मणां विज्ञाने विनियोगद्वाराभावा
द्विज्ञानफलमोक्षे विनियोगः कल्पत इति उच्यते यथा यागादिकर्मणां स्वर्गाद्युद्देशेन वि
हितानां तदुपपत्तये विधिसामर्थ्यादेवमध्यवसूर्वाणि कल्प्यन्ते एवमिहाप्यन्तःकरणशुद्धिविवे
काद्यादिद्वारं कल्प्यतामिति किंच साक्षाज्ज्ञानसाधनत्वानुपपत्तौ तत्फलसाधनकल्पना
द्वारपरंपरयापि तत्साधनत्वं कल्प्यता करणविभक्तेः कारकः पववीति परंपरया साधनेपि दर्शना
त् फलसाधनत्वे तद्द्योगात् न वा स्मिन् वाक्ये यज्ञादिसाध्यो मोक्षः श्रूयते आत्मानुज्ञानकर्मत
यात साध्याव गम्यते न यज्ञादिसाध्या किं च प्रमाणान्तरं विरोधं परिहृत्ये वञ्च न यज्ञादिसाधनेनाश्रु
त कल्पनायुक्ता अस्ति चन्यान्यः पर्यायविधानेन कर्मणा नयजनेयसादिना कर्मणां मोक्षसाध

पं॰वि॰ त्वनिषेधः किंच परंपरयासाधनत्वकल्पनां प्रमाणांतरमप्यनुसरणीयासहायेन केनचन यज्ञि
१४२ त्यादि अंतःकरणशुद्धिपरवाक्यजातोपलक्षणार्थं ननु विविदिषाद्वारेण ज्ञानहेतुपि संस्का
रविविदिषापक्षयोः को विवेक उच्यते श्रवणमननध्यानाभ्यां सातिशयकारणसंप
त्तावेव संस्कारो विज्ञानं साधयति तदभावे सत्यभ्युदयमेव विविदिषायां तु विज्ञानस्य कर्मफ
लत्वात्फलपर्यंतं साधनानि संपाद्यापि विज्ञानं जनयंतीति विशेष अत्र कश्चिद्वेदांतेपि
स्वसंकरवादी भेदाभेदमुखरता जडवचनो विविदिषावाक्यादेव कर्मणां मोक्षसाधन
त्वं कल्पयति स च न्यायागमाविज्ञानशून्यत्वादुपेक्ष्यत इति अश्वेन जिगमिषति सत्राश्वसा १४२
ध्यपुनरावृत्तिपर्यंततापि क्वचिद्दृष्टेति नासौ कर्मणां मोक्षसाधनत्वे दृष्टांतः न्यायागमाभ्यां

नुज्ञानमेव सद्द्वारं साध्यमित्युक्तं व्यवहितफलेषु कर्मसु न फलपर्यंतमनुष्ठानं श्रुतिश्चितस्य अ
स्कृप्रवणात्तद्द्वारफलमकामयोपरमसिद्धिरित्येवं वर्णिते पूर्वनादिना सिद्धांतयति सत्यमेवं य
दि समानजन्मानुष्ठितमेवेति अयमाशयः प्रकृतिप्रपन्ने श्लोके स्वप्रभत्वअभवपर्यंते विष
यप्रवृत्याधिकारोपाधितया पूर्वक्षणे प्रतिपत्तव्याधिकारिविशेषणप्रतिपादनार्थोयमथशब्द
ः तत्राज्ञानतयैवानेकजन्मव्यवहितफलहेतुषु कर्मसु फलप्रवृत्तिसमकालप्रतिपन्नत्वे
सुष्ठु न तत्प्रतिप्रसर्पतीति शब्द इति ननु समानजन्मानुष्ठितकर्मावगमोपि ब्रह्मजिज्ञासाका
रहेतुभरत्मेन जन्मप्रयुक्तत्वात् कारणसंबंधस्यापायूतर्णत्वमस्येव मोक्षादिकारादिति न
नहेतेन क्षणामाकरणाद्वारेणापीति ननु ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत् इ

पं०वि०

१४३

नपाहृस्मासोऽस्तिनुमेयमानोव्रजेसधइतिस्मर्यते सत्यंश्रुतिविरोधादर्थस्मृतिरिसाव तथाह
श्रुतिस्मृतीयद्वितरथाब्रह्मचर्यादेवेति ननुआयमानोब्रह्मणैस्त्रिभिर्ऋणवाजायतइतिश्रु
तिरस्ति सत्यं अर्थवादोविधिश्रुतिविरोधेबाध्यते किंचऋणत्रयेनपुत्रयज्ञब्रह्मचर्याण्य
वोच्यते किंवातद्विधयइति नतावज्जायमानस्यपुत्रादिसंबंधोयुज्यतेयोग्यानुपलब्धि
विरोधान्नापितद्विधिसंबंधः विधिप्रतिपत्तिसामर्थ्यविकलस्याधिकाराभावात्सामर्थ्या
स्याधिकारिविशेषणत्वाद्गृहस्थोजायमानोस्त्रिभिर्ऋणवाञ्जायाइतिचेन्नतथाकल्पनायागृ
हात्प्रव्रजेदितिविधिविरोधात्त्वापिचपुत्रादिजन्मसंबंधितयागृहस्थजन्मनियोग्यानु १४३
पलब्धिविरोधःसमानः नचपुत्रादिविध्यनुष्ठानसामर्थ्याभावाद्गृहस्थजन्मसमयेत

द्विधिसंबंधोयुज्यते जन्मारभ्यपुत्राद्यधिकारसंपत्तेःप्राविरोधिःविध्यंतरसंबंधपरिहारार्थमिदंवच
नमितिचेत् नतथाकल्पनायांमन्यासविध्यंतरविरोधात्स्यादर्थवादमात्रमेतत् ननुब्रह्मचर्यंसमाप्य
गृहीभवेदितिविरोधेकथंब्रह्मचर्यादेवसन्यासोविधीयतेन विरक्तमुमुक्षुविषयत्वात्सन्यासस्य
सामान्यविधिविरोधाभावाच्चेनुकर्मनधिकृतान्धपंग्वादिविषयःसन्यासःकिंनस्यात् ब्रह्मचर्य
कुलाद्याःनाह्यप्रव्रजेदितिस्मरणादथपुनरेवव्रतीनाअव्रतीवास्नातकेवाअस्नातकोवाउत्स
न्नाग्निर्वेसनविकारिणामाश्रमिभ्यःपृथगेवसन्यासाधिकारित्वेनोपादानादंधादीनामपि
पुत्रपंचमहायज्ञादिकर्माधिकारादेनधिकृतत्वात्सिद्धेरंधादीनामप्यविरक्तानांसन्यासानधि
नाधिकारात्देवसंन्यासनिमित्तवैराग्येमेदिर्न्वेषणजिज्ञासमेवमुमुक्षुत्वमाकर्ण्याभ्यांभूरिविश्व

पं० वि० अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमित्यादिना संज्ञानाय शरीरेन्द्रियादिपाटवस्य प्रार्थ्यमानत्वाद
१५४ संज्ञानरूपशेषत्वसंन्यासस्याश्रिपूतं न्यसेत्सर्वमित्यादिस्मृतेश्च यदुत्तरेन्द्रियस्यैव संन्यासाधि
कारः सर्वत्रात्मज्ञानप्रकारणे संन्यासस्य विहितत्वाच्छ्रवणाद्यंगतया संज्ञानफलता च संन्यासस्य
सिद्धा कथं पुनः कर्माणां तु त्यागस्यात्मज्ञानफलता शक्या वक्तुं शयं नु षोडशिग्रहणग्रहण
योरिवं कृत्वं गतेति वदामः क्रमेण वा कर्मत्यागस्यात्मज्ञानोपकारितया समुच्चयः कृत्स्न
विद्याशेषपकारभेदात्रिविहेणीयकल्पषस्यवानं तत्वाद्भूसहत्र विषयतया वा व्यवस्था कल्प्यते किं
पुनस्तपरिसज्यते सशरीरव्यतिरिक्तं सर्वं न रूपवीतादि न त्यागमर्हति नाग्नि १५४
होत्रादिभिरविशेषात् ननु संन्यासकृत्वं गतया सर्वत्र परित्यागे ह्युपवीतादि पश्चादुपादीय

ता न उभयलक्षत्वोपजंदृति अग्निहोत्रादिभिरविशेषात् सहोपवीतादिनाप्युपरित्या
गं विधाय अथ परिव्राट् विवर्णवासा मुण्डो अपरिग्रहः इत्यत्र न धर्मा विधिसमयेभ्यो यज्ञोपवीति
कथं ब्राह्मण इति प्रश्नपूर्वकमिदमेवास्य तद्यज्ञोपवीतं य आत्मेत्येव कारणब्राह्मयज्ञोपवीतादि
व्याख्याश्रास्यन श्वयज्ञोपवीतसंपादनात् अत्र सर्वसंकरवादी पुरस्तात् यज्ञोपवीतत्याग
स्यानिर्दिष्टत्वात् ब्राह्मणः कथमयज्ञोपवीतीति प्रश्नस्य प्रसंगाभावात् शाखैकमिदं वाक्यमितिज
ल्पति तस्य तत्वदर्शने तत्र छयरमहंसपरिव्राजकपरस्परद्वेषस्यापराध्यते पुरस्तादिधिसाम
र्थ्यत्व सर्वपरित्यागे गोपवितापरित्यागप्रसंगापरिहारो न स्यसाभाविकत्वात् तथा चाथापरिव्राड् कण
टी परिहितो मुण्डोदरपात्र अरण्यनित्यो भिक्षार्थी ग्राममप्रविशेत् असायं प्रदक्षिणेनो विचिकित्सन् सार्व

पं० वि०
१४५

वर्णिकं भक्ष्यचर्यमभिन्नास्त्वपि तितवर्जमयथयमत्तोपत्नीतिज्ञोऽनिष्ठः क्रमभेदं वेण वंदंजमाददीते तिपि
रिव्राजकमेवोद्दिश्यमेवायणश्रुतिः तथा चोद्धायनोप्यत ऊर्ध्वयज्ञोपवीतमासनं शिखायमश्रयुः शिक्यंज
पलवित्रकमंडलुयात्रमिन्येतानि वर्जयित्वाथदंजमाद ते सखामागोपायेति सन्यासादूर्ध्वमेव दर्शय
ति तस्मात्कृत्स्नस्वात्मज्ञानांगभूतः सन्यासस्तस्मात्साधूक्तमिति भाष्योपसंहारः ननु ज्ञानं तद
भिधानमुखेनाधिकारिविशेषणप्रतिपत्त्यर्थोयमथशब्दः किं तु तदभिधानमुखेन क्रमप्रतिपत्त्यर्थ इ
ति चोदयन्नयथोपिस्यात्र हेतुत्वेनेति तत्र न त्वयं स्वयमेव क्रमं पादयतितिसाहीस्वित्प्रमाणांतरप्रतिप
त्र क्रमापेक्षितं न्यायं सूचयतीति न तावत्प्रथमः कल्प इत्याह तदेतद्युक्तं न्यायसूत्र इति आगमत्व १४५
भावादित्यर्थः द्वितीये विकल्पे धर्मब्रह्मजिज्ञासयोः क्रमापेक्षानिमित्तस्यैव विधिप्रयुक्त्यनुष्ठान

त्वस्याभावान्न तदर्थ इत्याह नापि द्वैककर्तृकाणामित्यादि उक्तेर्थे भाष्यमवतारयति तदिदमाहेति
अत्र कश्चिद्धर्मब्रह्मजिज्ञासयोरिति विशेषोपादानमवगच्छन्नयज्ज्योतिष्टोमौ दृष्ट इतिदमाहेति धा
शोरधिकृताधिकारत्वं खलु विद्यत इति प्रतिवक्तमम्ख्लुमंदभाग्यस्यैवाक्षीथावपासनानां धर्मवि
शेषाणामेव निरूपितत्वाच्चिन्तनुष्ठ्यानां ब्रह्मप्रकरणप्रत्ययत्वसाम्यात्प्रासंगिकत्वेन मात्रस्यैवमे
निरूपितत्वान् आम्नातामर्थावगमस्य ब्रह्मज्ञानस्य कर्मण्यधिकृताधिकारित्वाभावान्नानुमा भूदेक
विधिप्रयुक्त्यनुष्ठेयतया वासाधनद्वये कर्तृत्वात क्रमस्यापेक्ष्य इत्युत्तरभाष्यस्याशंकामाह अथापि
स्यात् यथाग्नेयादीनामित्यादिना किं च चोदनाप्रवृत्तिभेदाच्चेत्यत आह नोयं यः स्पष्टार्थः।
अयमाशयः न धर्मब्रह्मज्ञानयोरेकफलत्वे प्रमाण्यमस्त्यर्थोपि न युज्यते कथं न तावद्धि वि

पं०दि०

१४६ द्विषा वाक्यस्य शास्त्रसामर्थ्यान्यायपरिक्षायां समुच्चये प्रामाण्यमित्युक्तं ॥ न च विधानां विधान्वयस्त
द्वयोर्भयं सहेति समुच्चयविधिः अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इति फलभेदावगमाद्वि
तितो नित्रस्य विसुरापत्तेरिति ज्ञानकर्मणोरेकस्मिन् पुरुषे समुच्चयविधिः ब्रह्मपुरापत्तेः पुरुषयोः
मार्गसमुच्चयावगमाद्वा न च यार्थेन चकारेण प्रत्येकं निरपेक्षमार्गान्वयोपपत्तेः पुरापक्षे … न चामा
न वपुरुषाद श्रद्धादिना गच्छतां प्रतीकालंबनानामभिधानाद् धूमादिमार्गश्रवणाच्च
न च ज्ञान्याचारस्य नियतं सत्यंकामादिति समुच्चयविधिरवगम्यते केवलकर्मणामेव श्रवणात् सप्तशते
… पुरापसु … ब्रह्मलोक इति वाक्यशेषात् सत्यलोकाभिधानात् सर्वा … तेऽत्र दृष्टाय … रूपाना १४६
… ततः कृते नेति च कर्म निंद्यात् द्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति च विज्ञानविधानात् सत्येन

लभ्यः तपसा ह्येष आत्मेति न समुच्चयविधिः तपः शब्दस्य मनसश्चेन्द्रियाणां चैकाग्र्यं परमं तप इति ध्यान
स्यैवाभिधानात् स्मात्र समुच्चये प्रमाणमस्ति प्रतिषेधाच्च नान्यः पन्था विद्यतेऽयनाय नान्यतः … न कर्म
णा न प्रजया धनेन त्यागेनैके … कर्मणा वा … विद्याविधियैवयात … परमं पदमिति च केवल
कर्मणां प्रतिषेध इति चेन्न अविरोधात् समुच्चयविधायि प्रमाणाभावे सर्वकर्मणां प्रतिषेधोपपत्तेश्च ज्ञाना
तया सर्वकर्मसंन्यासविधानाच्च न समुच्चयः संन्यासिनो मधर्मैः समुच्चय इति चेन्न तत्कर्मणां ध्याना
दीनां ज्ञानस्वरूपोपकारित्वात् नित्यकर्मविधानानुपपत्तिरेव ज्ञानसहकारितया कर्मणां मोक्षफलं तत्त
त्वेऽद्याय … इति चेन्न नित्यकर्मणां फलनिरपेक्षत्वात् सापेक्षत्वे च विश्वजिन्न्यायावतारात् संस्कारद्वारेण च
विनियोगात् स्थिरं … तत्वात् कर्मणामेव च विध्यनुपपत्ता मोक्षसाधनत्वं कल्पनाऽसमुक्ता याऽसि

पं०वि० १४७ द्धेः कर्मप्रतिषेधस्योदितहोमप्रतिषेधवत् ज्ञानस्य कृत्स्नार्थत्वोपपत्तेः ज्ञानकर्मणो विकल्पेन मोक्षसाधनत्व
प्रसंगाद्वरमेवेति कर्तव्यतया कर्मणां मोक्षसाधनत्वं कल्प्यत इति चेन्न शमादीतिकर्तव्यतान्तरभावात्करण
तयाविध्यदृष्टाप्रसिद्धानां च कर्मणां विधिविरोधाद्दर्थश्च विरुध्यते कश्च कर्मणां साध्योऽर्थ इति वाक्य
न तावद्ब्रह्मात्मैकत्वं तस्यासाध्यत्वात् नाप्यविद्याभेदज्ञानाध्यासकर्मणां निवृत्तिर्भिद्यते हृदयग्रंथिरित्यवद
द्वैतत्वैव भवतीत्यादौ ब्रह्मदर्शननिवर्त्यत्वावगमात् हि तस्मिन्दृष्टे इत्यत्र सह कर्मणि सहकारित्वेनावग
म्यते नाप्युपाधिद्वयनिवृत्तिः कर्मणां फलं तथा विद्वान्नामरूपाद्विमुक्तः एवमेवास्य परिद्रष्टुरिमाः षोडशकल
पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्तीति च ब्रह्मदर्शननिवर्त्यत्वावगमात् ज्ञानमात्रोपाधानत्वस्य दर्शितत्वाच्च १४७
कर्मोपाधीनां किंच समुच्चयवादिनो न विज्ञानसाध्यमपि फलमस्ति कर्मोपाधीनां सत्यत्वस्वीकृततया विज्ञा

नानिवर्त्यत्वान्मिथ्याध्यासस्य च क्षणिकतया स्वयमेव निवृत्तेः प्रवाहस्य च प्रवाहिनिमित्तान्तरेण पृथगुच्छेदाभाव
स्वस्वीकृतत्वाच्च मिथ्याज्ञानसंकाम्यशुक्तिकादितत्त्वज्ञानेनाविरोधदर्शनान्निवर्त्यत्वात् ब्रह्मात्मभावस्य च स्वयंप्र
काशतया विज्ञानाप्रकाशत्वात् तत्त्वाभ्याससंस्काराच्च मिथ्याज्ञानसंस्कारतत्त्वनिवृत्तौ न तत्त्वज्ञानान्मुक्तिः श्रुतिवि
रोधात् तस्मात् सर्वाणपार्थानानादि मिथ्याज्ञाननिरूपस्येव यि फलव इति न समुच्चयावकाशः अत्रासंस्कारवा
दी ब्रह्मविचारापेक्षितापि कारमप्यज्ञानसमुच्चयसमर्थ्यादेव धर्मावबोधानन्तरं ब्रह्मावबोधं जल्पति तत्र स
ति चासमुच्चये विपरीतापि न स्यादिति निरूपणीयं तथाहि ज्ञानवैतैवानुष्ठितानि कर्माणि मोक्षसाधनानी
तीति प्रथमं ब्रह्मावबोधमुत्पादयतः इतेव ब्रह्मचारिणा धर्मविचारादि सर्वं स्वाश्रमधर्मानुष्ठानं कर्तुं युक्तमि
ति विपरीतमिति एवं कश्चित् स्यादन्यथा ह्यावेव मुमुक्षोर्धर्मविचारप्रतिसमाप्तेरनुष्ठीयमानकर्मणाम्

पं॰वि॰ १४८ नर्थक्यप्रसंगात् दृश्यते च प्रथमाश्रमस्थमुमुक्षवः सर्वसाधारणत्वाद्धर्म एव विचारप्रथमः कर्तव्य इति च देवानां
प्रियमनसर्वसाधारणं कर्तुमयप्रयत्नः किंतु काम्यमानमवश्यानुष्ठेयं वा निवर्तयितुं प्रवृत्तः तत्र यदि विचारद्वयस्य का
म्यमानमोक्षसाधनाभिप्रेत तर्हि युक्तम एव श्रेयानित्थं क्रमः अथ नित्याध्ययनविधिः कर्मविचारं प्रयोजय
ति अतो वश्यानुष्ठेयविचारानंतरं काम्यमानब्रह्मविचारः प्रयुज्यत इति चेत् नैतत्सारं काम्यमानब्रह्मविचा
रानंतरमपि नित्यकर्मविचारोपपत्तेः नन्वध्ययनानंतरं कर्मविचारेनुष्ठाने प्रत्यवायः स्यात् सत्यं नित्यवद्द
व्यानुष्ठानेपि प्रत्यवायपरिहारात् किं च तावन्मात्रं नुपेयता विदुषा नुष्ठीयमानब्रह्मचारिधर्माणाम १४८
पि मोक्षसाधनत्वलाभात् वेदानुवचनादिषु प्रत्येकं विभक्तिश्रवणात् आश्रमणकर्मणां किं कस्येन मोक्ष
साधनत्वपपत्तेः ब्रह्मचर्यादेव संन्यासविनाश्च धर्मविनो धो नित्यतया त्रिष्ठितोपि न ब्रह्मविचारहेतुरनु

ष्ठेयश्च धर्मविचारो ग्निहोत्रादिव्यक्तिरिव संन्यासधर्माणामपि ज्ञाने समुच्चयांगीकरणात् किं चाध्ययनवि
धिः कर्मविचारं प्रयुंजानो ब्रह्मविचारं किमिति न प्रयुंक्त इति वक्तव्यं श्रोतव्य इति विध्यंतरश्रवणादिति चेत् अ
श्रुतमीमांसारतां तो देवानां प्रियः धर्मविचारे प्रवर्तकभावेनानेनैवाध्ययनविधिना ब्रह्मविचारस्या
पि प्रयोगसंभवे श्रोतव्य इति विधेर्नियोगाधिकारप्रयोगकल्पनया प्रवर्तकत्वकल्पनायोगात् ब्रह्मज्ञान
स्य काम्यमानसाधनतया तद्विचारस्यापि काम्यत्वात् विद्याध्ययनविधिप्रयुक्तेति चेत् कर्मविचारे काम्य
मानकर्मविचारस्याप्यतत्प्रयुक्तत्वप्रसंगात् स्यादेतत् ब्रह्मविचारस्य वैराग्यशमदमोपसदनादिसाधनविशे
षाणामंगत्वेनाविनाध्ययनविधेः कर्मविचारे ग्रामाद्यं ग्रस्तस्य ब्रह्मविचारे तदंगानामाक्षेपकत्वानुपपत्तेः सा
गं विध्यंतरकल्पत इति सोयमनिरूपितविधिव्यापारो वाचस्पतिः स्वाध्यायविधिः स लुप्तेणेव त भूमीजनाद्यं

पं०वि
१४९

गविकल्पमेव वा कांतराध्ययनं विदधानो मुंडककारिणोध्ययनं शिरोव्रतार्थं गाक्षेपपुरःसरमेव विदधाति विचारं
च प्रयुंजनः प्रतिवाक्यं इतरयो वांगभूतानन्यायमेदानाक्षिप्यैव विचारं प्रयुंक्ते दर्शपूर्णमासविधिश्च नित्या
धिकारोय थारात्मंगनुष्ठानं प्रयुंक्ते काम्याधिकारस्तु सर्वांगानुष्ठानमिति तथा सत्येव विधिरूपां शुश्रूषां जैक
र्मण्या ज्यावेक्षणाद्यंगमाक्षिपति याग्रांतरे ष्वव्यवधानाद्यंगमिति एव विधिः ब्रह्मविचारे प्रामाद्यंगमाक्षिपेत्
तरत्रोतिन विरुध्यते न चाधिकारविशेषणतयाशमादीनामनुपादेयत्वात् नाक्षयोध्ययनविध्यधिकारिणस्तु तत्प्र
युक्तविचारे प्याधिकारिता तस्मात्प्रधानविधिदृष्टदृष्टांगानामुपकारविशेषापेक्षयायत्र क्वचन यत्किंचिदंगंप्र
योजयतीति सर्वत्र समधिगतमेतत् तस्मादिकाध्ययनविधिप्रयुक्तत्वाद्विचारस्य सक्रमापेक्षायां ब्रह्मविचारा १४९
नंतरं धर्मविचारो युक्तो विचारहीनामपि मोक्षसाधनालिलाभात् तस्मान्नफलैक्यादपि धर्मजिज्ञासा

नंतरं ब्रह्मजिज्ञासेति॥ प्रतिवाक्यं वक्तां सर्वभेदात् प्रमेयभेदसिद्धिः॥ ॥तत्रहेत्वंतरमाह। चोदनाप्रवृत्तिभे
दादिति तेद्विरणोती दमपरमित्यादिना चोदनेति शब्दभावनां कुर्वन्नुवादो निर्धार्यते। मा न चोदनाशात्र
प्रविशिष्टामर्थभावनां कुर्वन्नितस्मिन्ननुवदति पुरुषप्रयत्नयोगादर्थभावनामपि प्रतिपादयतीति भा
वः। ननु ब्रह्मावबोधभाव्ये पुरुषप्रेरयती चोदनावबोधव्याप्तां भावनां प्रतिपादयतीति नेत्याह। नावबो
धे पुरुषः प्रेर्यत इति। नन्ववबोधपुरुषप्रयत्नसाध्य इति नेत्याह। अवबोधो हि यथावस्तित्व निछ्ता
प्रवर्तमानस्यापि दुर्गंधादि ज्ञानदर्शनादि इत्यर्थः। उच्यते नित्यानित्यवस्तु निवेक इत्यतः प्राक्नोऽपि थः
स्पष्टार्थः॥ ॥शास्त्रीयस्य विधेः शास्त्रीयमेवाधिकारनिमित्तं वक्तव्यमित्यभिप्रेत्याह। नित्यानित्यवस्तु
विवेकादय इत्यादि। सोन्वेष्टव्य इति विधिप्रकरणेन तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो
लोकः क्षीयत इति नित्यानित्यवस्तुविवेको दर्शितः। परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायादित्यत्र सर्वा
भवतीति वैराग्यश्रवणविधिप्रकरणे इहामुत्रार्थभोगविरागो दर्शितः। शांतो दांत इति वदनेन विधिप्र

कारणे शमदमादयोऽपदर्शिताः न हि जिज्ञासस्वेति विचारविधिप्रकारिणे वर्णितमुपसमारोपितगुरूपसद
नादर्शिता। सर्वत्र फलश्रुतयः कामनोत्पादनद्वारेण मुमुक्षोरधिकारप्रदर्शनार्था अन्यथा साधनानु
ष्ठानादेव फलसिद्धेः संकीर्तनवैफल्यात् ज्ञानस्याविधेयत्वात् न हि ध्येयोपि तत्साधनविधिपराः॥
तत्र सर्वशाखाप्रत्ययन्यायेन विधीनमेकत्वोपपत्तेः। सर्वैकोविधिरधीकार मीक्ष्यमाणः सकारणसामर्थ्य
संकीर्तनवैफल्यपरिहाराय स्वर्गवर्णितं धर्मकल्यापमधिकारनिमित्तत्वेन स्वीकारोति। नोऽधि
कारस्याविधेः प्रवृत्तिपर्यन्तत्वायोगात्। नन्वेवं वाक्येषु विचारो विधीयत इति। कथ
मवगम्यते। उच्यते विजिज्ञासितव्यो विनिवृत्तोस्त्वेति वाताम्न्तो विचारो विधीयते इष्यमाण
ज्ञानस्येच्छायाश्चाविधिपरत्वायोगात्। श्रोतव्य इति स्वयमेव विचारोभिहितः॥ न हि ज्ञानार्थं सगुरुमेवाभिग १५॰
च्छेदिति ज्ञानस्य साधनावगमात्। गुरूपसदनविधानाच्च तत्साधनश्रवणादिविधिकल्पते। आत्मन्येवात्मानं प
श्येदिति ज्ञानविधानायोगात् तत्साधनविधिरूपादीयत इति। सर्वत्र मननिदिध्यासनाभ्यां सहश्र

वणनामंगानि विधीयत इति सिद्धं। ननु फलसाधनविधौ फलकामनैव फलाधिकारनिमित्तं भवति किमन्तरथ
र्मफलायेतिनि॥ सत्यं न्यायस्त्री येधिकारनेमित्तसंकीर्तनादेव जीवनगृहदाहादवदधिकारनिमित्तमिति
गम्यते॥ ननु साधनकालयस्यानुष्ठेयतयानत्रावेधियारिकल्पयाज्ञादिवन्नब्रह्मज्ञानफलोपकार्यंगत्तमेवकल्पनां। सत्यं॥
अंगस्यापि प्रदीपादिकालवदधिकारिविशेषणत्वेन विरुध्यते॥ शान्तादिगुणोभूत्वा पश्येदित्यादिलिंगाद्दीक्षापात्र
तरक्रत्वधिकारनिमित्तनादर्शनात्तस्मायक्रमुक्तनित्यानित्यवस्तुविवेक इति तेषु हि सत्स्वित्युत्तरभाव्यं
साधनकलापस्यब्रह्मानुभवपर्यन्तं मविचारादिसाधनप्रवृत्तेरन्वयव्यतिरेकसिद्धं दृष्टहेतुतां प्रतिपाद
यति। तत्त्याववर्णयितुमुमुक्षुत्वमंतरेण नावत्त प्रवृत्तिरित्याहोक्तं पुरस्तादधिकारार्थतइत्यादिना। तस्मा
न्मुमुक्षुत्वं नावरिष्यमाणसाधनेप्रवृत्तिनिमित्तमित्यर्थः। ननु फलसाधनायां सत्यामितरधर्माभावात्फल
साधनेप्रवृत्त्यभावोनदृश्यते। सत्यं॥ पूर्वस्य पूर्वस्योत्तरस्वरूपोपाधित्वेन प्रतिपत्तव्यतयामुमुक्षुत्वोपाधित्वादधिका
रनिमित्तत्वेत्याह। तस्माद्यावदस्य हिरण्यगर्भावासिपर्यन्तस्येत्यादिना॥ ननु सर्वमनित्यमेवसात्वात्स्वप्नवदिति

पं॰ वि॰
१५१

नेत्याह विनश्यदवस्थमिति। नच निरूपादानं किंचित्कार्यमवगम्यते कार्यं यस्य च कार्यान्तरोपादानत्वे पूर्वेषां
तत्तत्कारणानामुत्तरैकस्मिन्कार्येऽन्वयः स्यादनन्वयिनोऽनुपादानत्वादतः प्रतिकार्यप्रवाहमनादित्वादिना
शनेकोपादानकल्पनाद्वरमेकस्यैवानादेः सर्वकार्योपादानत्वकल्पनं॥ नच्चाविकारिकूटस्थमन्यथा
कार्यत्वप्रसंगात्तथा सर्वकार्यकारणाविकारिस्य न विनश्यत्येकोपादानत्वात्सुषुप्तावात्मगतसुखादि
वदिति। सर्वस्य च विनाशस्तथाविधवस्तुपर्यन्त एवान्यथा पूर्वकल्पस्य शून्यतापर्यन्तविनष्टस्यास्तो
पादानशेषतया स्वसंस्कारावस्थानाभावात्तस्य जातीयाकारेण पुनर्जन्माभाववत्तद्वर्त्तमान
स्यापि निरुपादानतया जन्माभावप्रसंगादिति भोगोनुभूजातस्य भोक्तुः सह भोगेति सुख
विनाशादर्शनादितियोजनाऽस्त्वेवमनन्वयो यावदनित्यत्वं नावैति तावन्नित्यवस्तु न प्रतिपद्यत इ १५१
त्यध्याहारो यावच्च नित्यानित्यवस्तुविवेके न जायते तावद्विरक्तो न जायत इत्यध्याहारो यावच्चो
भिमुखविनाश इत्यत्र यावच्छब्देन कारमध्याहृत्य विरक्तिशब्देन संबध्यते यावच्च न विरक्त इति

तावन्मुमुक्षुत्वं नावलंबत इत्यध्याहारो यावच्च मुमुक्षुत्वं नालंबते तावद्ब्रह्मजिज्ञासां कः प्रतिपद्यत इति साधनकलाप
भावेन विचारप्रवृत्तिरिति व्यतिरेकोऽयं दर्शितः॥ ननु नास्ति व्यतिरेकः॥ साधनाभावेऽपि प्रवृत्तिदर्शनादित्या
शंक्याह॥ कथं विद्वद्देवाशादिति॥ श्रवणादिवस्तुपर्यन्तज्ञानमप्यादित्यर्थः॥ व्यतिरेकनियमादे
वान्वयमपि सिद्धवत्करोतीत्याह तस्माद्वर्णितवस्तुकलापानन्तर्यमिति॥ उक्तेऽर्थे भाष्यमवतारयति
तदाह भाष्यकार इति॥ तदेवं साधनकलापस्य विधेयतया विज्ञानांगत्वेऽपि शास्त्रफलाभ्यामधिकारि
विशेषणत्वलाभाद्ब्रह्मणि न संपन्नं तं ब्रह्मविचारे सिद्धेऽपि कस्मिंश्चित्प्रमाणव्यापारवान्तो न भिन्नो देवानांप्रि
यः शास्त्रार्थप्रद्वेषदोषदूष्यमानचेताः संकोचवादीयत्किंचिदत्र जल्पति विचारकर्तव्यतां प्रतिपाद्यमानस्य
किल सूत्रकारस्याशामादयो न बुद्धिसमारूढाः॥ न चाबुद्धिसमारूढमर्थमधिकारिविशेषणतयाथश
ब्देनोपदातुमर्हति॥ धर्मविचारस्तु बुद्धिगतोऽधिकारिविशेषणतयोपादीयत इति नेतद्युक्तं। न हि पूर्वोप

पं॰ वि॰ १५२ स्ववाक्यपरामर्शोपज्ञाविकलत्वमिव सूत्रकारः तथाहि श्रौतं विचारविधिं सूत्रयितुं प्रतिपद्यमानो विधिप्रयुक्तम
धिकार्यं नु वं धमीक्षमाणः स्वप्रकरणपठितमन्वयव्यतिरेकप्रमाणगम्यं बाधिकारिविशेषणं प्रतिपद्याथश
ब्देन किमिति न सूत्रयेत् किं च साधनफलाय स्याथशब्दो यादानन्ताभावे एव तद्रूपं ब्रह्मणि प्रवृत्संगनातावं
दुक्तव्याख्यागावाक्षिप्तस्य तत्र प्रवृत्त्यनुपपत्तेरेव तदर्थं पेक्षणीयत्वे च तदेवाधिकारिविशेषणं वक्तव्यं॥
नैव धर्मजिज्ञासारम्भद्वारेणवाशास्त्रीयतया बाधिकारिविशेषणतामनुगच्छति प्रमाणाभावात्॥
अत एव न नुदिश्यापिमाथशब्देनोपादानमर्हतीत्यवच्छिन्ता बुद्धिस्था स्ववाक्यगतमेव सन्निहितं
तं बुद्धिस्थं च साधनचतुष्टयमुपादानमर्हतीति॥ तस्माद्युक्तं विवेदनादिति॥ अत॥ शब्दो हेत्वर्थः नन्व
थशब्दप्रवाचनं तयोरभिधानमुखेन हेतुतया पूर्वनिर्दिष्टमेवार्थं गमयतीत्युक्तं॥ ननु हेतुत्वमार्थिकं ना १५२
भिधेयमथशब्दस्य सत्यमार्थिकार्थेनासयो दानं तर्यमात्रेवैफल्याद्यसरः स्ववाक्यप्रयोगे शब्दार्थे इ

त्यथशब्देनैव हेतुत्वसिद्धेर्नोतः शब्दो येक्ष्यत इति अतः शब्दाभावे मांगल्यादीनामन्यथमार्थं नाथशब्दस्य
प्रसज्यत इति वैभनिराकृतत्वात् धर्ममीमांसायाः सत्यपशब्दे तः शब्देनापि तस्य हेतुत्वमुक्तमिति वेदंध
गोलांगुलन्यायेक्गारणोयं सर्वसंकरवादी॥ नेद्यन्यत्र विद्यमानः पुनरुक्तिदोषो स्मो तिरप्यनुसरणीये॥
तस्माद् तः शब्देने व्यर्थमिति प्राप्तमत्राथशब्दपरिगृहीतस्यैव हेतुत्वस्य हेतुतोरेणायवाधाशंकापोतत्रि
राकरणं पुनरथशब्दोक्तहेत्वभिधायिनातःशब्देन क्रियत इति दर्शितं तस्माद् हदरवाम्पिरोत्रादीनामि
त्यादिभाष्येण तत्र तामाशंकां दर्शयति॥ स्यादेतत्कृतकत्वपरिच्छेदाविद्यादिना॥ यद्यातु स्तकत्वाद
नुमानमनेकांतिकं तदा कर्मफलस्यापि कृतकस्यानित्यत्वनियमाभावात् निःश्रेयसार्थकामिनः तत्रापि
प्रवृत्तिः स्यात्ततो नित्यानित्यवस्तुविवेको न ब्रह्मण्येव नियमेन प्रवृत्तिहेतुरित्यर्थः॥ ननु कर्मफलस्यै
कान्ततो नित्यत्वाभावोपि न नित्यत्वे प्रमाणमिति॥ तत्राह वेदे प्यक्षय्यं ह वै चातुर्मास्ययाजिन इति॥ नन्वे
वमपि ब्रह्मणि प्रवृत्तेः किमायातं न ब्रूमि॥ तत्राह ततो विषयभोगात्र नियमेन विरागइतित ततो न ब्र

पं.दि. लणि प्रवर्त्तेतेत्यर्थः॥ विरज्यतां वानुमास्यादि श्रुतिस्तु विषयान् विरक्तस्तत्रैव प्रवर्त्तेतेति॥ मानुष्ठानेण्वे
१५३ व प्रवृत्तिनियमस्तथापि ब्रह्मण्यपि विकल्पेनोपरतिः स्यादिति नेत्याह नापि कूटस्थनित्यवस्तुवैषम्येन
ति॥ ननु विरुद्धार्थतादात्म्याभावेऽपि सर्वांगलक्षणाब्रह्मप्राप्तिः स्यादित्येत्याह॥ नापीत्यादिना॥ ननु ब्रह्मानं
दोपभोगो विद्यते॥ न स्वाश्रयसुखोपलब्धिरूपभोगत्वात्॥ न च ब्रह्मधर्मस्य सुखस्य जीवाश्रयतयोपलब्धिः
संभवति॥ ननु सुखापारोक्ष्यमात्रमुपभोगो न स्वोपलब्धिरूपभोगत्वात्॥ न च धर्मस्य सुखजीवाश्रयतयोपलब्धिः संभवति॥ ननु
स्वापरोक्ष्यमात्रमुपभोगो न स्वाश्रयसुखापरोक्ष्यविशेषणयोगात्॥ तथापि भेदेनावस्थानेजीवब्रह्मणोर्लोकोपुरुषा न
स्या सुखस्य पुरापांतरापरोक्ष्यादर्शनान्नोपभोगः न त्वात्मैव सुख स्वसंविन्मभावत्वात् पापरोन त्वात्मैव सुखरूप
त्वस्थानेन मोक्षइतिनयोस्यानुपपत्तिरोधात्॥ न च देवाद्यानंदपरित्यागेन निरानंदात्मनावस्थानं मोक्षं कश्चि
त्प्रार्थयते॥ न स्मा भसाधनत्वनुष्ठ्यसंपत्त्यस्य ब्रह्मणि प्रवृत्तिः किंतु कर्मफलेषु स्वयं संहरत्यनोजीर्णभयादिस्वा १५३
दिना॥ तत्रोक्ताशंकानिराकारणहेतुवचनेभाष्यमवतारयितुमतः शब्देन साधनत्वनुष्ठेयस्याहेतुतानिधायि

का कथमाशंकानिराकरणहेतुभूतं प्रमाणं स्मृवितमितिपृच्छति॥ कथमिति॥ न दाहयत्स्मादेहदेवामिहोदी
भावतिब्रह्मत्वमतिक्रतुरूपार्थं आत्मस्याभिसंतांदर्शयतीत्यर्थः॥ ननु तद्यथेहकर्मजितो लोकइतिसामान्यश्रुति
लानुमास्यादिविशेषादन्यत्रैव वर्तनामितिनोदयति॥ ननु पुरापस्येतितु अनावृत्तानुमास्यश्रुतिः सुकृते मा
यत्वमाह॥ न न तत्फलस्य सत्यपि सुकृतेफलस्यानुपभोगवत्वभयोपपत्तेस्तत्र वाक्यस्य श्रुतार्थपरीक्ष्य
फलाक्षय विषयत्वकल्पना प्रमाणविरुद्धेत्याह॥ न तस्य वस्तुवलप्रवृत्तेतिव्या॥ निवलप्रवृत्तेरर्थः॥ अनुमाना
नुगृहीतश्रुतिविरोधइति योजयितव्यं॥ हिरण्यदाअमृतत्वं भजनइतिश्रुतिर्वर्तमानतापदेशाद्योग्या
नुपलब्धिविरुद्धा भवति भजिष्यंतइति कल्पनोपूर्ववत्प्रमाणविरुद्धा॥ अनुमानानुगृहीतदेव समर्गप्र
लयश्रुतिविरुद्धा॥ अपाम सोममिति श्रुतिः सयो आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतइति न श्रुतिः
फलस्यैन निस्यतांदर्शयति॥ वाक्यस्य फलविषयत्वकल्पनात्तु पूर्ववत्प्रमाणविरुद्धाः॥ विरोधायेक्षत्वोकल्पनायाः
किं च यदि हवाप्यनेवं विन्महत्पुण्यं कर्म करोति तद्धास्यांततः क्षीयतइत्युपक्रम्य सय आत्मानमेव लोकमु

पं.दि. स्यात्तेन हास्य कर्म क्षीयन्त इति वचनात् । तोपासनाकर्मणश्च वा परोक्षानुभवद्वारेणास्या विद्याया निवृत्तिफलता
१५४ नेन कर्म क्षीयन्त इति उपासनाकर्मप्रशंसामात्रमेतदुपपाद्यते । नैव विदः कर्मक्षयस्य श्रवणादेव विदानुष्ठितस्य
देहोत्पादेरेव मोक्षफलतया श्रयो विधीयतइति नेत्रलिङ्गस्यानान्यः पन्था विद्यतेऽयनायेति वा स्यकर्माणि स्यादि
निषेधेऽपि धर्माद्यविरोधात् ॥ तस्मादुक्तव्यतिरिक्तपुरुषार्थत्वनिरसनया वैराग्यमुपपन्नमिति ॥ ननु द्वावस्य
तुल्यमात्र ब्रह्मण्यपि प्रवृत्तिकारणमेतदिति स्फुटं तत्राह यस्तु न मुमुक्षुता भाव इति विरुद्धपदार्थता दास्य
मनुपपन्नमिति सत्यं मानं ब्रह्म वेद ब्रह्मैव भवति इत्यादि श्रुतिविरुद्धं ॥ किं प्रति विंबयोरिव ताद्दात्म्यमुक्तं ॥ न वस्तु
तानन्तुभवादपुरुषार्थं इति युक्तं ॥ ब्रह्मानन्दानुभवान्न ॥ ननु नाद्दात्म्येन सुखमित्यनुभवः स्यात् अहं सुखीति ॥
चा अहं सुखीति भवो लोके पुरुषार्थ इति नेष दोषः ॥ सुखापरोक्ष्यमात्रस्य पुरुषार्थता त्वनुस्वाश्रयं सुखमे
व पुरुषार्थो न सुखापरोक्ष्यमिति ॥ लोपलब्धानामेव सुखसाधनानां पुरुषार्थत्वादिष्टता विशेषान्न सु १५४
खमप्यफलेयेभ्यमानमेव पुरुषार्थ इति गम्यते ॥ तत्र साधनपारतन्त्र्यानिमित्तत्वादिव द्विषयसुस्यात्मनो

भेदे स्यानुषङ्गिकोऽवभासनेऽहं सुखीति न तु पुरुषार्थः तयोः सतो ब्रह्मानन्दो ह्यपरोक्षावभासः पुरुषार्थ इति ॥ ननु नास्ति
नित्यं मुक्तस्वामिति नैयायिकादयः । सत्संनाशेऽवजन्मम पिल रवं । ननु साधनोपादानाज्जन्य नावगम्यते ॥ न
सिद्धस्यैव सुखस्याभिव्यक्तिहेतुत्वात् अन्यथा सुखसत्ताजन्म प्रतिभासयोग्यतयोः साधनाधीनानाकल्पनागौर
वात् सिध्यान्तरागोषतयावाऽन्वयमिवरिनत्वेनवा निरुपाधिकप्रेमास्पदत्वेन वा सुखदुःखावस्थयोर विशेषेण सु
खरूपस्यात्मा प्रत्यक्षेणावभासते ॥ यस्माद्दत्तः शब्देन शङ्काया निराकरणहेतुसत्त्वनद्वारेण साधनकलाप
स्य हेतुबन्धत्वसमर्थितं ॥ तस्माद्यथोक्तइत्युपसंहारः ॥ तत्रैवाप्राधान्येन सूत्रवाक्यस्यार्थेदर्शितः साधनच
तुष्टयावस्यारम्भकत्वव्यतिरेकमुखेन दर्शितं इदानीं अन्वयमुखेन तदेव प्रतिपादयति यतो इत्यानुषङ्गादि
सादिना ॥ ननु साधनकलापवद्धर्मजिज्ञासापि नियमेनारम्भिके नित्यैसा देवं समर्थादिनि ॥ आगमार्था
पत्तिभ्यामेव धर्मकलापस्यावश्यारम्भकत्वे सिद्धे तदुभयप्रमाणविकल्पस्य धर्मविचारस्य न हेतुत्वे स्यर्थः ॥
अतोऽनन्तरो जिज्ञासेति भाष्यं ननु धर्माय जिज्ञासेति वचतुर्थीसमासः किं न स्यादित्यत आह ॥ तणीतवि

नार्थान्तरयोगी हीति। इच्छाप्राधान्ये हीच्छायाः कर्मप्रयोजनयोरैक्यात्साधारणात्कर्मणि षष्ठीसमासः स्या-
द्विचारप्राधान्ये तु कर्मप्रयोजनभेदात् प्रयोजनविवक्षया चतुर्थीसमासोऽपि स्यादिति॥ ननु किं न इच्छाय-
दिच्छायाः प्रयोजनतया कर्मत्वेन वर्तत इति तदाह ब्रह्मशब्दस्यार्थनिर्देशाच्चेति॥ तत्र यदस्यो ब्रा-
द्भ्यव्रह्मण इति कर्मणि षष्ठी सतः प्राक्तनेन ग्रंथेन जातिजीवकमलासनशब्दराशीनां ब्रह्मशब्दाभि-
धेयत्वयोग्यतासांप्रतिकर्तृत्वेन कर्मत्वेन वा प्रतिपादनानुपपत्तेरस्मिन्प्रयोगेन ब्रह्मशब्दस्य जन्मा-
द्यर्थत्वे तितदर्शितं॥ तत्र ब्रह्मण इति कर्मणि षष्ठी सारभ्य किं च शास्त्रप्रवृत्तिरेव सतः प्राक्तनेन ग्रंथेन
अप्रधानविचारानंगत्वेन मुख्यया रसोपादाय प्रधानस्यार्थाक्षेपकल्पनाद्वारे मुखतः प्रधानविचारमेवो-
पादाय प्रधानविचारेणार्थाक्षेपकल्पनमिति कर्मणि षष्ठी दर्शिता॥ शेष इति संबंधसामान्यमुच्यते न १५५
कारकपंचकव्यतिरिक्ताः संबंधविशेषा उच्यते॥ तत्र यथा देवदत्तस्य स्वमिति षष्ठी विशेषसंबंधेष्वनि-
माभिधानमर्हत्येवं देवदत्तस्य गच्छतीति देवदत्तस्य गमनं तद्वादिकारकसंबंधविशेषेष्वनिताभिधाने

नार्हतीति किं च भिद्यते संबंधसामान्यार्थसामर्थ्यात् कारकसंबंधविशेषाभ्यार्थानो वगम्यंत इत्येतावति षष्ठी
शेष इत्युक्तं॥ नार्थादपि कारकसंबंधाप्रतिभास इत्युक्तमिति पूर्ववादिनो मतं॥ किं च शास्त्रप्रवृत्तिरेवसा-
ध्यज्ञानुमितेच्छा जिज्ञासेति सतः प्राक्तनेन ग्रंथेन साधिकारविषयस्य विचारविधेः प्रतिपादकेवाक्ये ब्रह्मणः
कर्मकारकत्वं निर्दिष्टसूत्रस्य चतदेकार्थत्वात्तत्रापि ब्रह्मणः कर्मत्वमेव शब्देनवक्तव्यमिति दर्शितं ज्ञानुमि-
च्छ्रसादिभाष्ये॥ तत्रावगतविषयत्वादिच्छाया ब्रह्मण्यवगते तज्ज्ञाने च्छानुपपत्तेरनवगते सुतरामिति कथं
ब्रह्मज्ञानेच्छेति तत्राह ज्ञानश्चेच्छायाः फलविषयत्वादिति कोऽवयम्भिव्यमाणावगतिरिति तदाह साक्षाद-
नुभव इति॥ ननु प्रथममेवावगतिरुत्पद्यते तत्राह ज्ञानेनुपरोक्षेति॥ शाब्दास्परोक्षतयावगतेऽप्यपरोक्ष-
ज्ञानमिष्यत इत्यर्थः॥ यद्यपुनः शाब्दादपरोक्षज्ञानमुत्पद्यते तत्राह संनिहितेपीति॥ प्रमाणेनावगतेनु-
मितस्यापरोक्षनिश्चयानुभवेनेत्यर्थः ननु किमिदं ज्ञानमिष्यत इत्युच्यते॥ संवेदनमेव प्रमाणफलं विज्ञानमिति
सुगतप्राभाकरवैशेषिकनैयायिकाः न च संवेदनफलं चतुष्टयसंनिकर्षादिसामग्र्यां चांतरेण प्रमात्रव्य

पं·वि· पारो नाम ज्ञानमस्तीति वार्त्तिककारीयाणां तु प्रमातृव्यापारः संविज्ज्ञानको ज्ञानमिति क्षपणफलोकायति
१५६ कानां चात्मचैतन्यमेव ज्ञानं॥ सांख्यवेदान्तिनां कारणक्रमस्य बुद्धिरन्तिर्ज्ञानभावक्रमस्य संवेदनमिति तत्र
नतावत्स्थायिन्यात्मनि संवित्फलोदयः कर्तृव्यापारमन्तरेणोपपद्यते॥ ननु यतः कारकात्कर्तृव्यापारज
न्मतत्त एवानुभवजन्मस्यादात्मनः परिस्पन्दव्यापारानुपपत्तेरिति॥ अत्रयमत्रकान्तक्षः किं लोके कर्तृव्या
पारात्फलजन्म प्रत्यक्षेणावगतं नवेति न वेत्तु व्याप्तिग्रहणाभावात् अप्रत्यक्षत्वाच्च न सर्वत्र कर्तृव्यापाराव
गमः स्यादवगम्यते च लोके कर्तृव्यापारोऽयं लोके फलहेतुतया प्रत्यक्षसिद्धः कर्तृव्यापारः तर्ह्यात्मन्यपि
तदनुमीयते व्याप्तिनियमान्न नु न परिणामो नाम व्यापारो स्वरं भाष्यप्रमादिति वैशेषिकादयः त
र्हि प्रलयव्यापारजन्यं फलमस्तु कर्तृव्यापारव्याप्तिनियमात् फलस्य॥ ननु मनःसंयोगादेवासमवायि
कारणाद्व्यापारमन्तरेण ज्ञानमुत्पद्यते॥ न॥ करणसंयोगव्यतिरेकेण फलजन्मनि कर्तृव्यापारदर्श १५६
नादत्र सर्वसंकरवादी विलयति पाकादिषु फलस्य कर्तृव्यापाराधीनत्वादर्शनात्तत्र तथावगम्य

तामिह त्वनुत्तदर्शनाभावान्न कर्तृव्यापार इति॥ सत्वानुमानप्रक्रियायामनधिवधिकृत इत्स्केवक्ष्यते॥ मु
गतानामपि नित्यात्मसाधनादेव संविदां कर्तृव्यापारापेक्षानुमीयते॥ क्षपणका नामपि स्वरूपचैत
न्यस्य निरुपाधिकस्य विषयावभासित्वे सर्वदा सर्वविषयावभासस्यात् लोकायतस्येव जन्मसंवेदनतो
व्यापारानुमानं॥ नव सर्वगतस्य निरवयवस्यात्मनो न परिस्पन्दपरिणामोपपत्तौ॥ सस्यमप्यात्म
परिनिर्बन्धोन्तः करणसंपिडितस्यात्मनो ज्ञानाकारपरिणामात्तन्न च संवेदनाकारेण परिणामः तस्य
नित्यसिद्धत्वादन्तोतः करणपरिणामविशेषश्चैतन्यविस्येषयावच्छेदोपाधिः करणक्रमस्य ज्ञान
भावक्रमस्यात्तु संवेदनमेवार्थप्रकाशोऽत्र प्रतिज्ञनिमिस्कव्यते॥ तत्रार्थोपाध्य परोक्षसंविदवच्छेद
कं ज्ञानमपरोक्षमिति॥ तत्रावयवार्थक्रमसादने नापरोक्षावगमे व्यापारावयवार्थत्व मुक्तमिष्यमाण
ज्ञानफलोपदेशमुखेनोत्तरीति तत्साधनविचारे कर्तृव्यापारव्यापार्थं प्रतिपादयस्क तरं भाष्यं नस्यता

पं-वि-
६
१५८

सर्वं दर्शयितुं आशां शास्त्रारंभं निवर्तयति॥ कथं नास्य सूत्रस्य व्याख्यार्थो वर्णनीयः तथा ह्यस्य सूत्रस्य शास्त्रान्तर्भू-
तत्वे विचारारंभकर्तव्यता विचारसूत्रस्य केनारंभः क्रियते स्वेनैव वेदान्ताश्रयतायाः निःसृतान्तरेण वेदनव-
च्छयतोऽथानन्तर्भूतेन न हि प्रथमसूत्रस्य शास्त्रत्वे नारंभप्रसंग इति न दोष इत्यनेन शास्त्रान्तर्भूतं
सूत्रमिति॥ आपातप्रतिपन्नो नरविचारविधिरेव सापेक्षितविचाराय प्रथमसूत्रयारंभयति विधौ च
विचारिते विधिविषयविचारसूत्राणि पश्चादारंभयतीत्येकशास्त्रत्वेपि नानवस्था अनन्या। दिवाक्या-
नां स्वार्थे समन्वयद्वारेण विचार्यमाणवेदान्तवाक्यानामपि ब्रह्मणि समन्वयानिमित्तत्वात् समन्वयेव
संबंध इति॥ अत्र च शास्त्रं किं प्रतिपादितं न दोष इत्यनेनेति॥ प्रयोजनस्य इत्थं हि अधिकारि विशेषस्य इति साधन
कलापस्येति न स्वकारणान्तरमहं इत्यादि इष्टमोक्षस्य संधानाद्यर्थादुपात्तमिति नतयाभिधानसामर्थ्या-
दिति ततः शास्त्रस्य मुमुक्षुत्वहेतुताभिधायिनोऽपि शास्त्रान्तराविरुद्धो तात्पर्यार्थादुक्तं मुक्तमित्यनुवादे प्रयोजनाभा- १५८

वात्कर्तव्यमपदमध्याहृत्य जिज्ञासा कर्तव्यताश्रुत्याभिहितानविद्यासंयोगात् ज्ञानस्य साध्यतावगतामानुत्तदेवक-
र्तव्यमस्तीति नेत्याह तत्र ज्ञानासे वेतिदृश्यमाणस्य साध्यता स्वयंसिद्धान शाब्दमपेक्षते स्वसंवेदनत्वादित्यर्थः।
किं तर्हि विधीयत इति न दोषोपायत्वेनेति॥ अनवगतामिव षिता वाय एव विधि शब्दैः प्रतिपाद्यत इत्यर्थो द्र-
ष्टोपायत्वप्ययत्साक्षानुभवं प्रत्यक्षशापायता पदर्शिताश्रवणादिविधेः॥ न तु पदार्थव्याख्यानादेव स्वयमेव वा-
क्यार्थं प्रतिपाद्यते॥ किं वाक्यार्थकथनेन॥ सत्यं संबंधादीनामर्थात्प्रतिभासो वाक्यार्थकथने भवतीत्याह शास्त्र-
स्य संबंधाभिधेयप्रयोजनानीति॥ मुमुक्षुणा ब्रह्मानुवाय विचारः कर्तव्य इति वाक्यार्थः॥ कथमात्रार्थसंबंधा-
दि प्रतिपत्तिरिति तदाहे तदुक्तं भवतीत्यादिना॥ ननु ब्रह्मज्ञानद्वारेण कामममानमोक्षसाधनो विचार इति
फलसंबंधेऽपि कथं विषयादिसिद्धिरिति तत्राहार्थाच्छास्त्रस्येति॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचा-
र्य श्रीमत्प्रकाशानंदविरचिते पंचपादिकाविवरणे तृतीयं वर्णकं समाप्तं॥ ॥

पं.वि. नसुनर्थस्य सिद्धमित्यादिभाष्यस्य तात्पर्यमाह। प्रयोजनविषयसंबंधानाक्षिपतीति॥ ननु विधिसामर्थ्यादेव प्रयोजन
१५८ दिष्ववगतेषु कथमाक्षेप इति चोदयति कथमिति॥ परिहरति प्रसिद्धशब्देनेत्यादिना॥ ननु प्रतिपन्ने शब्देनानु
द्यप्रतिपादयितुमशक्यत्वात् कथमविषय इत्याह कस्मादिति॥ अनधिगतार्थताभावादिति परिहरति प्रतिपाद्य
तेनेति विषयावगमद्वारा प्रयोजनस्य पूर्वविगमेनैव सिद्धत्वात्तस्य प्रयोजनमर्थीत्याह न तच्छ्रोतेनावगमादि
ति॥ अप्रसिद्धपक्षे संबंधप्रयोजनं चाक्षिपति॥ ननु नधिगतार्थ एव प्रमाणेन प्रतिपाद्यते प्रयोजनं चतेन
ति चोदयति कथमिति परिहरति प्रत्यक्षादिप्रमाणे विचारानपेक्षैस्तेनानधिगत एव प्र
तिपाद्यते॥ यत्र विचारापेक्षया प्रमाणेन वस्तु प्रतिपाद्यते तत्राप्रतिपन्नमुद्दिश्य विचारानुपपत्तेः प्रतिपन्ने वि
मर्शदर्शनात्तु विचारापेक्षप्रमाणेनानधिगतावगम इत्यर्थः॥ न च प्रसिद्धपक्षे संबंधः कथमाक्षिप्तोऽप्रसिद्ध १५८
पक्ष इति तत्राह प्रसिद्धं पुनर्यदि नामेति॥ अविज्ञातेन तत्कारणोपपत्तितत्त्वज्ञानार्थमूहस्तर्क इत्यक्षपाद

सूत्रवचनात्सामान्यप्रतिपन्नस्य चाविशेषरूपेण विशेषतोऽव्यापनात् दर्शनगोचरस्य चाविशेषनिर्णयस्य प्रमाणानु
ग्राहकस्तर्क इति लक्षणोऽप्यसिद्धिन विशेषप्रतिभासगोचरतया विचारयोग्यत्वप्रदर्शनेन त्रितयमपि समाधत्त
इति भाष्यस्य तात्पर्यमाह। स्थितावत्तु सत्यादिनेति॥ ननु समन्वयाध्याय निरूपणेन ब्रह्मैव विषयः प्रतिपाद्य
त इति सिध्यति फलाध्याये। ननु फलविशेष इति न निश्चयमत्र प्रतिपादनीयमिति तत्राह श्रोतं प्रवृत्त्यर्थमि
ति॥ ननु प्रेक्षावतेत्यादि चोद्यपरिहारौ स्पष्टौ॥ ननु प्रयोजनविशेष एव प्रवृत्त्यंगं भवति न विषयसंबंधाविति
चोदयत्येवमपि प्रयोजनविशेष एवेति॥ ननु साधनमपि प्रवृत्तिविषयं शक्यसाध्यं चानवगम्य फलज्ञानात्तु
प्रवर्त्तत इति तत्राह॥ न च विषयभावमनापन्नमिति॥ ननु फलसाधनं प्रवृत्तिविषयो न फलमिति तत्राह कि
द्विक्रियाविषय एवेति॥ प्रयोजनसमवायि वस्तु कर्मकारकतया विषयो भवति॥ ततश्च प्रयोजनप्रतिप
त्तौ विषयोऽप्यंतर्भवतीत्यर्थः॥ ननु कुलालदंडादिव्यापारोऽस्ति विषयो घटश्च प्रयोजनमिति विषयप्रयोज

पं.वि.
१५९
नयोर्भेद इति तत्राह ॥ इदंतोद्देरपीति ॥ सत्यं प्रयोजनसमवायी विषयः प्रयोजनं तु द्वावेव न भवतीति किंतु प्रयोजनं
प्रतिकरणलक्षणस्य पुरुषव्यापारविषयस्यानन्यसाधारणतया ग्राह्यप्रतिपादनतया वा विषयाभावे दर्शि
तप्रयोजनसाधने नियमेन प्रवृत्तिर्भवतीति नेत्यर्थेति परिहरति समम एवेत्यपीत्यादिना ॥ नत्र प्रवृत्ति
नियमाया अनन्यसाधारणतया विचारतुजन्यज्ञानयोस्तु भूयमानतया प्रयोजनमपि स्वरूपेण वि
षयतया पृथग्वक्तव्यमिति दर्शयितुं विपक्षे दृष्टान्तमाह यथा विविदिषाज्ञान इति विषयस्य संबंधिरूप
तयोक्तत्वमिति संबंधवत्त्रापृथक् संबंधो वक्तव्य इति तत्राह संबंधोप वक्तव्य इत्यादिना ॥ तत्रानन्यप्रति
पाद्यत्वात्साधनांतरनिवृत्तिरूपाद्व्यत्वात् संबंधस्यापि पृथग्वक्तव्य इति दर्शयितुं विपक्षे दृष्टान्तमाह ॥
यथा साधुशब्दपरिज्ञानमित्यादिना पमर्थो व्याकरणारंभसाध्वि विविदिषाव्यापाराद्व्यापारांतरैः साध्यमपि सा १५९
धुशब्दज्ञानं न विविदिषाव्यापारस्य विषयः संबंधाभावात्किंतु व्याकरणेन संबंधात्तस्य विषयो भवत्यतः तदर्थं

न कविरिति विविदिषाव्यापाराद्व्यर्थः ॥ नन्वेवमनन्यतमात्तिधानेनान्यतमस्यार्थसिद्धत्वान्न पृथगभिधानेन क
त्यमिति नेत्याह ते नपुरुषार्थरूपेत्यादिना भिथंतर इति पृथग्वक्तव्यानीत्यर्थः ॥ न चान्यतमेनान्यतमस्य सिद्धिः
मसत्यपेक्षितत्रितराभावस्य दर्शितत्वादिति ॥ ननु स्वरूपभेदे पृथगभिधानापेक्षायामपि किमर्थं त्रितयमे
भूयपदस्यं गमिति ॥ तत्र प्रतिकर्मु तेन प्रवृत्तिहेतुत्वं दर्शयतीत्यनाविर्भावापि प्रवृत्त्यंगता पुरुषार्थ
इत्यादिना ॥ ननु वक्तव्यमपि त्रितयं प्रसिद्धाप्रसिद्ध पक्षयोरनुपपन्नमित्युक्तमिति तत्परिहारतयोक्त
भाष्यस्याधिकरणपरिसमाप्तेस्तात्पर्यमाह ॥ तत्र विप्रतिपत्तेरेकांतप्रसिद्धतामित्यादिना ॥ तत्र प्रसि
द्धमात्रेण विचारविधानोपपत्तिः उद्देशानसंभवादेकांतप्रसिद्ध्यभावाद्धि विचारजन्यज्ञानस्यानन्यसाधार
णतेति विप्रतिपत्तिग्राह्योऽब्रह्मशब्दस्य सत्वे रूपलक्षणार्थः ॥ नन्वेवमपि विचारणशास्त्रस्य विषयसंबंधौ
न समर्थितावितिवादश्यतिनन्वत्र लब्धवदानानामिति ॥ ननु ब्रह्मजिज्ञासेतिशास्त्रस्यापि समन्वयविषयोनिर्दिष्टः ने
त्याह शास्त्रस्य तेषामिति मद्भवाक्यानि न्यायविषयाणि न्याया च प्रमाणप्रमेयसंभावनादिविषयाइति ॥ ननु संभाव

पं.वि नावगमपर्यवसानं हि प्रयोजनमिति नेत्याह प्रयोजनं चेति प्रणाड्या परंपरयापीत्यर्थः॥ धर्मार्थाभ्यां स्वर्गमेव प्रा
१६ प्नुत इति तयोस्तत्परता॥ ॥ननु करणेति कर्तव्यतयैव केवलं प्रयोजनमिति निर्णीतं प्रथमे तंत्रे तथा ह्याग्ने
योऽष्टाकपाल उपांशुयाजमंतरा यजति॥ अग्नीषोमीयमेकादशकपाल इति पौर्णमास्यां कर्मत्रयं॥ तथाग्नेयो
ऽष्टाकपाल ऐंद्रं दध्यैंद्रं पय इति दर्शे त्रयं इत्याग्नेयादयः षड्यागास्तेषां करणभूतानां द्विविधान्यंगानि निरूपि
तानि अर्थकर्माणि संस्कारकर्माणि चेति फलोपकार्यंगानि प्रयाजादीन्यारादुपकारकाण्यर्थकर्माणि स
मर्थदीनि द्रव्यद्वारेण यागस्वरूपोपकारितया संनिपत्योपकारकाणि संस्कारकर्माणि॥ तत्रोभयविधानामं
गानां प्रधानापूर्वद्वारेण स्वर्गसिद्धिरेव प्रयोजनमित्येवं शास्त्रकृतां तात्पर्यं विचारस्य संस्कारकर्मवच्छब्दप्रमा
णस्वरूपोपकारितयार्थस्वरूपज्ञानविचारस्य ब्रह्मावगमफलोपकारितया वा गम्यमानब्रह्मविषयत्वमुभयविचारस्य युज्यत इ १६
त्यपसिद्धान्तं चोदयति॥ न नाग्नेयादिनामिमादिना॥ ननु वेदान्तानामेव ब्रह्मावगतिसमर्थानां तत्र कथमिति कर्तव्यतयावगमफलतया

वसानं हि ब्रह्मविषयतेति तत्राह तेन यद्यपि वेदांतानामेवेति॥ ननु कथं संभावना बुद्धिहेतुतया न तु विषयस्य विचारस्य ब्रह्मावग
मजनकत्वात् हि विषयता न ह्यन्यविषयो व्यापारोऽन्यविषय इति॥ तत्राह न हि छेत्तुरिति॥ द्विविधं हि कर्मकारकं किंचिदव्यवधानेन
व्यापारजन्यातिशयवद्यथा घट्यमाननिपतनव्यापारस्योर्ध्वाधोदेशसंयोगविभागातिशयवद्विशिष्टः कुठारः कर्तृव्यापारस्य
व्यवधानेन कर्मकारकं भवति॥ किंचिदुद्देश्यफलवत्तया करणव्यापारव्यवधानेन कर्म भवति यथा द्वैधीभूतो वृक्ष इति तत्र क
र्तृव्यापारः करणव्यापारव्यवहितोऽपि वृक्षद्वैधीभावफलश्च छ्यते वृक्षं छिनत्तीति॥ कर्तृव्यापारस्य तत्कर्मतावगमात् स एव
वृक्षः कुठारव्यापारस्य साक्षात्कर्म भवति॥ अव्यवधानात्॥ ननु करणस्य कुठारस्य कथं कर्तृत्वे इत्युच्यते॥ सर्वाणि खलु स्व
व्यापारापेक्षया कर्तॄणि सर्वकारकव्यापाराणां च कर्मफलतया साध्यत्वेन अक-- रणकर्मभेदोऽवांतरभेदापेक्षया भवति॥
तत्र कर्ता साधननियोगेन वा धातुना विशेष्यव्यापारतया वा स्वतंत्रव्यापारः॥ करणं फलं प्रति संनिपत्योपकारकं॥ फल
समवायि कर्मकारकमिति॥ काष्ठानि पचंतीत्यादि व्यपदेशः स्वव्यापारकर्तृत्वापेक्षया नावांतरभेदापेक्षयेति॥ तस्मा

पं.वि. तकर्तृव्यापारस्य करणव्यापारव्यवधानेन व्यवस्थककर्मतैवं विचारव्यापारस्यापि प्रमाणप्रमेयसंभावनावगमद्वारेण ब्रह्मावगमस्योद्देश्य

१६३ त्वाद्वगमहेतोरवगम्यविषयत्वाद्वा फलकर्मत्वेन विरुध्यतेऽथाव्यवहितमेव कर्मतोद्देश्यमिति तत्राह यथान्यत्र कर्तृव्यापार इति॥

अत्रेति कर्तव्येषु द्विविप्रमाणमागमो न्यायव्यतिरेकी च प्रयाजादीनामागमान्न कृष्यादीनां कर्तृव्यापारस्य चांकुरादेर्धीभावां

गतान्वयव्यतिरेकाभ्याम् अत्र तु शब्दोपलब्धिसंबंधज्ञानसंस्कारसहकृतात् शब्दादर्थावगमे सति विचारस्यांगतानान्यतरसम

णोन्याप्यवगता शब्दादेव विचारानपेक्षादवगमजननादिसपक्षसिद्धांतिने परिहरति विषयमुपन्यस्यति॥ ननु यथ

चक्षुरादयः सम्यग्ज्ञानहेतवोपि दोषसंयोगात् संशयविपर्यासौ जनयंति पुनः सम्यक्ज्ञानजन्मनि च दोषापकर्षमपेक्षंते।

एवं शब्दः शक्तितात्पर्यज्ञानवद्विपर्ययज्ञानदोषात् संशयादिज्ञानमुत्पादयति तत्र दोषापनयनेन विपर्यासादिनिवृत्त

येशक्तितात्पर्यादिविचारोगभावमश्नुत इति चोदयति ननु संशयविपर्यासद्वारेणेति॥ तत्र किं शब्द एव दोषवशादन १६३

यथाज्ञानं जनयति विचारश्च तदपनयनेन तथा प्रतिभिनिहेतुतां प्रतिपद्यते किं वा शब्दः सम्यक्ज्ञानस्यैव हेतुः का

र्यांतरात्तदन्यथाज्ञानं विचारश्च प्रतिबंधमात्रं निरावर्ष्टे निवृत्ते च प्रतिबंधे शब्दादेवार्थनिर्णय इति तत्र न तावद्विपर्यासादि निरा

सेनार्थनिर्णयहेतुता विचारस्येत्याह नैतत्सारं यत्तद्द्येनेकमिति॥ अयमाशयः॥ न शब्दसमवायी कश्चिद्दोषोस्ति पुरुषेंद्रियस

मवायित्वाद्दोषाणामतः शब्दोन विपर्यासादिज्ञानहेतुः किंतु शब्दानां प्रयोगांतरे ष्वन्यथान्यथा शक्तितात्पर्यावगमनदर्श

नादिहापि तथाविधत्वसामान्यतो दर्शने नार्थविरोधे बुध्यावपुरुषदोषेणान्यथा ज्ञानमुत्पद्यते शब्दाच्च तत्ता न मेवोत्प

द्यते न तच्च शब्दास्वरूपदोषाच्च बहुषु परस्परविरोधिषु ज्ञानेषु जातेषु शब्दशक्तितात्पर्यावधारणं पुरुषदोषापनय

नेन प्रतिपक्षज्ञानांतरमात्रं निवर्तयति निवृत्ते च प्रतिबंधे शब्दादेव तत्त्वज्ञानं जायते जातं च निश्चलमवतिष्ठते तस्मा

द्विचारः प्रमाणेति कर्तव्यतैव तत्त्वविषय इति एवमयसिद्धांते निरस्ते पूर्ववादिनं सिद्धांतयत्यत्र ओत्यनेयद्यपि वाक्यार्थ

ज्ञानमित्यादिना॥ तत्र सामान्यतो दृष्टनिबंधनेनेति प्रयोगांतरेष्वन्यथान्यथा शक्तितात्पर्यदर्शनादिहापि तथाभा

वबुध्या॥ तथाविधार्थस्य च लोकेऽन्यथाभावदर्शनादिहाप्यन्यथाभावबुद्ध्येत्यर्थः॥ अयमाशयः॥ प्रतिबंधानिवृत्तौ

त्त्वामेवार्थनिर्णयात्॥ प्रतिबंधनिरासिनोप्युपचारेणवक्तृनिर्णयहेतुता हि वाक्यस्य वक्तृविषयतेति॥ अत्रेदं विचार्यं॥ किं तात्पर्यमर्थप्रमि
तिहेतुः किं वा प्रतिबंधनिरासहेतुरिति॥ केचित्प्रमितिहेतुतामाहुस्तत्र किं विज्ञानं तात्पर्यं प्रमितिहेतुर्विषयो वा विज्ञानं वा न तावद
विज्ञातं प्रमितिहेतुः नातात्पर्यविगमफलविचारानपेक्षत्वप्रसंगात् तात्पर्यविषयादन्यत्रवृत्त्यनुत्पादप्रसंगाच्च तथा च
कश्चित्सूत्रानजिघृक्षया कंचिद्ध्यायप्रमादविभ्रान्तमाहृत इति॥ तत्रापि तु ताद्धानं प्रतिपद्य समुत्तिष्ठतीनरस्तत्र
निविशति समुद्धितश्च सवितरं जानातिमज्जानजिघृक्षयेदमुक्तमिति नवपि तुराधानेनात्पर्यंहानेः संसर्गबुद्धिरिति
वनेच्छानादिप्रवृत्तिदर्शनात् स्ववचनेश्च संसर्गज्ञानपुरःसरत्वाभावे प्रवृत्त्यासंसर्गशब्दशक्तितात्पर्यकल्पनायोगात्
॥ ननु शाब्दोन मिथ्याज्ञानमुत्पादयतीति नैष दोषः॥ तत्रापि तु राधानेन तथाभूतज्ञानेवतात्पर्यं वक्तुरतत्त्वे सेतावद्विशि
न तस्माभाज्ञानेन यातात्पर्यं प्रतीतिहेतुः॥ अथ ज्ञातं तथा न विज्ञेऽत्र तात्पर्यं अवगम्यते शब्दस्यान्तात्पर्यमित्याश्रयवि १६२
षयसापेक्षत्वात्तात्पर्यस्य न तावत्पदार्थेषु तात्पर्यं वाक्यार्थज्ञानेनुपयोगात् संसर्गस्यानवगतौ न तात्पर्यविशेषणतया

वगंतुं शक्यते स्यादेतत्पदार्थेषु पदावगमपुरःसरान्वययोग्यतानिमित्तः संसर्गस्त्वपेक्षयावगम्यते तद्विषयया च तात्पर्या
वगतिरिति॥ न तावत्स्मृतिसंशयविपर्यासानामन्यतमः संसर्गावबोधः तत्र परिशेषाच्छब्दजन्यतया संसर्गबोधः प्रमा
णमेव स्यात् अत्र शक्तिरिव सामान्योपाधौ तात्पर्यः प्रतिवाक्यं विशेषे तात्पर्यभेदात् किं च पदार्थवत्संसर्गेवि शक्तिमात्रनिबं
धनोवगमो न तात्पर्यनिबंध इति अनुमातुं शक्यते॥ शाब्दानां च पदार्थप्रदर्शनमुखेन तात्पर्यायाध्ययनयोगितयैवान्व
यासिद्धतात्पर्यमात्रावगमाधीनः संसर्गावबोधो न शब्दनिबंधनश्च स्यात् तस्मात्पदानामेव संसर्गप्रतिपादनसाम
र्थ्यान्मुख्यलक्षणादिद्वारेण प्रमाणान्तरोविरुद्धसंसर्गे प्रतिपन्ने दोषांतरानिमित्तसंशयविपर्यासादिज्ञाननिरा
करणाय तात्पर्यावगमापेक्षा॥ तच्चेदं त्रयमप्यवरूपमिस्यारभ्यालमपि विस्तरेण सन्नःप्राकृतेन पंथा नोक्तमर्थं निगमय
ति समर्थं दर्शयितुं अस्ति तावदिति स्पष्टार्थः॥ ननु न प्रत्यक्षसामान्ये नापि लोके प्रतिपत्तुं शक्यं प्रमाणान्तरागोचरत्वात्
नाप्यागमसामर्थ्यान्नेयमपुरुषमानस्य प्रत्यक्षशब्दस्यानवच्छिन्नार्थता तन्नवयदमात्रादेवार्थान्तराक्षिहिताना आद्यर्थान्तरेष्वपि

पं.वि.
१६२

हत्वात्तस्यात्र प्रसिद्धमुद्दिश्य विचारविधानोपपत्तिरिति बोदयति॥ कथमिति॥ तत्र श्रुतिसूत्रयोर्बलत्शाब्दप्रयोगसा
मर्थ्यादेव जातसादि व्यतिरिक्तं किं विद्वत्तत्प्रतिपत्त्युं शक्यत इत्याह॥ बलत्शब्दस्यावद्ध्यादिना॥ नन्वर्थान्तरे तत्त्तस
द्भावे किं प्रमाणमिति प्रयोगार्थपितिरित्याहातो नूनमन्यदेवेति॥ ननु श्रौतप्रयोगानुपपत्तिर्नापूर्वमर्थं गमयति
लौकिकप्रयोगाधीनत्वाच्छ्रौतप्रयोगस्येति तत्राह तेन स्वर्गापूर्वदेवतेति॥ अपूर्वमिति तानि धर्मोणि प्रथमान्यासं
निसादेविदे धर्मशब्दप्रयोगोभिप्रेयते॥ ननु वाक्ये प्रयुक्तं पदं प्रमाणं तदनधिगतमर्थं न प्रतिपादयति॥ पद्यु
र्थांशेनुवादमात्रत्वादित्याह येनेत्यस्मारमिति न प्रत्यक्षवत्संबंधग्रहणाभावादनुमानादिवद्वेत्यर्थः॥ ननु दृष्टि
तं स्वर्गादिवद्दिनेत्याह स्वर्गोद्यर्थापीति॥ सन्ति हि तानेकवाक्यार्थसामर्थ्यलभ्यः स्वर्गादिपदार्थ इत्यर्थः॥ तत्र व
वाक्यार्थप्रमितिविवक्षया प्रसिद्धार्थपदान्तरैः सहाप्रसिद्धार्थपदप्रयोगानुपपत्तिरेव प्रतियोगेन संबंधग्रहणा १६२
नपेक्षयायमपूर्वपदार्थपदवाच्यत्वेन प्रतिपादयतीति परिहरति॥ यस्मिन्वाक्यपदकपदमिति विमलभ्यो स

द्दिशेषरहितवेदसूत्रवाक्यार्थनिर्णयस्यानुपलभ्यत्वादिति भावः॥ ननु सह प्रयोगानुपपत्तिर्नियामकाभावात्तु
कं विदथमुपस्थापयतीति तत्राह तत्र निगमाभिहितके निगमो नाम प्रसिद्धार्थेन तद्वयवोपरि त्यज्यशब्दस्य शब्दे
कदेशानुगमेनार्थान्तरवृत्तिर्यथा देहात्म्य दिशाब्दोनाउपविलवस्तुसत्तगात्तनवसादार्था ह्यवेकदेशानुगमे
नाथानुवृत्तिः प्रसिद्धार्थतदवयवोपादानेनार्थान्तरवृत्तौ लक्षणा गुणवृत्तिप्रसंगात्रिरुक्तेनामशब्दस्य स
र्वविषयवार्थानुगमेन प्राप्तिद्धार्थान्तरे प्रवृत्तिर्यथा सोमशब्दस्य पार्वतीसहितमहेश्वरे प्रवृत्तिः व्याकरणं प्रस
यविधानसामर्थ्यादर्थनिश्चयः॥ यथा वादीनित्यादौ ल्यपि निप्रत्ययविधानसामर्थ्याद्दनशीलोवगम्यते॥
ननु प्रसिद्धवलेनाप्रसिद्धमुपादीयते न चाप्रसिद्धे न प्रसिद्धं सत्यत इत्यत्र को विशेषइति तत्राह न हि प्रसिद्धेस
प्रसिद्धिः नैसर्गिकः प्रागभावः प्रसिद्धिः प्रसिद्धपदार्थैः सह वाक्यार्थनिर्णयाय प्रयोगानुपपत्तिरेवागन्तुकी तस्य
प्रागभावस्यनिवृत्तिहेतुरिति भावः॥ नन्वावयवार्थस्तामान्यानुगमानां सर्वतोविप्रसक्तिसंभवात् उपादेयार्थानि

पं.वि.

प्रमाणयोगाद्वाक्यार्थप्रतिपत्तिनियमो न स्यादिति चोदयति ॥ ननु निगमादिवशेनैवास्त्वनिगूय निसंधिरुत्तरमाह नत्तर्हि निगमा-
३६४ दीनामिति रूढिसामर्थ्यादेव सर्वत्र वाक्यार्थनियमे लोकप्रसिद्धं वक्तारमनर्थकं स्यादिति भावः पूर्ववादी निगमादीनामर्थ-
वत्तामाह ॥ भवत्यर्थवत्तेति ॥ स्वार्थादन्यत्रेति अर्थान्तरविवक्षायामित्यर्थः ॥ विनियोगादितिवाक्यार्थसंसर्गनिमित्तोक्तसेत्यर्थो
भावः ॥ वाक्यार्थनिर्णयं निमित्तीकृत्य पदान्तरैः सह प्रयोगानुपपत्तिरेव निगमादिवशेनार्थमादृता सत्त्रि हि न यदार्थसंसर्ग-
योग्यतया प्रयोजनपर्यन्तमेव पदार्थमाददातीति वाक्यार्थनियमसिद्धिरिति ॥ सिद्धान्ती गूढाभिसंधिं विवृणोत्येवं तर्ह्येकार्थ-
नियमाय इति प्रयोगानुपपत्तिर्निगमाद्यनुगृहीता फलपर्यन्तं वाक्यार्थन्व्यपि पदार्थाकांक्षानुगृहीता न नियतपदार्थोपादानहेतु-
भावे रूढेर्नैव विद्विष्यत इत्यर्थः ॥ नन्वेवमपि कथं ब्रह्मशब्दस्य ज्ञातादि विलक्षणे निरतिशयपुरुषार्थे मुमुक्षोर्जिज्ञास्यायोग्येव-
स्तुनि निगमवशाद्वृत्तिरितिनदाह न हत्र ब्रह्मशब्दो वर्तमानरूति ॥ नन्वेवमपि यत्किं विदापेक्षिकमहत्त्वसंपन्नं वस्त्वनुग-
म्यतामिति ॥ नेत्याह प्रयोगात्तु गमेवासतीति तत्राहेतुर्वाक्यार्थान्वयीति ॥ तत्राल्पहनामवस्तु नोदेशाकालवस्तुपरिच्छेदः ते- ३६४
ष्वाद्यतिनिरतिशयमहत्त्वं तत्रोपपदादिसंकोचकाभावे जिज्ञास्यस्य पुरुषार्थतया वाक्यार्थान्वयं चेवतदपि ब्रह्मपदेना-

नुगम्यत इत्याह तत्तश्च कालकृतावच्छेदनिमित्तस्येत्यादिना बृहत्त्वं चेत्सतः प्राक्तनेन ग्रंथेन। व्योनिस्यशब्देन त्रिविधमपि महत्त्वं दर्शि-
तमित्यर्थः ॥ ननु बृहत्त्वादयो गुणा न ब्रह्मत्वोपयोगिनः तत्कथं ब्रह्मपदादवगम्यंत इति चोदयति कथमिति नैष दोषः ॥ गुणतोऽपकृष्टे-
ष्वल्पबुद्धिदर्शनात्तथा हि ॥ गुणहीनं दोषभूयिष्ठं च वस्त्वल्पं विद्यमानं सममन्यते ॥ गुणभूयिष्ठं दोषहीनं च महान्तं कथयति ॥ अ-
तो गुणतोऽल्पत्वनिराकरणेन महत्त्वं दर्शयितुं बोधगुणतोपकृष्टतयाल्पत्वाद्बृहत्त्वमनुगम्यत इत्याहा बोधात्मकवस्तित्वसादित्ता-
भावेतनस्यापि संसारिणो दोषभूयिष्ठत्वाद्गुणतोपकर्षत्वान्निरतिशयमहत्त्वासिद्धेः सर्वदोषरहितमुक्तोत्कर्षोप्यनुगम्यत इत्या-
ह ॥ मुक्तमिति वा विद्याकामकर्मपरतन्त्र इति चेतनस्यापि मुक्तस्य सर्वविषयज्ञानाभावे सर्वकार्यनियमनादिशक्त्यभावे च
परिच्छिन्नज्ञेयकार्यविषयज्ञाननियमनशक्त्यभावात्संततोपकर्षादल्पता स्यात्तद्व्यावृत्त्यर्थमाह सर्वज्ञं सर्वशक्तिसमन्वितं-
चेतदित्यादिना ॥ ननु बृहच्छब्दप्रयोगेपि जातिजीवरूमलाग्नानशब्दराशिषु नेतावानर्थः प्रतीयते तत्कथमनुगमादित्येता-
दृशस्योर्थस्य प्रतिपत्तिरिति ॥ तत्राह ॥ सिद्धे हि वस्तुनि प्रयोग इति प्रमाणान्तरगृहीते प्रयोगसामर्थ्यादेवोर्थ्यप्रतिपत्तावल्पं वाम-
हद्वाय या प्रमाणान्तरेणप्रतिपाद्यते तथैव शब्दार्थः प्रतिपन्नो यदा पुनः प्रयोगसामर्थ्यमनपेक्ष्य शब्दावयवसामर्थ्यादेवार्थोनुगम्यते

पं॰वि॰
३६५

तदाप्रमाणांतरेयपदप्रकरणादीनां संकोचहेतूनां अभावाद्यथासामर्थ्यं मुख्य एवार्थः प्रतिपत्तव्य इति भावः उक्तेर्थे भाष्यमवतारयति ॥
तदेतदाहेति ॥ ननु सोऽयं ब्रह्मशब्दार्थोऽनुगम्यते ॥ किं वा श्रौतस्य न तावत् श्रोत्रस्य पौरुषेयप्रयोगस्य प्रमाणांतरापेक्षत्वात् तदभावान्ना
पि श्रौतस्य तत्संज्ञानं यतो वाङ्मात्रनिभृता निर्द्दशादिशास्त्रे निर्णीयमानार्थत्वादनुगमानपेक्षणादिति नैष दोषः श्रुतिप्रमाणाव
गतविषयतया तन्मूलस्यैव सोऽयं ब्रह्मशब्दप्रयोगस्योत्तरसूत्रप्रतिपाद्यश्रुतिप्रमाणावलगम्यस्वरूपमनपेक्ष्यैवार्थानुगम
विनार्थोपादानुत्तरसूत्रसाध्यसिद्धवत्कारणार्थोपादानानुपपत्तेश्च ॥ श्रौतस्यापि ब्रह्मशब्दस्यार्थावगमो वर्ण्यते ॥ वाक्यार्थान्वयितया
युक्तस्य ब्रह्मशब्दस्य वाक्यप्रमाणमनपेक्ष्यैवान्यतः सिद्धैर्व्युत्पत्त्यादनुगमापेक्षणात् ॥ ननु तर्हि पदानुगमस्य वर्णितविशिष्टार्थविष
ये संभावनामात्रबुद्धिहेतुत्वात् प्रमाणांतरानधिगतस्य पदार्थस्वरूपस्य वाक्यार्थान्वयितयान्तः निर्णयहेतुत्वमिति वादयति ॥
नन्वेवमपि कस्तस्यानुसारेणेति ॥ तत्र जिज्ञासापदस्य सन्निहितस्यानिर्णीत जिज्ञास्यवस्तुसापेक्षत्वात् अनपेक्षितार्थस
मर्पणस्य ब्रह्मशब्दस्यानिर्णीतप्रतिपन्नवस्तुमात्रसमर्पणेन वाक्यार्थनिर्णयहेतुत्वं न विरुध्यत इति परिहरति तस्समेव
मतएवेति ॥ सर्वस्यात्मत्वाच्चेति भाष्यस्य तात्पर्यार्थमाहेदमपरं ब्रह्मशब्दार्थस्येति ॥ नत्वात्मन्यपि न प्रमाणांतरसद्भावावि

BHAU DAJI

षयत्वात् अप्रमाणिकस्य च ह्निवंद्यादिवद्वस्तुत्वादिति तत्राह सर्वो ह्यात्मास्तित्वमिति ॥ ननु शून्यएवायमात्मा ज्ञानमात्रे
कथमात्मास्तित्वप्रसिद्धिरिति शून्यवादमाशंक्याह यदि नाम्नोऽस्तित्वप्रसिद्धिः स्यादिति ॥ न चात्मपदार्थे प्रसिद्धस्वभावगतरूप
ब्रह्मपदार्थस्य प्रसिद्धिरिति तदाह आत्मा च ब्रह्मेति ॥ ननु नादिवृद्धव्यवहारे ब्रह्मशब्दस्यात्मनि प्रयोगादर्शनात् कथं ब्रह्मशब्देना
त्मा जिज्ञास्यत्वेनोपादीयत इति चोदयति ॥ कथं पुनरात्मा ब्रह्मेति लोके प्रयोगाभावेपि वैदिकप्रयोगसामर्थ्यात् एवाऽयमा
त्मा ब्रह्मेत्यादौ ब्रह्मशब्देनात्मा जिज्ञास्यत्वेनोपादीयत इति परिहरति ॥ वेदांतेष्विति ॥ ननु ब्रह्मशब्दाभिधेयो यमात्मा न
हि प्रसय एव घः किं वागमैकसमाधिगम्य इत्यत इति नेत्याह आत्मानमेव चेति ॥ न तत्र प्रतिपन्नसु हि रूपविचारसंभवात् अप्रतिपाद्यत्व
सिद्धेसाह ॥ तदेवमहंप्रत्यय एवेति ॥ ननु वेदांतेषु संज्ञापरतया आत्मनि ब्रह्मशब्दः प्रयुज्यते ॥ किं वात्मनो ब्रह्मशब्दार्थत
दात्म्याभिप्रायेण तत्र श्चातिरिक्तार्थत्वात् ब्रह्मशब्देनात्मोपादीपानदयुक्तमिति नैष दोषोतिरिक्त ब्रह्मस्वरूपनिर्णय
विवक्षया प्रसिद्धांशस्य ब्रह्मशब्देनोपादानादेरकस्मिन्नप्यर्थे विंबप्रतिबिंबादिवत्प्रतिभासाप्रत्तिभासोपपत्तेरेवं न हि
प्रत्यक्षगोचरतयाः न न्यसाधारणताभावादिविषयत्वेन सिध्यतीत्याशिपतियदि न हि लोके ब्रह्मात्मत्वेनेति समाधत्ते

पं.दि. तद्विशेषप्रतिविप्रतिपत्तेरिति भाष्यार्थं विवृणोति॥ तस्यमाह भिन्नेत्यनिप्रसज्यत इत्यादिना॥ नन्वस्मिन्विप्रतिपत्तेः कथ
१६६ मस्य निर्णीयत इति॥ तदाह तावश्च वक्तव्यत इति॥ ननु प्रसिद्धे पदार्थे कथं विप्रतिपत्तिरिति तदाह ततः सामान्यतः प्रसि
द्धेमर्थेऽपीति॥ ननु प्रतिपन्नविशेषं वस्तु स्वयमप्रतिपन्नमेवेति कथमुद्दिश्य विधानाभावे शक्यप्रतिपाद्यत इति तत्राह॥
सामान्यतः सिद्धत्वाद्युक्त इति॥ ननु नास्ति ब्रह्मणि सामान्यविशेषभावः सत्यत्वाशरीरेंद्रियमनोबुद्धिशून्यकर्तृभोक्तृभव
तब्रह्मात्मनोपपन्नत्वात्तत्प्रसंगधर्मानुगमेन सिद्धिः सामान्यं तत्र प्रसक्तधर्मानुगमेन सिध्यन्त्वं विशुद्धस्वरूपेपि सामा
न्यतः सिद्ध इत्युच्यते॥ ततः प्रसक्तानुवृत्तविशेषानतो विप्रतिपद्यते तत्र विशेषानवानुरागविरोधिनासाधारणस्वरूपे
ण निर्णीयत इति॥ कथं विप्रतिपत्तिस्तां दर्शयति॥ देहमात्रमित्यादिना कथं पुनः प्रसक्तसिद्धे पदार्थे जायमानस्यप्र
युज्यमानस्याहंप्रत्ययस्य नद्वयस्य वाने कार्थसाधारणशब्दात्वाविप्रतिपत्तिरिति तत्र दृष्टांतमाह तद्यथा गोशब्दस्येति॥ १६६
जातिर्वैदिकैः प्रतिपन्ना व्यक्तिः सांख्यादिभिरुभयं व्याकरणैराकृतिः स्वावयवसंस्थानमर्हतादिभिस्त्रितयमपि नै
यायिकैः॥ क्रियागुणसामान्यादयोपि यथादर्शनमिति यथा गोशब्दप्रयोगे जात्यादीनामन्वयव्यतिरेकनियमादेव

स्यादिव्यभिचाराभावात्तच्छब्दार्थत्वाशंका तथा शरीरादीनामन्वयव्यतिरेकनियमादात्मत्वाशंकेति भावः स्पष्टमूर्ताकारतया स्थू
लमूर्ताकारतया निरामक(?)प्रसिद्धेश्च शरीरमात्रस्य विप्रतिपत्तिं दर्शयति देहमात्रं चैतन्यविशिष्टमिति॥ शरीरस्यात्मत्वशंकायां प्र
सक्तं प्रमाणमाह॥ तथाहि मनुष्योहमिति॥ देहशब्दार्थमाह देहमात्रमिती तिलिंगेंद्रियस्यनिरपेक्षाधारः शरीरं नाम तत्रा
वयवान्तरेषु छिद्यमानेष्वपि प्रायेण त्वगिंद्रिये तिष्ठति न शरीरं छिद्यत इत्यभिप्रायेण स शरीरं स्कार इत्युच्यते ननु मूलचतुष्ट
यतत्त्वादीनां पंचमं चैतन्यमतत्त्वमवशिष्यत इति तत्रेवस्यार्थमाह मात्रशब्देन देहातिरिक्तमित्यादिना पक्षांतरमाहेंद्रियाण्ये
वेति॥ ननु यस्मिन्विज्ञानमुत्पद्यते स चेतनो न हींद्रियाश्रयं विज्ञानमुत्पद्यते मनुष्योहं जानामीत्यवगमात्तत्र कथं चेतनत्व
मिति तत्राहेंद्रियाणां चक्षुरादिमनःपर्यंतानामिति॥ अयमाशयः सत्यपि शरीरे विषयज्ञानानामिंद्रियैरन्वयव्यतिरेकव
त्त्वात्करणत्वेयान्वयव्यतिरेकवत्कल्पनादाश्रयतयान्वयव्यतिरेकवत्कल्पनस्यासहितत्वादिंद्रियाण्येव विज्ञानाश्रयाणी
ति॥ नन्वेकस्मिन् शरीरे बहूनामिंद्रियाणां चेतनत्वे रूपमद्राक्षं इदानीं शृणोमीति प्रत्यभिज्ञानं स्यात्॥ नो चेत्तेषु रूप
रसादिषु युगपत्स्यान्न तु क्रमेणेति तत्राह क्रमेण वरगो(?)ष्ठीवदिति एकशरीराश्रयत्वमेव प्रत्यभिज्ञाक्रमभोगयोर्निमित्तं

पं·वि· नैकत्वमित्यर्थः॥ ननु चेतनत्वेप्यहंप्रत्ययालंबनस्यैवात्मत्वं तदभावात्रेन्द्रियाणामात्मत्वमिति तत्राह तथा चेन्द्रियसामानाधिकर
१६७ ण्यमहंप्रत्ययस्येति शरीरस्याप्यहंप्रत्ययालंबनत्वं विज्ञानान्वयव्यतिरेकयोरिन्द्रियात्मनामप्रयतेनाप्युपपत्तेरिति भावः॥ प
क्षांतरमाह मन एव चेतनमिति किमत्र न्यायकं प्रमाणमिति तदाह दृश्यते हि स्वप्नइति स्वप्नमित्यर्थः॥ स्वप्ने चक्षुराद्यभा
वे केवलमनसि विज्ञानालंबनानाहंप्रत्ययविषयत्वयोरविकल्पयोर्दर्शनाद्रूपादिविज्ञानानां चक्षुराद्यात्मयत्वे तदभावे
केवलेमनसि रूपादिस्मरणानुपपत्तेः॥ अथ तेन च सिद्धे चक्षुरादीनां ज्ञानान्वयव्यतिरेकयोः करणविषयतयाप्युपपत्ते
रहंप्रत्ययस्य च देहइव करणे कर्तृत्वोपचारासिद्धेः प्रत्यभिज्ञायाः शरीरादाविवेकत्व निबंधनत्वादेकाश्रयत्वा प्रत्य
भिज्ञायामेकत्रासादसमाश्रितानामपि तत्संगात्तस्माच्चक्षुरादिकरणं शरीराधारं मन एवात्मेति पक्षांतरमा
ह विज्ञानमात्रं क्षणिकमेकमिति वर्णत्रयशब्देन वर्णत्रयाभिधेयं विज्ञानमात्रमुच्यते तेन वा विज्ञानाश्रयस्यात्मनो १६७
भाव उच्यते इति कथं शरीरेन्द्रियाणां तावद्विज्ञेयत्वाद्विज्ञानवातत्वानात्मता मनसश्च समनंतरप्रत्ययव्यतिरेकिणा
भावादाश्रयांतरादर्शनादिति कस्तर्ह्यात्मेति तदाह तेन विज्ञानमेवेति॥ न हि सांख्यादीनामिव विज्ञानमेवा ना

दिनिधानमात्मेति तत्राह॥ स्वरसभंगुरमिति कथं न हि प्रत्यभिज्ञानेनैकत्वावगमइति तदाह। विरनोदयमिति ज्वालायामिव संत
तविज्ञानोदयसादृश्यात्प्रत्यभिज्ञेत्यर्थः॥ कथं तर्हि कर्मप्रतिज्ञानबंधमोक्षाद्याश्रयत्वं क्षणिकस्येति तदाह। विलक्षणे लोकयात्रानि
र्वाह्यमिति विज्ञानानां हेतुफलसंतानमात्रादेव कर्मफलसंबंधइत्यर्थः॥ ननु स्वप्नादिषु यात्मन्येकस्मिन् सर्वमेतन्मुख्यमुपपन्नमिति त
माह अनुभवभयपक्षांतरमितिपक्षांतरमाह शून्यमिति विज्ञानव्यतिरिक्तानां तावदात्मत्वं निरस्तं न च विज्ञानस्यात्मत्वमुक्तिसुषु
प्ते शून्यतावगमाद्दीपनएव तत्रापि विज्ञानप्रवाहइति चेन्न विषयभावात्तिरालंबनज्ञानयोगाच्च साकारज्ञानानामेव सालंबन
त्वेन सौषुप्तिकानिमितिचेन्न विशेषाभावाद्विशेषानुमानाच्चोच्छिन्नेनानुस्मर्यमाण विज्ञानत्वाच्च सुषुप्ते विज्ञानाभावः॥ किं च स
विकल्पकस्य स्वविषयविपरीतनिर्विकल्पालंबनत्वं निर्विकल्पकस्यापि प्रत्ययत्वाच्च विषयविपरीतशून्यालंबनत्वानुमानाद्
ध्यानप्रत्ययः शून्यालंबनइति गम्यते तदेतदाह सुप्ते विज्ञानलेशस्याप्यभावादिनिमान्द्य हि ज्ञानलेशस्तत्र तः किमिति तदाह
कस्मादेवेति॥ उत्थानप्रत्ययस्य पूर्वसमनंतरप्रत्ययशून्यतया कारणशून्यतास्यादिति भावः सा भूत्कारणमिति चेन्न तदाहाका
रणस्य कदाचित्कत्वेति॥ तस्मात्स्यालंबनोसदवभासीयमिति। विप्रतिपत्त्यंतरमाह अस्तिदेहादिव्यतिरिक्त इति कथं पुनर्विज्ञा

पं.वि.

न्यत्वव्यतिरिक्तस्यात्मनः सिद्धिरिति तदाहमहं सुखीत्यत्र शून्यस्य भोक्तृत्वस्येति ॥ अयमाशयः ॥ अहमित्यवभासमानो विषयसं
१६८ विदाश्रयत्वेन भोक्ता न कदाचिदपि ममत्वयोग्यत्वेन भोक्तृत्वमयमनुभवति ॥ सवाबाधितप्रत्यभिज्ञागोचरो न सुषुप्तेऽभावमनुभ
वितुमर्हति ततः शून्यक्षणिकविज्ञानव्यतिरिक्तो भोक्ता प्रत्यभिज्ञया सुषुप्तेऽपि सत्तावगमाह निच्छाद्वेषप्रयत्नसुखदुःखेषु वाश्र
यैकत्वावगमात् तथा हि भवति निमित्तभूतमभिलषितसाधनज्ञानमुत्पद्यमानमिच्छामुत्पादयते प्रथममेवस्य निर्दिष्टतदुपभोगादनन्त
रं सुखसंवेदनात् वृद्धिनीये संज्ञाते पुनर्वस्तुतरदर्शनेन तृतीये समुत्पन्ने चतुर्थे वर्तमानस्य वस्तुनः पूर्वसुखसाधनसामान्यानुसं
धानाने पंचमामवस्थायामिदं सुखसाधनज्ञानमुत्पद्यते ततः पंचमस्य वस्थास्वैकमात्मानमंतरेणेदं ज्ञानमनुपपन्नं अन्यदृष्टे
न्यस्य सुखानुभवाभावादनानुभूतेन्यस्य अप्यनुसंधानाभावात् अभ्याभिमं हितेनस्य सुखहेतुज्ञानाभावात् संतानभेदेषदर्श
नात् तथा दुःखहेतुज्ञानमपि पंचावस्थमात्मानं कल्पयति ॥ तथा हि ना हित ज्ञानपूर्वको रागद्वेषो षष्ठावस्थो षडवस्थमात्मानं
कल्पयतः ॥ रागद्वेषाभ्यां च हानोपादानप्रपंचो जायमानः सप्तावस्थमात्मानं कल्पयति ॥ तथा प्रयत्नानंतरमष्टमामवस्थां १६९
यां सुखदुःखे जायमाने अष्टावस्थमात्मानं कल्पयतः न च क्षणिकेषु आत्मसुसंतानभेदे धिवायं व्यवहारः संभवति तथा नाहं ज्ञा

नमित्यहं सुखे स्वो विज्ञानेषु ॥ किं तु मम ज्ञानमिति ॥ न च ममात्मेति वदुपचारो बाधाभावादिति इत्तरत्र संबंधप्रत्ययस्यात्मशब्दे न बाधा
तस्मादहं सुखे त्वप्रत्यभिज्ञाभ्यां च शून्यविज्ञानमतिरिक्त आत्मा तेथात् भ्यामेव हेतुभ्यां मनोपि नात्म सुषुप्ते मनसो भावव्यात्मनियम
भिज्ञानात् अहं मन इत्यवगमात्मेमन इति च प्रतिभासात् ज्ञानायोगपद्येन करणत्वेवतस्य कल्पनात् तथा नाभ्यामेव हेतुभ्यां नेंद्रियाणा
मानरूपरसादिज्ञानं पंचके हइत्प्रत्यभिज्ञानात् स्वप्ने चक्षुरादिव्यवहाराभावेप्यहमित्यात्मनि परिपूर्णप्रत्ययान्नमेंद्रियाणीति वाकग
मात् इंद्रियाणामहं सुखेऽव्यतिरेकात् ॥ तथा शरीरमपि नात्मा स्वप्ने शरीरावभासाभावेपि अहमित्यात्मनि परिपूर्णप्रत्ययादहं सुखेव
व्यतिरेकाच्च शरीराकारसंसर्गाभूम्येप्यहमिति दृष्टि प्रत्ययः शरीरादात्मनो भेदप्रत्यक्षप्रत्ययो भवति मम शरीरमिति व्यतिरेक
प्रत्ययात् ॥ नन्वहं कृशोऽहं मनुष्य इति च शरीरेंद्रियेषु अहं सुखेत्वादुपचारो भेदप्रत्ययः अहं सुखेत्वपवादोऽपरः किं न स्यात् कल
हिं निर्णयो ह सुख्येव सोपचारो युक्तः अतिरेके व्यात्मनि अध्यासनिबंधनत्वोपपत्तेः न बाध्यासादिह्यं च शा दिवइदं प्रत्ययो द्वितीये
पि चेद्द्वंद्वाकारवस्त्वप्रेतिपशुरहमिति प्रतिभासे मनुष्यशरीराद्याकारप्रत्ययप्रसंगात् तथा जातमात्रस्य जंतोर्भयहर्षशोकादिद्र
श्यमानो दृष्टनिमित्ताभावे सदादिवस्तुवानुभूतनिमित्तानुस्मृतिं कल्पयति ततश्चास्यैवात्मनो भयादिनिमित्तदर्शनं च तथापूर्व
जन्मसंबंधसिद्धिः प्रत्यभिज्ञायां ॥ तदेवमहं सुखे त्वप्रत्यभिज्ञाभ्यां शरीरेंद्रियमनोबुद्धिशून्यव्यतिरिक्त आत्मा सिद्धः ॥ ननु व्याधि

पं॰ हि वपिकदाचिदभावं स्यात् न तावत्सरतो विनाशः निरवयवस्य हेतूपराभावात् स्वसंसर्गिणश्च स्वकर्मफलसाधनता
३६९ यापान्नस्य फलत्वनुनया आत्मनः स्थितिहेतुत्वाद् विनाशकत्वात् ॥ तापि स्वतइसाहा स्थिरस्यैवाव हि हेतुत्वानु
फलत्वेतिथि ॥ स्वसत्ताप्रयुक्तविनाशहेतुत्वानुपपत्तेः क्षणिकस्यैव तद्भावा इत्यर्थः ॥ कथं पुनस्तस्य फलं
तु भोक्तृत्व इति तद्व्याति पादयन्ति निर्विकारस्य भोगासंभवादित्यादि कथं पुनस्तद्व्यतिरिक्तत्वमिति स्पष्टा
र्थः ॥ तत्र नैयायिका मन्यन्ते पार्थिवाप्यतैजसवायव्यानि भूम्यन्तरिक्षस्वर्गाख्यलोकेषु व्यवस्थायाशरी
राणि नाके नैभूतैरेकं शरीरमारब्धमिति तत्रास्मादादिशरीरं पार्थिवमेव पार्थिवगुणान्तरोपलब्धे
रित्यस्य याह स्मृचात् शारीरं गन्धविशेषोपलब्धेरित्यर्थः नत्वरूपरसस्पर्शा भूतान्तरसमवायं गमयन्ति पा ३६९
र्थिवस्यापि तेषां गुणत्वात् ननु क्लेदनपाचनव्यूहनावकाशानां शरीरे दर्शनात् कृतपञ्चकारणत्वं शरीरस्ये
ति नहि नियमस्यारकादिवद्भूतान्तरसंयोगादपि व्यूहनाद्युपपत्तेः ॥ श्रुतिश्च पृथिवी शरीरमिति पार्थि

वमेव शरीरस्य दर्शयति ॥ वैशेषिकास्तु प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात् संयोगात्मकत्वं न विद्यत इति वाय्वाकाशयो
रप्रत्यक्षत्वात् संयोगात्मकं शरीरमप्रत्यक्षं स्यात् । तस्मात् पार्थिवमेव शरीरमिति कल्पयन्ति ता श्रयाद् भूतसंघात
त्वाच्च शरीरमिति त्रैलोक्ये तत्र जलेयाकस्य हेतोर्व्यूहनस्य च जलाग्निपवनविगमाद्यायेपि वस्त्रादीनामप
तु यादर्शना शरीरस्य जलादिविगमे तत्त्वपचयासंगपेनयवद् यत्र यद्दर्शनान्वयं तत्तारब्धं घटकं सर्वभूता
रब्धं शरीरमिति गायन्ते अत्र मन्त्रि तन्त्रे धाविधीयत इत्यादिस्मृतिस्मृतिवादाश्च भूतपञ्चकं शरीरं कथयन्ति ॥
प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वे सर्वावयविनां प्रत्यक्षाप्रत्यक्षावयववर्तीनाम प्रत्यक्षत्वापातः तस्माद्भूतसंघा
तः शरीरमिति । अथावयव्यारम्भमनपेक्ष्य संघातमात्रस्य भोक्तृत्वाभावं दर्शयितुं विभजते तत्त्वमस्तानामिति
मस्तानां भोगेपि युगपत्क्रमेण वा भोगः न तावद्युगपदित्याह । यदि तावद्व्यस्तानामिति तत्र दूषणमाह न तः
साथमप्रकृत्वादिति माभूदमांगिभावमनन्त्राहनचोगांगिभावमंतरेणेति एकैकस्य भोक्तृत्वे संघा

प॰वि॰ तादन्यत्रापि भोगः स्यादित्याह न स्यात्रयस्तेषु भोग इति। अस्तु नाहि कर्मः नन्वेकमपक्षेपि भोक्तृयगौ न संघातापत्तिरिति
१७० तत्राह अविरोधादुरगोष्ठीवदिति परिहरन्तु दृष्टान्तवैषम्यमादनेन तद्देवमिति दार्ष्टान्तिकं विभजते इदं पुनरिति अय
मभिप्रायः। यदि तावद्रूपरसगंधस्पर्शानामन्यतमोपि वस्तूनां भोक्तृणां विषयः तदा साधारणो विषयैकमभो
गकारणं नास्ति यदि रूपादिषु प्रत्येकं भूतानां भोक्तृत्वविषयम्वैदृश्य तदापि युगपत्सर्वविषयसंनि
कर्षमानुपपत्तिः यथैकस्मिन्नहनि प्रत्येकं भोग्यकन्याविशेषस्तस्मिन् दिने दिने वराणां गुणप्रधानतया संघात
भावस्तद्वत् द्वौ कर्मसु वप्रभिन्नानुपपत्तिरिति अस्तु तर्हि समूहस्यापि भोक्तृत्वं न त्वेकैकस्मिन्भूते अविद्यमानं चेतन्
त्यं कथं संघाते जन्म इति न इत्याह तिलज्वालावदिति तत्र तु ज्वाला किं संहतानां भोक्तृत्वमाहोस्वित् भोक्तृणां सह
तिरिति संघातस्याद्वैस्तृत्वात् भोक्तृत्वानुपपत्तेः वस्तुतस्तु पिभूते स्याद्भेदे एवमतत्वात्पृथगप्रसंगात् अभेदे भूता
न्येव संघात इति तेषामेव भोक्तृत्वात्॥ तत्र संहतानां भोक्तृत्वे संहतिहेतुश्चेत्क स्यः आगामी भोग इति वेतनप्रति भूतानां स
मानत्वात् गुणप्रधानभावेन संघातानुपपत्तेरित्याह नेत इह भोगेषु समूहासंभवादिति॥ ननु भोगान्वयाभ्यां भूता ३

नां कर्तृत्वात् कर्तृणां भोगे गुणभावेन संघातोपपत्तिरिति चोदयति कथमसंभव इति अन्योन्यगुणप्रधानत्वाभावाद्भोगप्रत्यायि भाया
त् भोक्तृणां न संघात इति परिहरति भोक्तृभोगप्रतिप्राधान्यादिति॥ ननु भोगेन्द्रियविधिनार्थेन समूहो हि स्यात् तत्राह
चोदयति ननु भोगेपीति तत्र शरीरमस्तिरिक्तयोरेवात्मनो भोक्तृत्वादर्थेन शरीरयो गुणप्राधानभावेनान्वयेन भोक्तरे
सत्यपि स्वपरिहरति नैतत्सारमिति ननु ज्वालायां तिलानां गुणभावव्याङ्गो संघात इति नेत्याह तैलज्वालायां विप
रीतमिति। अत एव भोक्तृणामेव संहतिपक्षोनुपपन्नः॥ ननु कोयं संघातो नाम न चैव तु न चैकदेशानामात्रेन व्यापिनां
भूतानां सर्वत्र विद्यत इति सर्वत्र चैतन्यभोगयोः प्रसंगात्॥ न चावयवारंभः तस्य भूतेभ्यो भेदे तत्त्वसंख्यातिरेकादभे
दे भूतमात्रतया संघाताभावाद्देशभेदानंगीकरणात् ननु स्वतंत्रभूतचतुष्टयमेवायमवयवादीनापारतंत्र्यात्संख्याति
रेकाभावात् तर्हि न भूतानां भोक्तृत्वं किं त्ववयविन एव। तत्र भूतव्यापारानपेक्षया स्वयमेव भोक्तुरवयविनः पारतंत्र्या
भावात् संख्यातिरेकस्यात् जलादेश्च पृथिव्यादिनं च न्ताद्रूप्यमात्रेन न संख्यास्यात्। न चैकद्रव्यबुध्यालंबनयोग्यता
पत्तिः संघातः अर्थस्वभावेनैकत्वोपसंयोगात् अनेकेष्वेकत्वबुद्धिविभ्रममात्रत्वान्न नैकार्थक्रिया युगपदन्वयः सं

DR. BHAU DAJI

घातः कारणत्रयेण वह्निना वायुसमुद्धूतेन जले दह्यमानेऽपि संघाताद्भोगप्रसंगात् त्वचाग्रस्यः पिंडवत्संश्लेषः संघातश्श
रीरे वायोस्तथात्संश्लेषाभावात् वह्निमान्ते वायः पिंडे समाधापि तज्जले वायुसंयुक्ते च भोगप्रसंगात् तस्मान्नास्ति भोग
निमित्तः संघात इति एवं तर्ह्येकस्यैव भूतस्य भोग इत्याह। अत्रैकस्य तर्हि नियत इति रूपरसगंधस्पर्शेषु भोग्ये
षु कठिनस्य द्रुपाकवलनगुणे वर्तिभूतसंघातेन भोगान्वयिनि परिहृत्यामनि स्यैकस्याभोग इत्यनवधारितो भो
गः स्यादिति दूषणमाह नत्रापीति नन्वयस्यैकस्य वित्भोगः स्यात्रावतैवं शरीरव्यतिरिक्तस्य भोक्तुरभावो विवक्षि
तः सिद्ध इत्याह किमवधारणेनेति परिहरति यद्येवमिति चतुर्णां भोगान्वयदर्शनाद्विशेषनिर्धारणाभावाच्चतुर्षु भो
क्तृषु संघातानुपपन्नेत्युक्ते शरीरात्मकेषु भूतेषु भोक्तृत्वमिति इंद्रियाण्येव भूतात्मकान्यात्मेति लोकायतनभेदास्
ओक्तदूषणजातमतिदिशति एवं करणात्मकेष्वपीयपद्यकैकभूतारब्धान्यैकेंद्रियाणि तत्र प्रत्यभिज्ञाभावाद् १७३
योदोषाः यदि भूतचतुष्टयारब्धमेकेंद्रियं ततः पंचसंघातानुपपत्त्यादयो दोषा इति कार्यकारणसंघातोऽभेकिंस्
न्ये लोकायतनिकाः॥ तत्राह तत्वाभयोत्मक इति प्रत्यभिज्ञासंघातनाद्यनुपपत्तेरिति॥ ननु कानींद्रियाणि नामगो

लकमात्राणीति सुगताः तद्युक्तय इति मीमांसकाः तद्व्यतिरिक्तानि इंद्रियांतराणीत्यन्ये सर्वे। न तावद्गोलकमात्रं स्पर्शादीनां
तद्विरहिणामपि रूपाद्युपलब्धेः शारीरजैः कर्मदोषैर्यति स्थावरतां नरः। न स्मासरूपतिपादपाद्इसादिशास्त्राद्वृक्षा
दीनां गोलकविरहिणां कर्मफलभोगस्थानतावमेनश(?)राद्युपलब्धसंभवागमात्। वृक्षादिहिंसाप्रतिषिद्धत्वं
त्वात्माणित्वावगमाच्च अत एव न तद्युक्तयः शक्तिमत्पदार्थांतरकल्पनात्कधीयः प्रतिपत्रस्थानेषु शक्तिकल्पनमि
ति चेत्। तद्ध्यात्मन एव सर्वविज्ञानसामर्थ्यं क्रमकारिकल्पतो लाघवात् सर्वगतस्याप्यात्मनः शरीरप्रदेशे ज्ञानपरि
णामवद्गोलकप्रदेशेषु ज्ञानपरिणामात् गोलकानां ज्ञाने नान्वयव्यतिरेकोपपत्तेरनिंद्रियत्वेऽपि शरीरवत् संतु नाइं
द्रियाणि गोलकव्यतिरिक्तानि शक्तिमन्ति द्रव्याणि स्थानविशेषसंबंधाच्चक्षुरादिशब्दवाच्यानि नतेषु प्रमाणाभावात् रूपाद्युपलब्धि
रूपत्वकर्त्व्यापारः करणानुमाने लिंगमिति चेत्॥ नास्व्यापारकर्तृषु करणेषु करणांतराभावाद्नैकांतिकत्वात्करणविष
येन तत्प्रेरणालक्षणे कर्त्रमारे करणांतराभावात्। मर्दपाणा अनन्याभंतीसागमगम्यानींद्रियाणीति चेत्। न आगम
समस्कारविरहिणामपींद्रियप्रतिपत्तेः न च मनोवान्त्याश्रितं विद्याऽऽनींद्रियाणि कार्यभावाभावव्यतिरेकेणेंद्रियाणां

पं. वि. १७२

भावाभावानवगमात् न स्मान्नसंतींद्रियाणीत्युच्यते । आगमावगमात् प्राक् स्वज्ञानविशेषेषु चक्षुरादिषु इंद्रियव्यवहा
रः प्रवर्तते मंडलादि घ्राणादिस्वव्यवहारवत् आगमावगतो स्वज्ञानविशेषाधिष्ठातृणि चक्षुरादीनींद्रियाणि आदित्या
दि देवतात्मवदित्यवगम्यते तानि पुनर्मीत्तिरिक्तामपार्हकारिकाणीति सांख्याः । तदयुक्तं प्रमाणाभावात् । नत
वदध्यात्ममहंकारजन्यानींद्रियाणीत्यन्वयव्यतिरेकावागमो वा हस्तूपतेन वक्तृत्वकार्यव्यापीभूतेंद्रियाणां प्र
कृतिः कश्चिदहंकारो न्यो विद्यते मानाभावात् ॥ आगमवचनं मानमिति चेत् न अप्रतींद्रियत्वात् । ननु पुराणवाक्या
न्येव सति सत्यं अन्नमयंहि सोम्य मन इत्यादि भूतविकारार्थमयट्श्रुतिविरोधादहंकाराधीनत्वमात्रमिंद्रि
याणां तत्र कथ्यत इति न विरोधः भौतिकानींद्रियाणीति वैशेषिकादयस्तदप्ययुक्तं मानाभावात् भौतिकानी
इंद्रियाणि मध्यमपरिमाणत्वेन सावयवत्वात् घटादिवदिति चेत् ॥ न हेतोरसिद्धत्वात् अणुपरिमाणत्वोपपत्ते १७२
रिंद्रियाणां तत्राणुपरिमाणएव विषयावभासः स्यात् । न स्वरूपपरिमाणेन मनसा विरुद्धत्वतात्मादिवत्स्वदर्शनात् ॥
ननु भौतिकानींद्रियाणि रूपरसगंधस्पर्शानां नियमेनाभिव्यंजकत्वात् प्रदीपास्योदकहिंग्वादिद्रव्यमज

नवायुवदित्यनुमानांतरेण प्रत्येकं भूतारब्धानि प्रत्येकेंद्रियाण्यनुमीयंत इति । न शब्दाभिव्यंजके श्रोत्रे शब्दगुणवदा
काशानारब्धे नैकांतिकत्वात् ॥ कर्णशष्कुल्यवच्छिन्नाकाशमात्रस्य श्रोत्रत्वाभ्युपगमात् अनारभ्यत्वात् मनसश्च भ
वत्वनुष्ट्यारभ्यत्वप्रसंगात्तदभिव्यंजकत्वादात्माकाशादीनां साधारणात्वान्मनसोनुभूतारभ्यत्वमिति चेत् । संख्या
परिमाणसंयोगविभागजातिविशेषसमवायादीनामपि साधारणत्वादिंद्रियाणां न भूतारभ्यत्वसिद्धिः । असाधा
रणविषयारभ्याणींद्रियाणीति चेत् तर्ह्यात्मारभ्यं मनः स्यात् असाधारणविषयत्वात् एकद्रव्यारभ्यं न द्रव्यमिति चेत्
न सावयवमवनेकद्रव्यारब्धमिति सेतावेभिरवयवत्वं तु मनो निरवयवत्वात् आरभ्यं किं न स्यात्तस्मादागमादेव भौतिकत्वसि
द्धिः तानि सर्वगतानीति योगाः प्रतिपेदिरे तदपि मानहीनं आत्मेंद्रियमनांसि सर्वगतानि सर्वत्रदृष्टकार्यत्वादा
काशवदिति चेत् । न हेतोरसिद्धत्वात् यत्र शरीरं तत्र सर्वत्र दृष्टकार्यत्वादिति चेत् शरीरेनैकांतिकः परोयाधिगम
नत्वादाकाशादिवदिति चेत् । न शरीरावयवानामपि परोपाधिगमनात् सर्वगतत्वेन युगपत्सर्वविषयोपलब्धिश्च
स्यात् । शरीरएव वृत्तिलाभान्नेति चेत् । न हि वाहेरिंद्रियसद्भावकल्पनानप्रमाणप्रयोजनवतीतास्मपा

पं.वि अप्राप्यकारिणीति सुगताः तदयुक्तं दूरत एव स्पर्शरसगंधोपलब्धिप्रसंगात् योग्यदेशावस्थानमपेक्ष्यत इति चेत् न इं-
३७३ द्रियदेशप्राप्तिव्यतिरेकेण योग्यदेशानिरूपणात् स्पर्शरसनघ्राणेंद्रियवच्चक्षुःश्रोत्रयोरपि प्राप्यकारित्वमनुमी-
यते तैजसत्वात् दूरस्थगिरिग्रहणदर्शनाच्चक्षुषोऽप्राप्यकारित्वमिति चेत् विरुद्धा शब्दस्य च दूरदेशोपलब्धेर्वीचीसंतानवत्संप-
र्कया श्रोत्रसमवायः॥ तस्माद्भौतिकानि परिच्छिन्नानि प्राप्यकारीणींद्रियाणीति सिद्धं किं तर्हि मनो नाम नित्यं निरवयवमणु-
परिमाणमिति वैशेषिकादयः सांगिरं तेन तावन्नित्यं परिच्छिन्नत्वान्निरवयवत्वं तस्य तावदात्मवन्नित्यमिति चेत् न करणत्वादिं-
द्रियवत्सावयवत्वानुमानात् अस्मदादिप्रत्यक्षत्वे मूर्तद्रव्यानभिघातान्निरवयवत्वमिति चेत् न मनसो बहिर्निर्गमना-
भावात् तत्कार्योत्पत्तिरिंद्रियाणामपि समानां संयोगविभागवत्त्वात् घटादिवदणुपरिमाणता सर्वगतत्वे चक्षुरादिवत्सर्वेंद्रिय-
संयोगात् सर्वज्ञानप्रसंगः मध्यमपरिमाणत्वे सावयवत्वेनावयवोपचयापचयसंभवात् स्थूलसूक्ष्मदेहवत्त्वविरोधः स-
मनन्तरप्रत्ययबोधत्वज्ञानकारणं तथा मन इति शाक्याः प्रतिपेदिरे॥ तन्न॥ ज्ञानस्य ज्ञानांतरे हेतुत्वे सर्वनिसापेक्षत्वा- ३७३
च्छाब्दज्ञानमपि प्राप्तिसापेक्षमिति तन्मतं विशिष्टज्ञानमपि संप्रयोगजन्यं न विशेषणज्ञानाजन्यं समनन्तरप्रत्यया-

दुत्तरस्य ज्ञानाकारलाभ इति चेत् न वस्तुस्वभावस्यानन्याधीनत्वात् तस्मात्सावयवमन्यदेव मन इति। अथात्मा। सर्वगतोऽणुरिति भे-
दिनस्तावत्सर्वत्र दृष्टकार्यत्वं सर्वगतत्वे हेतुरित्युक्तं॥ अव्यवहितदेशेऽदृष्टनिमित्तत्वमग्न्यादिक्रियायां भावतस्य वा दृष्टवदात्मसंयोगापेक्षतास्सर्वगत
इति चेन्न समवेतादृष्टस्वर्गभोगादिरूप्यादृष्टवत्प्रदेशसंयोगात् केवलात्मप्रदेशसंयोगस्य फलहेतुत्वात्तस्मादागमादेव सर्वगतत्वसिद्धिर्नवजातीयस्वप्र-
काशतावगमात्॥ प्रत्यक्षत्वात्तु तत्त्वभासः अनुमानमपि स्वयंप्रकाशो यथात्मा स्वसंवेद्यः प्रकाशव्यतिरेकाभावात् प्रदीपसंवेदनवदात्मा स्वयंप्रका-
शो विषयप्रकाशकत्वात् प्रदीपवत् यः स्वयंप्रकाशो विषयप्रकाशश्च तद्वदालोकवज्ज्ञानप्रकाशगुणश्चात्मा प्रकाशगुणत्वादादित्यादिवत्। आ-
त्मा स्वयंप्रकाशो निंद्रियगोचरत्वे सत्यपरोक्षत्वात्संवेदनवत् आगमश्चात्र दर्शितः स एकः सर्वशरीरेषु सर्वत्राहमित्येकाकारप्रत्ययसंवेदनीयत्वात् गोत्ववत् शरी-
रभेदे वातीतशरीरादाविव न भोगानुसंधानप्रसंगः॥ नचैकस्मिन्नपि परिमाणभेदात् प्रतिक्षणं शरीरभेदोपपत्तेः प्रत्यभिज्ञाविरोधादननुसंधानप्रसं-
गात् ज्वालायां सूक्ष्मदर्शनेऽप्यसन्तमभेददर्शनात् तस्मादेकः स्वयंप्रकाश आत्मेति सिद्धं॥ ॥तस्मादेकपक्षं हरः पक्षांतरमाह भोक्तैव केवलमिति कर्तृत्वादिक्रि-
यावेशः न च सर्वगतस्य निरवयवस्यात्मनः परिस्पंदपरिणामलक्षणः क्रियावेशः संभवति न च बुद्धेः कर्तृत्वमात्मनो भवति तादात्म्याध्यासाभावात् स्वानिशादितावद्धेतं नरमा-
टकतो सिज्ञानापितुंजेयेति अयमर्थः चेतनस्य क्रियावेशो वा आत्मनः स्वभावधर्मस्येदात्मप्रतिभासवच्चप्रतिभेदं अनाशानुको निरवद्य असपहेतूपयोगेन क्ष्मिदर्मोऽस्य

प॰वि॰ दाय्यत्वं शाक्यतद्विनत्वात्मप्रतिभासव्यभिचारात् कर्तृत्वमङ्गीकृतमपि न स्यादित्येवोदयति ननु भोक्तापीति परिहरति नैतदेवमि
१७४ ति दृश्यावभासमात्रत्वं भोक्तृत्वं न सकलदुःखाद्यनुभवः ततश्चावश्यान्यये पि दृश्यावभासव्यभिचाराभावात् भो
क्तैव केवलमिति॥ पक्षान्तरमाह अस्तित्व्यतिरिक्त इति भाष्यं न ह्यावष्टे तस्मादपि देहादिव्यतिरिक्ताद
सिद्धः ईश्वर इत्यन्तरेण संबन्धः अत्रेश्वरविशेषकानुमानं दर्शयति शरीरिणां मनसापीत्यादि वि
वादगोचरापन्नं भूतभौतिकलक्षणानुवर्तावे स्वनकार्यं स्वरूपोपादानसंप्रदानप्रयोजनोपका
रणादिविषयविज्ञानवत्कर्तृपूर्वकं विविधविन्यासरूपकार्यत्वात् प्रासादादिवदिति कल्पनास्वाधवात्
कर्तैककर्तोपादानात् सर्वज्ञत्वादिसिद्धिरिति सांख्यानुमानं दर्शयति सातिशयानां काष्ठाप्राप्तिरिति विवादगोचरापन्नं ज्ञानैश्वर्य
रूपः कश्चित्सर्वविषयज्ञानैश्वर्यशान्त्यविनाभूताः तरतमभावेनोच्यमानत्वे सत्यपि धर्मत्वात् सविषयदेशाभिप्रायमाण १७४
सर्ववदिति। काष्ठाप्राप्तिः सर्वविषयत्वेपि संभवतीति सर्वविषयमितिविशेषणं अनुमानेन तथैव द्रुतितनात सदासिद्ध ईश्वर इति नेय्या। २१

पिकाद्यनुमानं दर्शयति विवादगोचरापन्नानि धर्माधर्मफलानि कर्मतत्फलसंप्रदानोपाकरणादिविज्ञानवता
प्रदीयमानानि मवहितकर्मफलत्वात् सेवादिफलवदिति तस्मात् सिद्ध ईश्वरः ननु प्रसङ्गात्मनो विप्र
तिपन्नत्वं न स्यसंबन्धितयास्कन्धभेददर्शनं विप्रतिपत्तिः न च तद्व्यतिरिक्त ईश्वरः प्रसङ्गात्मनो विशेष
स्कन्धश्चतो मोनशरीरादिवस्कन्धविशेषतया प्रतिपादनीय इति वादेयतितन्नहमिति सर्वो लोक इत्यादिना॥
उच्यत इत्यादि परिहारस्यायमर्थः॥ न हि विप्रतिपन्नालम्बनं तत्र प्रसङ्गात्मव्यतिरिक्तमव्यतिरिक्तं वेति विप्रतिप
त्तिर्दर्शयितुं व्यतिरिक्तेश्वरपक्षोपि दर्शनीयः॥ किमिति तर्ह्यात्मनि विप्रतिपत्तिः प्रदर्श्यत इति तदाह प्रसङ्ग वि
प्रतिपन्नापीति किमिदमुक्तं भवति प्रसङ्गात्मा तावत्प्रमाणान्तरेणेन्द्रियशरीरेन्द्रियमनोबुद्धिप्रसूतकर्तृभोक्तृत्वादि
विशेषणपर्युदासेनाद्वितीयेन ज्ञानानन्दस्वभावेनाप्रतिपाद्यते एवं प्रतिपादने संसारनिवृत्तेः पुरुषार्थलाभः न प्रसङ्गात्म
सर्वज्ञत्वादिगुणकाद्दुःखलेशोत्सोऽन्योन्येति प्रतिपत्तिर्दर्शयितुं न व्यतिरिक्त ईश्वरः साधितो विप्रतिपत्तिः स्कन्धात्॥ ॥अत्रक्षि

पं.वि. द्वाइनेहस्यापगास्यासाधारणस्वभावविवक्षया ब्रह्मशब्देन जिज्ञास्यत्वेनोद्दिश्यते किंत्वीश्वरएव ब्रह्मशब्देनोद्दिश्य
१७५ विचार्यते जन्मादिसूत्रे जगत्कारणत्वलक्षणाभिधानात् नहि प्रसंगास्यैतत् लक्षणमुपपद्यते तस्मादात
विप्रतिपत्तिप्रदर्शनमसमंजसमिति उच्यते यदि ब्रह्मशब्देनेश्वरोभिधीयते किमिति॥ नहि जगत्कारणे विप्रतिप
त्तिं दर्शयति प्रधानमेके परमाणूनपरे इत्यादिना॥ नहीश्वरेर्थांतरे जिज्ञासाकर्मणि ब्रह्मशब्दोपादानेर्थांतरो जगत्का
रणे विप्रतिपत्तिर्युक्ता दर्शयितुं जगत्कारणादीश्वरस्याभिन्नत्वात् तद्विप्रतिपत्तिरीश्वरे विप्रतिपत्तिरिति चेत्तर्हीश्वरः प्र
धानं परमाणुर्वेति विप्रतिदर्शितास्यात् अन्यथा संशयेन जनाः युज्यते तु प्रसंगात्मनो ब्रह्मशब्दाभिधेयविशेषस्य
मस्पशरीरेंद्रियादिषु संशयः तेषामात्मनितादात्म्याभासात् विवं प्रसंगात्मानस्तु द्विरूपतस्य विशेषरूपे ब्रह्मणि जिज्ञा
स्यमाने यज्जगज्जन्मादिकारणं तद्ब्रह्मेत्युक्ते विभूतशरीरादिभेदः प्रसंगात्मा जगत्कारणतया सर्वात्मभूतः
प्रतिपादितो भवति॥ जगत्कारणेत्र विप्रतिपद्यमाने किं तत् जगत्कारणमिति वीक्षायां यद्ब्रह्मतज्जग

त्कारणमिति ब्रह्मोद्देशेन जगत्कारणत्वं विधेयं स्यात् जगत्कारणमुद्दिश्य ब्रह्मविधानमिति वैपरीत्यमापद्यते ब्रह्मशब्देन
जगत्कारणमभिधीयत इति चेन्नेश्वरोभिधीयत इति स्ववचनेन विरोधात् किं चेश्वरे जगत्कारणे प्रतिप
दिते पुरुषस्य किमायातं सुपासनमिति चेत् आरोपितरूपेणापि संभवात् प्रतिपादनवैयर्थ्यात् तस्मात् प्रसंगा
त्मानस्तु द्विरूपतस्य वेदांतविहितब्रह्मशब्दाभिधेयबुभुत्सायां यज्जन्मादिकारणं सत्यज्ञानानंदादिलक्षणं
तत्प्रसंगात्मभूतं ब्रह्मेति प्रतिपादयितुमात्मनि विप्रतिपत्तिप्रदर्शनं युक्तमिति जगत्कारणे विप्रतिपत्तिः संप्रदा
यपरिचयशून्यतया शास्त्रार्थग्रहणासर्वसंकरवादिनां द्रष्टव्येति॥ ॥पक्षांतरमाहात्मा स भोक्तुरित्यपर इति यथाव
सत्यज्ञानानंदं निरवयवं ब्रह्म प्रसंगात्मापि तथा तत्र विवादगोचरापन्नो जीवो ब्रह्मैव सन्नुपाधिपरिच्छिन्न विभागः ब्रह्मणा
समानस्वभावतया निरवयव इष्यते सत्सूपाधिपरामर्शाधीनसपरिच्छेदप्रतिभासतात्पर्येण समानस्वभावतया निरवयव इ
ष्यते सत्सूपाधिपरामर्शाधीनपरिच्छिन्नप्रतिभासं न तु तदात्मकत्वं सत्सूपाधिपरिच्छिन्नभेदं दृष्टं यथा घटाकाशमिति॥ भा

पं.वि. ष्यमाचष्टे योयमिति॥ ननु संसारिणः कथमसंसारित्वमित्यत आह तुल्याहंप्रत्ययसिद्धाविति॥ नन्वहमिति
१७६ सामान्यतः प्रतिपन्नस्य शरीरादिविशेषमिथ्यात्वे परमार्थभूतो विशेषो वक्तव्यो ऽहमित्थंभूत इति तत्राह परमार्थस्थिति
॥ अहं ब्रह्मैवेति विशेषाय संदेहो न शरीरादिसत्राकिंप्रमाणमित्यत आहैवमसौ बृहत्सर्थान्वयादिति॥ ननु जीवब्रह्मा
भेदे ऽपि बृहत्पदार्थलाभो देशकालव्यापित्वादित्यत आहेतरथा तद्रूपविकल्पस्येति उपसंहरति एवं बृहत्त्वादिति
किंचित्शरीरादि ब्रह्मेति प्रसंगात्मेति प्रतिपात्रादित्यर्थः॥ ननु चेन विप्रतिपत्तिमात्राज्जिज्ञास्यं भवति किंतु प्रमाणयु
क्तिमूला हि विप्रतिपत्तिर्निराकर्तव्येति तत्रान्तरं युक्तिवाक्यसाभास्यत्वाद्यवष्टंभ्य युक्तिप्रमाणाभासमित्यादिना॥ दर्शि
न्यक्षेयुक्तिवाक्यं कुवाक्यं वा नवाभास इति॥ विभजनेयुक्तिवाक्याभ्यामसंपक्षं निश्चितं वचनमिति॥ ॥ ननु पथा
बृहत्सर्थान्वयाद्युक्तिवाक्याभ्यां च ब्रह्मैव भोक्ता तथा सुखदुःखतत्साधनस्य प्रपंचो ऽपि ब्रह्मैवेत्यपुरुषार्थतयानु १७६
जिज्ञास्यं ब्रह्म स्यादिति कृतिपयस्य सुखदुःखतत्साधनतत्संसर्गमपि अश्नतो मानोनिखिलदुःखादिमत्तां

गीकुर्यात्॥ ननु वक्ष्यमाणेन ज्ञानानंदादिलक्षणेन पुरुषार्थतया जिज्ञास्यमेव किं न स्यात् क्र इति चेत्तिसाधनतया पुरुषार्थो
ऽपि विषमिश्रितेऽन्ने न थेहेतुनया प्रेक्षापूर्वकारिणामुपेक्षादर्शनात्॥ नाविलिप्यते लोकदुःखेन वाह्य इत्यादि शास्त्रात् नापुरुषार्थता
विवेश्चात्मैवेदमित्यादि सर्वतादात्म्यश्रुतेः॥ उपादानकारणत्वाच्च॥ सर्वज्ञतया ज्ञानमिथ्याज्ञानाभावाच्चानर्थसंबंध इति चेन्न
तत्त्वन प्रपंचतादात्म्यात् अज्ञानाद्यपेक्षणात्॥ कर्मनिमित्तः सुखदुःखादिसंबंधः तदभावाद्ब्रह्मण्यनर्थसंबंध इति चेत्
कर्मव्यतिरेकेणापि स्वभावादेवाखिलसुखदुःखादितत्साधनानां ब्रह्मान्वयितया ब्रह्मणो परोक्षत्वात् कर्मादीनामपि ताव
न्मात्रहेतुत्वात् न हि दुःखाद्यापरोक्ष्यव्यतिरेकेण संसारो ऽन्यो दृष्टः प्रतिकर्मादियादीनामपि बृहत्सर्थान्वयादेव ब्रह्मणि तादा
त्म्यात्तन्निमित्तो ऽपि संसारः स्यात् न रामस्य पपञ्च इति॥ ब्रह्मणि तत्त्वज्ञानेन वाधितत्वात् नानर्थसंबंध इति चेन्न प्रपंचा
भिभावस्यापि तात्त्विकत्वात् न च कारणाकारणब्रह्मभेदेन कार्यकारणब्रह्मभेदेन वा संसारविमुक्तिव्यवस्था
बृहत्सर्थान्वयाभावप्रसंगात् तस्माद्बृहत्सर्थान्वयेनाद्वितीयसर्वज्ञत्वजीवताद्युपगमे ऽनीजीवस्याजिज्ञा

पं.वि स्येब्रह्मप्राप्ते॥उच्यते सत्यपि सर्वस्यापरोक्षतया ब्रह्मसंबंधे मायानिमित्ततयाप्रतिबिंबरूपामत्वा॥दिव मायाविगततयाप्रत्वादि
३७७ वच्छतत्त्वज्ञानेन बाधितत्वाद्विंवच्छानीयब्रह्मणो नित्यसर्वज्ञतया तत्र तत्त्वज्ञाननियमात्रतन्नानात्मानुबंध इति॥विशुद्धिवा
क्यानामेव बलवत्तरत्वं वक्ष्यामः॥कल्पितवाक्याभासमूलता कस्येति तदाह इतरे तु यक्तेय इत्यादिना॥कथं पुनर्वाक्याभासता
शरीराद्यात्मभावस्यात।तदाह यक्त्यासत्वमिति॥ननु नैतावता यक्त्याभासत्वसिद्धिः देहादिष्विति तत्राह इतरेषां वयक्त्या
भासत्वसिद्धत्वमिति॥किंच दर्शिता एव यक्त्याभासाः ननत्रान्यैपेक्षेत्याह दर्शितवत्लेशानइति॥ननु स एव पुरुषोन्नरसम
यः सवा अयमात्मा ब्रह्म पृथिवीमय आपोमय तेजोमयो वायुमय इत्यादीनि शारीरात्मत्ववाक्यानि। तेदुवा
वमूचुः॥ तेभ्योवागुदगायदित्यादीनीन्द्रियात्मवादे। मनउद्गायदिति। मनोवादे कतम आत्मेति
योयं विज्ञानमयः इत्यादि विज्ञानवादे। असदा इदमग्र आसीत् असदेवेदमिति शून्यवादे। अन्नमतां ३७७
वोद्धाकर्ताविज्ञानात्मेति कर्त्रात्मवादे। तयोरन्यः पिप्पलं स्वाद्वत्तीति बुद्धिविषयतादन्नमश्नन्त्यइति भोक्त्रात्मवादोय आ–

त्मनितिष्ठन्नात्मानमंतरो यमयतीति रिक्तेश्वरवादे वाक्यानि विद्यंते कथं निर्मूलता पक्षांतराणा
मिति तत्राह वाक्याभासनांतविति तन्न्वेकमपि यस्यय स्मिन्नभिरूढिरूस घृते सत्तं परमास्तिस्य पुरुषार्थसाध
नम् किंविचारेणेति॥तत्राह तत्राविचार्य यत्किंचिदिति भाष्यं व्याचष्टे तत्रैवं स्थितइत्यादिना॥ननु मूढस्या
पक्षादर्वाचीनेषु पक्षेषु तत्त्वज्ञानाभावान्निःश्रेयसलाभो नर्थः॥किमिति प्राप्यत इति तत्राह अंधं तमः प्रविशंतीति
नन्वात्महननत्वहेतुरुक्तो न तत्वाप्रतिपत्तिरिति तत्राह आत्मानं दर्शनेनात्मनो सत्त्वकल्पनापादनमिति सूत्रवाक्या
र्थमुपसंहरति तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेनेति भाष्यं व्याचष्टे।ब्रह्मजिज्ञासोपन्यासव्याजेनेति जिज्ञासापदेनां
तर्भावितविचारमुलपक्ष्यतत्कर्मतापरं सूत्रमित्युक्तं भवति योजनांतरमाह अथवेति जिज्ञासाकर्तव्येत्युक्ते ज्ञा
मिष्यमाणसाध्यतयाकर्तव्यमिति सूत्रार्थः संपद्यते तत्र ज्ञानेकर्तव्यपर्याप्त साधनकर्तव्यतापर्यवसीयते तोर्थसिद्ध

पं॰ वि॰ विचारकर्तव्यतायाम्‌ तस्मात्‌ अमितिकिंप्रयोजनेत्यादिस्पष्टार्थः ॥ कथं पुनर्विचारस्य निःश्रेयसंप्रयोजनं
१७९ विचारजन्यब्रह्मावबोधसाध्यत्वादिति चेत्किं न त्रिःश्रेयसं कर्तृत्वभोक्तृत्वदोषसंयोगाध्यासप्र
वाहोपादानस्याज्ञानस्य निवृत्तिः ॥ निवृत्तेऽपि ज्ञाने द्वैतदर्शनसामान्याया भूमि हि पृथिव्यादिप्रप
चः कोतत्वाध्यासनिवृत्तिमात्रं निवर्तते ॥ उच्यते सत्स्वपि पृथिव्यादिषु ततः कारणाध्यासनि
वृत्तौ प्रमातृत्वाभावदात्म चैन्यस्य स्वतो विषयापरागाभावाहितद्वैतदर्शन स्विवरूपादिदर्शनमिलेकः पक्षः
तस्तु स्वर्वद्वैतनिवृत्तिपक्षः समन्वयसूत्रे वक्ष्यते तस्मात्‌ चिरसल सकलकर्तृत्वाद्यध्यासमयाद्वै
द्वैतदर्शनमनतिशयानंदस्वरूपकानुमान ब्रह्मस्वरूपावस्थानं निःश्रेयसं चेदतो विचारस्य प्रयोजनमिति समर्पितं ३०८
श्रीमत्परमहंसपरिव्राजकाचार्यानन्दानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पंचपादिकाविवरणे प्रथमं ॥

नं॰ श्रा शोलि नि स्थिद्वि प॰
मे सूत्रं समाप्तं चतुर्थवर्ण

जगज्जन्मस्थितिध्वंसा यतः सिध्यन्ति कारणात्‌ ॥ तत्स्वरूपं तटस्थाभ्यां लक्षणाभ्यां प्रदर्श्यते ॥ ॥
जन्माद्यस्य यतः वृत्तसंकीर्तनभाष्यस्यांतर्गतेति विचारार्थोपादानेनार्थं कथयति ॥ ब्रह्मजिज्ञासिंव्यमि त
त्युक्तमित्यादिनाननु ब्रह्मविचारप्रतिज्ञायां साधनादिविचाराणामप्रतिज्ञातत्वात्‌ असाध्यते
मत आह यदेवेदमुक्तमित्यादिना ॥ ननु पंचानां विचाराणां प्रतिज्ञातत्वे किमिति स्वरूपमेव प्राथ
मं विचार्यते ॥ फलभूततया प्राधान्यादिति चेत्‌ तत्‌ न साधनाधीनत्वात्‌ ॥ साध्यसिद्धेस्तेषामे
व प्रथमं विचारः क्रियतामित्यत आह तत्र स्वरूपस्याभ्यर्हितत्वादिति ॥ ब्रह्मप्रमाणं ब्रह्मयुक्ति
ब्रह्मसाधनं ब्रह्मफलमिति विशिष्टविचाराणां ब्रह्मविशेषसापेक्षत्वात्‌ ॥ ब्रह्मस्वरूपनिर्णय
स्य चान्यापेक्षत्वात्‌ प्राधान्येन साध्यत्वाच्चेत्यर्थः ॥ वृत्तसंकीर्तनोत्तरोणाकांक्षापुरःसरं
सबंधमाह किंलक्षणं तदिति ॥ जिज्ञास्यपुरुषार्थब्रह्मस्वरूपप्रदर्शननिमित्तमाचार्यपूज्य

पं.वि.
१०८

ति॥ भगवानिति॥ नन्वस्येदं लक्षणमिदमेवानेन लक्ष्यमिति लक्ष्यलक्षणयोरव्याप्त्यतिव्या
प्तिपरिहारेणाविनाभावः प्रमाणयुक्तिव्यतिरेकेण न सिध्यति तत्कथं स्वरूपलक्षणपरमेवसू
त्रमिति तत्राह युक्तिरपि लक्षणनिर्णायकेत्यादिना॥ अपिशब्दात्प्रमाणान्तरमपीत्यर्थः॥ अत्र
च सूत्रितयोर्ब्रह्मणि प्रमाणयुक्त्योरध्यायद्वयेन निर्णयः क्रियते॥ जन्मोपनिरिसारभ्यन्त
नीयलिंगेष्वतः प्रकृतः स्पष्टार्थः तद्गुणसंविज्ञानइति विशेष्यैकदेशमेव विशेषणं कृत्वा स
मासइत्यर्थः॥ न त्वेवमपि जन्मस्थितिभंगास्त्रयो विशेष्यास्तत्कथमेकवचननिर्देश इत्यत आह
त्ततीयमिति लिंगैर्नेति॥ जन्मादिनामादिमध्यावसानमाक्षिपति॥ नन्वादिरिति परिहरति
जन्मनश्चादित्वमिति भाष्यं व्याचष्टे॥ यदनेन सूत्रेणेति॥ तेनेसर्वजनित्वे वनस्यतिन
कविलकालं तिष्ठतिस्वत्यत्राप्रयुक्तत्वाद्विनाशस्येत्यत आह क्षणिकनित्येराकरणादि १०८

ति अतो जनित्वेसादिस्पष्टार्थः॥ नन्विदंशब्दः किंचिदेवसन्निहितं गमयति नाखिलं जगदित्यत आह त
थाहि सर्वत्रेति॥ ननु जन्मादीनां जगतश्च कः संबंधः षष्ठ्या विवक्षित इति तदाह सर्वरवेति॥ ननु जन्म
जन्मस्थितिभंगं किसंबंधितया लक्षणं भवति न तावत्काकवल्लक्ष्यसंबंधितया जगदाश्रयत्वा
द्रमाणामिति॥ कारणसंबंधितयेत्याह॥ यत इति कारणनिर्देश इति ननु जन्मादिकाण
वत्वमपि लक्षणान्तर्गततमाहोस्विल्लक्ष्यस्वस्वरूपान्तर्गतमिति विकल्प्यं ननु गृहस्य काका
धिकरणत्वं नाम धर्मः कस्मिंश्चिन्नर्वतिलक्ष्म इति चेत्काकाधिकरणत्वं वगृहशब्दार्थः स्या
ततश्च काकाधिगमे गृहैकदेशभंगबुद्धिः स्याल्लक्षणान्तर्गमिति चेत्कात्वमपि तथोन हिना
नाविधकार्यक्रियावेशात्मकत्वं तत्सं सवस्तत्त्यात्मकलं वाजितास्य विशुद्धं ब्रह्मान्तर्गत
भवितुमर्हति॥ तस्यात्तज्जगज्जन्मादिकार्णत्वमेवोपलक्षणमिति॥ ननु निमित्त

पं·वि·
१८०

कारणत्वमुपादानकारणत्वयोरुभयोरुपलक्षणत्वेनोक्तं तेन तावन्निमित्तकारणत्वमेव ब्रह्मणोपलक्ष
णं जगदभिन्नस्योपादानकारणस्य भेदेनावस्थानाद्ब्रह्मशब्दस्य स्वार्थान्वयाभावप्रसंगान्नाप्यु
पादानकारणत्वमुपलक्षणं निमित्तकारणस्य सर्वज्ञस्य भेदेनावस्थानान्न यतः सर्वज्ञात्सर्वश
रीतिव्यपदेशो न स्यादुपादानकारणस्य लोके चेतनत्वासत्त्वेनानुमननं तमिति च स्वरूपलक्षणस्योभ
यत्रायोगान्नाप्युभयकारणत्वं ब्रह्मोपलक्षणमेकस्योभयकारणत्वे प्रमाणाभावात्प्रमाणांतरस्यासि
द्धिर्हि लक्षणमनधिगतलक्ष्यस्वरूपाधिगमायानेन तावदेकस्य जगन्निमित्तोपादानत्वमनुमानेना
वगंतुं शक्यं दृष्टांते भेददर्शनान्महाभूतपंचकव्यतिरिक्तेषु पदार्थेषु नानाविधनिमित्तोपादानद
र्शनान्न तद्वादेन ब्रह्मविधातुं शक्यं भूतपंचकनिमित्तोपादानत्वमेकस्याप्रसिद्धमिति न चाहु
प्रकृतित्वनिबंधना पंचमीति निमित्तस्याप्युपलक्षणमेतदुभयत्र पंचमीविधानाद्भूतपंचक

स्य नाचेदेका प्रकृतिरनुमीयते सद्वस्त्वेकस्वभावानुगमात्तथाहि महाभूतानिं सद्वस्तुप्रकृतिकानि तत्स्व
भावानुरक्तत्वे सति विविधविकारत्वान्मृदनुस्यूतघटादिवत् द्रव्यत्वाद्युपेतेरप्रिप्रकृतिस्वभावाप
चसामान्यवदवभासंते सद्वस्तु पुनः सर्वानुगमात्सर्वविकारप्रकृतिर्भौतिकानां च भूतोपादानत्वं
दृश्यमानं मूलप्रकृत्यधीनतामेवास्य सर्वगमयत्यतः सर्वकार्योपादानमेकमिति बलाद्यवादि तिमापा
द्यानुगृहीतानुमानेन सिद्धं तस्यैव च निमित्तकारणत्वमनुमानेनान्यपकनेन तथा चेदं जगदभिन्ननिमि
त्तोपादानकं भवितुमर्हति ॥ प्रेक्षापूर्वकजनितकार्यत्वात् आत्मगतसुखदुःखरागद्वेषादिवत् ॥ न च घ
टादिष्वनैकांतिकता ॥ तत्राप्यभिन्ननिमित्तोपादानत्वकल्पनाददृष्टादिनिमित्तभेदादृश्यन दू
ति चैत्रोपादानाधिष्ठात्रोरैक्ये केवलानुमानात्तस्माददनुमानेनैव प्रसिद्धमेकस्योभयकारणत्वं
लक्षणत्वेन निर्दिश्यते ॥ सृष्टिवाक्यप्रसिद्धं चैकस्योभयकारणत्वं लक्षणत्वेन निर्दिश्य

पं·वि· तेऽत्र केचित्परिणामवादमवतारयंते निस्तत्त्वप्रमाणं वक्तव्यं सृष्टिश्रुतयः इति चेत्र तत्र परिणामशास्त्र-
१८३ श्रवणात्सत्यतोऽन्यथाभावः परिणामो ब्रह्मणोऽपि सत्यस्ततः प्रपंचोऽपि तत्प्रतिपादयंतीति चेन्नोऽसुस-
मुदाश्रवणास्तु ततः आरामारात् तथाभूते वस्तुसृष्टिरिति चेत्त्विभिदं तथाभूतत्वं नाम सत्यत्वमि-
ति चेत्॥ न मिथ्येदं रजतमिति विशिष्टेऽर्थे प्रमाणगम्ये स्वप्नस्य दृष्टावपि सत्यबुध्यमावात्॥
सोपाधौ विषयाभावविरोधितेति चेन्न मायात्मकत्वेऽपि समानत्वं दृष्टे सोपाध्यभावव्याव-
र्तेचात्मत्वे वसोपाधिकधर्माः स्वाश्रयोपाधावव्याप्यत्वया ससाभवतिसृष्टिरपि स्वरूपेणान-
वाध्यते किंतु परमार्थसत्त्वांशेन तु मिथ्यासृष्टिविषयत्वेऽपि वाक्यस्याप्रामाण्यं स्यात्तत्प्र-
माराव्यापारानभिज्ञो देवानांप्रियः प्रमाणं हि प्रमेयाभावेन सहते नाप्रमेयाभावेन च सृष्टि १८३

श्रुतिः परमार्थसत्त्वं स्वं न मिमीते तदभिधानाभावात् यथा घटं दृष्टस्ते भावाभावयोः साधारणो वर्त्मा
सत्तेन्यपराभिधानाभावात्तद्वत् हि स्वप्नविषयस्य सृष्टिश्रुतिस्तत्सत्त्वां दर्शयति प्रयोजनश्रू-
न्यतया तात्पर्यहीनत्वात्स्वेन ब्रह्मणः प्रपंचापत्तिं प्रतिपादयति अनर्थहेतुत्वाच्च दुःखवत्पाव-
न परिणामस्यानेच कर्मकांडस्य प्रत्यक्षादेर्वा सिद्धिः प्रयोजनं जगत्रिसत्त्वनयाप्युपपत्तेः॥ सृ-
ष्टिश्रुत्सवगमात्प्रागेव सिद्धत्वात् अभिदास्यापि सत्त्वादिरूपेण सिद्धत्वात् शब्दापेक्षेति चेत् कैप-
मितिव्यापुत्तनास्सवसंकरत्वादिनः न हि नित्यशुद्धबुद्धमुक्तनिरतिशयानंदप्रकाशमानं सत्त्व
र्वता हितिय प्रत्यागात्मभूतब्रह्मगमो वेगमात्र प्रागेव सिध्यति किं तर्हि सृष्टिश्रुतेः प्रयो-
जनं प्रत्यक्षादि सिद्धे प्रपंचस्य ब्रह्मरूपेवोप्रतिविनाशवत्तयान्यत्राभावमुपवर्णयंत त्रापि प्रतिषि

पं वि
३९२ स्य मिथ्यात्वापादनेन प्रमाणान्तराविरुद्धतया द्वितीयब्रह्मस्वरूपसिद्धिः प्रयोजनं तत्रैकवाक्यत्वादन्यथा
शेषविरोधात् स्वच्छाभासत्वात् तदाभासत्वेन तज्ज्ञानस्याप्रामाण्यमिति चेन्न सत्यरजतबुद्ध्या मुख्य
सच्छुतराभावात् तस्याप्यमुख्यसत्त्वात् तज्ज्ञानस्य मुख्यरजततो नवत्वामारोपात् देवदत्तो व्याघ्रो
भयत्वाया ह्लिषाम्या यास्वदेशदो मिथ्याकार्यं पितृवत्स्वच्छिशदपोः श्रवणात्कृतः पुनः सत्यमिथ्या
साधारणायां स्वच्छो मिथ्यात्वपक्षपातः आसदासीन्नो सदासीत्तम आसीदासीदिदं तमोभूतमायां तु
प्रकृतिमित्यादौ सदसद्विलक्षणानिर्वचनीयप्रकृतिश्रवणात् तदात्मकत्वाच्च विकारस्य तमो मोहो
महामोहस्तामिस्रो ह्यन्धसंज्ञितः ॥ अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति स्मृतेस्तमो विद्या ३९२
मायानां पर्यायत्वात् देवं श्रुत्यवगतायां मिथ्यात्वे सत्यत्वकल्पनायां श्रुतिबाधप्रसंगात्

ज्ञतथास्ति घटः स्यात् स्यथौंपाधौ प्रतिवत्तस्य घटस्य तदुपाधावेव नास्तित्वं प्रत्यक्षेण वाधो दृश्यते ॥ दे
शकालयोर्देशकालांतराभावात् तयोर्निरुपाधिकनिषेधादस्यार्थस्यानुपाधिनो निषेधाभावाद् तोदेश
कालतदुपाधिघटानामस्यार्थे ब्रह्मस्वरूपप्रतियोगिको प्रत्यक्षेण वाधान्मिथ्यात्वसिद्धिः एवं
सर्वस्य भावप्रपंचगोचरे ब्रह्मणि स्वरूपोपाधावस्यार्थे कालाद्युपाधिभिः सहाभावप्रत्यक्षेण वाधान्मिथ्यै
वेति सिद्धमन्याभावविशिष्टवस्त्वनुरञ्जनस्य प्रत्यक्षत्वादनुमानमपि सर्वे विकाराः स्वात्यन्तस्
एकस्मिन्वस्तुनि परिकल्पिताः ॥ प्रत्येकमेकस्वभावानुविद्धत्वे सति विभक्तत्वात् चन्द्रभेदवत् जडत्वाव
कार्यत्वात् भेदत्वात् जनकचन्द्रभेदवच्च प्रतिपन्नभूतोपाधावस्थूलाः दिवाकरः प्रतिबिम्ब्यमानत्वाद्दृष्टा
त्वभावषत् बिरोधिकारणस्वभावानुपमर्देन बिरोधिकार्योपजनिलक्षणत्वात् मायाविद्याघवत् ॥
प्रत्यग्धावस्थायो सह कालेन स्वोपाधौ शून्यत्वाद्देहात्मभाववत् ॥ अर्थापत्तिरपि प्रपंचजन्माचि

पं.वि.

नाशाद्यनुपपत्तेन स्यान्मिथ्यात्वमंतरेणामिथ्याभूतयोर्ब्रह्मशून्ययोरन्यत्वविनाशत्वात्रयवत्वानस्य
१९३ पिप्रयंचे तानबान्मिथ्यात्वानुमानं तत्त्वमसि आत्मेति वचनेन विरोधात्र चास्थूलादिवाक्यैः स्थू
लादिभ्योन्यचमात्रमुच्यते ।। कार्यकारणतादात्म्ये सत्येवं प्रतिषेधानुपपत्तेः यथाशुक्तावा रूप्ये
न्यच विवक्षयाप्यशुक्तौ रीरनिप्रतिषेधोनभ्यते तथा च प्रतिषेधे शुक्तौ स्वरूपमात्रप्रतिषेध
दर्शनात्तत्कात्प्रतिष्ठानात्र मिथ्यात्वानुमानमिति चेत् न विचारशास्त्रानारंभप्रसंगात् छद्मत्वा
त्ब्रह्मणि न विरोधबुद्धिरस्ति चेत्तर्हि सद्द्वारदं सदेव सोम्येदमग्र आसीत् सोसदासीत् ।। सदेव
सोम्येदमग्र आसीदित्यादिसिद्धिरूपसाम्यथात् कारणस्य सदसत्वे स्यात्तांशुमर्थस्य तत् १९३
क्वागोचरत्वात्सर्वशक्तित्वात् ब्रह्मणः सर्वमुपपद्यत इति चेन्न ब्रह्मणि विरोधपरिहाराय

विचारानारंभप्रसंगात् तत एव शून्यत्वापि कदाचित् ब्रह्मणः किं न स्यात् तस्मात्प्रत्यक्षा
नुमानार्थापत्तिभिः प्रपंचस्य मिथ्यात्वावगमात्प्रशांतत्वाच्च ब्रह्मणो निष्प्रयोजनाव
स्थितिश्रुतिर्विवर्त एव न वस्तुद्व्यवगमविरोधः अधिष्ठानत्वात्तस्य घटादिविशेषणानामेव मिथ्यात्वादि
ति सिद्धं ।। लक्षणमुक्तं यस्य स्वरूपं कथमनुमुक्तं भाष्यं दृष्टा हास्य जगत इति ननु तावदिदं विशेषलक्ष
णं प्रपंचजन्मादिकारणत्वस्य प्रपंचोपाधित्वान्निरुपाधिकब्रह्मस्वरूपलक्षणकथनमंतरे
णसोपाधिधर्मप्रतिपत्त्योगात्तत्र प्रपलक्षणमेतत्तत्व्यस्य ब्रह्मशब्दार्थत्वायोगादवच्छेदादि
नितत्वाहार्दविधिहि लक्षणमित्यादि उपलक्षणत्वेपि नाद्वितियस्वरूपलक्षणविरोधः ।। यत्नुतमित्यभा
ष्यशुक्तिरेतिव न्मिथ्याभूतेनापि प्रपंचकारणत्वेनोपलक्षणयोगादसाधारणसंबंधो हि लक्ष

पं·वि· णनिमित्तं न लक्षणसमत्वं काकादीनां सम्बद्धानां गृहोपलक्षणत्वादर्शनादिति॥ कार्यप्रपंचं केचिदि

१८४ त्ययमर्थः॥ नामरूपकर्मात्मकमिति वेदान्तिनः द्रव्यगुणसामान्यात्मकमिति वार्त्तेककारीयाः

कार्यकरणायोगविधिदुःखान्तराः पंचेति शैवाः द्रव्यगुणकर्मसामान्यविशेषसमवायाः ष

ड्वैशेषिकाः॥ जीवाजीवाश्रवसंवरनिर्जरबंधमोक्षाः सप्तेति क्षपणकाः द्रव्यगुणौ कर्मसामान्यवि

शेषशक्तिपारतंत्र्यनियोगाद्दष्टौ प्राभाकराः प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताव

यवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानि षोडशेति नैय्यायि

काः ज्ञानेन्द्रियकर्मेन्द्रियतन्मात्रमहाभूतमनोहंकारमहदव्यक्तपुरुषाः इति सांख्याः इति कस्त

हि सिद्धान्तस्तदाह तर्ह्येदासापेक्षादियपिरूप्यत इति रूपेण छंभूतं जगद्व्याक्रियते कथं ना १८४

मरूपिन मुत घत इति नेत्याह व्याक्रियमाणं हि वास्तीति अयमर्थः लोके घटं चिकीर्षुः कुलालः प्रथमं घटशब्दाभि

कल्पितं पृथुबुध्नोदराकाररूपि विकल्पितं वस्तुबुद्धावाविर्भावयति पश्चाद्यथाविर्भावितं घटशब्दात्मकं वचनेन पा

यं पृथुबुध्नोदराकाररूपितं घटं च निवर्तयति एवमेव मूलकारणमपि नामरूपाभ्यां स्वबुद्धावाविर्भूतमेवं स्व

यश्चात्तद्व्यनक्तीति नामरूपाभ्यामित्थं भूतं व्याकृतमिति स्पष्टे नैककर्तृभोक्तृसंयोगस्येक्षारभ्येनुन्वन्योपि

परिणामादयदूसतः प्राक्तनस्य ष्टार्थः॥ ननु किमत्रोपलक्षितस्य ब्रह्मणः स्वरूपलक्षणं उत्पत्तेन च स्व

रूपलक्षणमंतरेण कस्यचिद्वस्तुनः प्रतिपत्तिरस्ति न वयत्र शाखाग्रसचंद्र इति तावता प्रकृष्टप्रकाशात्म

प्रतिपत्तिमंतरेण चंद्रावगतिरस्ति नु तावत्संवशक्तित्वेन सत्साधारणलक्षणप्रधानादीनामथाविशे

षात् सर्वज्ञत्वमिति चेन्न तस्य सर्वोपाधिकत्वान्निरूपाधिकब्रह्मरूपाप्रतिपत्तेः॥ कथं वेदं सर्वज्ञत्वं

पंवि॰ १९५

मितिवक्तव्यं न तावत्प्रत्यक्षानुमानोपमानागमार्थापत्त्यभावप्रमाणैः सर्वं चेति तेषामयुगपत्प्रवृत्तेः सर्वस्य प्रत्यक्षत्वा
ह्यानात्संस्वपि ते कस्मात्के सर्वज्ञता नाभावादिन्द्रियाणां चेदेशकालवस्तुविप्रकृष्टार्थग्राहित्वाभावात् संयुक्तसम
वायात् संयुक्तसंयोगात् संयुक्तविशेषणतया वा सर्वार्थप्रत्यक्षत्वे स्मात्कर्मण्यपि प्रसंगात् ज्ञानसमप्रिसमाप्तिर्नान्येन्द्रि
दिसापेक्षमिति सर्वज्ञमानसप्रत्यक्षगम्यं न च धर्मातिशयादपीन्द्रियैरयोग्यवस्तुग्रहणं तेमाज्ञाणदृष्टि
नामपियोग्यरूपादिष्वेवातिशयवत्त्वदर्शनात्र च हेत्वभ्यासपरिभावनासंस्कारजन्यं मानसं सर्वज्ञज्ञानं कृ
त्स्नार्थग्राहयति ॥ प्रथमं कृत्स्नार्थग्रहणाभावे तत्र परिभावनायोगात् ॥ तज्जन्यकृत्स्नग्राहित्वानायोगा
त्परिभावनायाः प्रागपि कृत्स्नाग्रहणस्मात्कर्मण्यपि प्रसंगात् ॥ अतीतानागतवर्तमानार्थानामियत्तान
वधारणाच्च सर्वग्रहणानुपपत्तिरेतावदिदं नातः परमस्तीत्यनवधारणात् न च स्वरूपज्ञानेनैव सर्व
ज्ञतातस्य पदप्रभाववदतीतानागतग्राहित्वाभावात् तस्मान्नास्ति सर्वज्ञ इति ॥ उच्यते ॥ सर्व १९५

MEMORIAL

स्य कर्तृत्वादेव वर्तमानस्य कार्यसर्वविषयज्ञानं तावत्सिद्धम् एवं तत्तत्कालेऽतीतसर्वविषयावगमादनु
भूतविषयासंप्रमोषास्मृतिः स्वमायापरिणामोपाधिरनावरणा नित्या सर्वविषयाकल्प्यते तथास
ष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वादागामिसर्वविषयज्ञानं स्वप
परिणामोपाधि कल्प्यत इत्युक्तोऽसर्वज्ञता यः सर्वज्ञः सर्वविदिति च जगत्कारणस्य सर्वज्ञ
त्वयोगात् सर्वविषयज्ञानं प्रमीयत इति श्रुतियुक्तिभ्यां युक्तः सर्वज्ञता न तु सोपाधिकधर्मत्रास्व
रूपलक्षणमित्युक्ते ज्ञानेन सर्वज्ञत्वं शब्देन सर्वावभासक्षमस्य सत्तामात्रमादित्यादिप्रकाशवद्वि
षयोपाधिकं विज्ञानमेव ब्रह्मस्वरूपोपलक्षणं वक्ष्यत इत्यविरोधः ॥ नन्वन्येत्यादि स्पष्टार्थः ॥ ननु निः
श्वासवाक्यमेवमूलोक्तस्य सूत्रे षड्भावविकाराग्रहीतामिति चोदयति ॥ ननु षड्भावविकारादिति ॥ या

पं.वि.
१९८

पेस्केरिपाटिता नाभित्यादेः परिहारस्यायमर्थः ॥ आर्षेयस्य वाक्यस्य मूलप्रमाणं प्रत्यक्षमागमो वा सं-
भवति अनुमानादेरस्माकमपि प्रवृत्तेर्वाक्यानपेक्षणात् न तत्र प्रत्यक्षमूलत्वे यास्केकप्रस्युतो तिकथ-
मेएव भावविकाराः प्रत्यक्षेणावगम्यन्ते ॥ न महाभूतविषयास्तत्र भौतिकविकारकारणे ब्रह्मणि
गृह्यमाणे भूतपञ्चकमेव ब्रह्मणा हितं स्याच्छ्रुतौ तु मूलप्रमाणानपेक्षत्वात् पङ्क्तिविद्वन्नध्येवन-
स्यभूतकार्यत्वे ब्रह्मपद्धीशाकातङ्गेति किंच ॥ श्रुत्यर्थपरत्वात्सूत्राणां श्रुतिरेव जन्मादिसूत्र-
मूलमिति सा तदर्थनिर्णयार्थत्वादिति ॥ ननु भूतभौतिकमूलकारणे ब्रह्मेति प्रतिपन्ने युक्ते
मायाया अपि मूलकारणत्वात् ॥ मायां तु प्रकृतिं विद्यादिति श्रुतेः प्रकृतिपदेन पेतिप्रकृतिरिति कारण-
मात्रं मायेति चेत् ॥ न प्रकृतिशब्दस्योपादाने रूढत्वात् व्युत्पादनायोगात् आत्मन आकाश इति श्रुते- १९८
तरश्रवणाच्चेत्स्यापत्तेरिति चेत् ॥ ननु त्वन्मते श्रुतित्वान्मायाप्रकृतित्वविरोधानिमित्तपञ्चमीयोगा

रक्ष्यमाणन्यायानुसारेण च मायोपादानत्वनियमो ह्युपपत्तेः । इन्द्रो मायाभिरिति तत्तनीयेव श्रूयतइ-
चेत् ॥ सत्यं मायामनो बहुत्वापत्तेः कारणताभवस्मयं वोपादानत्वे कारणे निरपेक्षप्रकृतिर्द्वयानुप-
पत्तिरिति चेत् न हि परस्य रविशिष्टतया हि सूत्र रज्जुवत् प्रकृतिगोचरस्यादतो जगत्कारणे ब्रह्मणि
मायाया अपि ब्रह्मत्वं लक्षितं स्यात् मायेति प्रज्ञाभिधीयते सा च ब्रह्मचैतन्यमेवमेत्यविरोध इति चेत्रान्व-
यव्यतिरेके विरोधोऽनपरिहमाणात्वस्त्वेवं तथा देप्रतिपन्नोपाधिबाधिते च वधव्यवहारे न्वयव्यति-
रेकाभ्यां मायाशब्दः प्रयुज्यमानो दृश्यते लोकसंवेदनविरोधाच्च न हि प्रज्ञातिशयवन्तं मायाविनं वदन्ति गर्हते
च विदुषि मायाशब्दप्रयोगं बुद्धिविषयत्वान्मायाशब्दस्य न ब्रह्मचैतन्यप्रज्ञायां प्रसंगस्वप्नादिविविधमा-
याकारप्रतिभासनाद्बुद्धेः कार्यवाचिनो मायाशब्दस्योपचारात्कारणे प्रयोग इत्यनवद्यं ॥ अपि च भूय

पं०वि० श्वाते विश्वमाया निवृत्तिमामेव ये प्रपद्यंते मायामेतां तरंति ते ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ माय
१८७ या पहृतज्ञाना आसुरं भावमाश्रिता इति निवर्त्यं च गुणमयत्वं ज्ञानावरणत्वं लिंगा च न ब्रह्म चैतन्यमाया बुद्धि
रेव माये चेन प्रकृतिशब्दविरोधात् ॥ मंत्रौषध्यादिर्मायेति चेन्न ॥ न दृश्यमानां भवनगरादौ मायाशब्दप्रयो
गान्मंत्रौषध्यादौ तदप्रयोगात्तथापि जडात्मिका माया शक्तिः पारमार्थिकीति चेन्न ॥ सदासीन्नो सदासीत्तम
आसीदिति जगत्प्रागवस्थायाः सदसद्विलक्षणानिर्वचनीयत्वश्रवणाल्लोके च रहस्यश्वृथ्यादिषु व्यभि
चारि पुमिथ्यावस्तुमानेत्युपाधे निमायाशब्दप्रयोगाच्चरात्य विद्याविनताद्धदियत्स्मिन्त्रिवाशिते योगीमामा
मयेपापतस्मे विद्यामनेनमद्यानियाया विषयोः समानाधिकरणपाच्च तस्मादनिर्वचनीयमायाविशिष्टं का १८७
रणं ब्रह्मेति प्रासंतत्राहातोयद्वयष्टं भो विश्वो विश्वो विवर्तन इति त्रैविष्यमत्त संभवन्निराज्याः संयुक्तस्त

त्र द्वयवन्मायाविशिष्टं ब्रह्म कारणमिति वादे वा देवात्मशक्तिं स्वगुणैर्निगूढामिति श्रुतेर्मायाशक्तिमत
द्ब्रह्म कारणमिति वा ॥ जगदुपादानमायाश्रयतया ब्रह्म कारणमिति वेति तत्राविशिष्टपक्षे तथैव ब्रह्मत्वे
नोपलक्षितस्य ज्ञानानंदादिस्वरूपलक्षणेन मायानिःकर्षात्लक्षणाद्वयेन विशुद्धं ब्रह्मसिद्धिरुत
रपक्षयोस्तु मायाया ब्रह्मपरतंत्रत्वात्तत्कार्यमपि ब्रह्मपरतंत्रं भवति यथा श्रुतं तेनैवाधारधीपि पदा
ज्ज्वलंतत्र प्रतीयते न तु श्रौत्यदामानकायस्य यदाश्रयोपाधि ज्ञानानंदादिलक्षणं च तद्ब्रह्मेति
विशुद्धत्वाभद्रस्तीति न दाहयदष्टं व भेद इति ॥ केचिद्ब्रह्मैव जगदाकारेण परिणमते मृदिव घटाका
रेणेति वदंति तन्न्यायपर्त्तयति विधो विवर्तन इति ॥ एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतासत्या
नेकरूपावभासो विवर्तः ॥ एकस्य द्रव्यस्य परित्यागेन सत्यरूपांतरापत्तिः परिणामस्तत्र ब्रह्म

पं०वि० भविवर्त्तनेपरिणमतएवेति तैस्तत्र प्रमाणं व्यक्तं व्यंसृष्टिश्रुतेः परिणामत इति चेत्सा खलु सृष्टि
१९९ श्रुतिर्नामांदस निरवयवापरिछिन्नब्रह्मस्वरूपस्य पूर्वसिद्धस्य परित्यागेन जडदुःखमिथ्या
सावयवपरिछिन्नकार्यापत्तिं ब्रह्मणो वक्तीति आहोस्वित् पूर्वसिद्धविपरीतब्रह्मस्वरूपा
परित्यागेनैव विपरीतकार्यरूपत्तिं ब्रह्मणो वक्तीति इति विवक्तव्यं तत्र पूर्वपरित्यागे ब्रह्म
ब्रह्मस्वरूपोछेदः कार्यमात्रमेवस्तु स्यात्सष्ववेस्छायां कार्यमात्रमेव पुनः प्रलयावस्छायां
ज्ञानानंदादिरूपेणापरिणमन इति चेद निर्मोक्षप्रसंगो जआ मामृहान्।। कथं न जायते के
त्यादिश्रुतिविरोधश्चस्यादथ पूर्वविपरीतब्रह्मस्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रू १९९
यात्सा सृष्टिश्रुतिरेवेति हि विवर्त्तं प्रतिपादयति।। शुक्तिकारजतमायाव्याघ्रादिषु विवर्त

तल्लक्षणत्वात् हि यसृष्टिश्रुतिः सृष्टिमात्रविषया न पूर्वस्वरूपपरित्यागापरित्यागयोर्व्याप्रियत इति तथा
पि व्यवस्थिते ब्रह्मवाक्यैरेकवाक्यात् तत्स्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रह्मणो वाणो विव
र्त्तमेव दर्शयतीत्यन्वयोपि कश्चिदाह निरवयवमपि परिणमत इति तथा हि हेमद्रव्ये रूचकाका
रेण परिणममाने तदवयवा अपि परिणमेरन्नवेति विवक्तव्यं परिणामेवरेनहि तदवयवा अपि न
श्येति निरवयवतः परिणामस्यात् अथ न परिणमेयुर्न तर्हि अवयवा परिणमेत आश्रयविकारमंत
रेणाश्रीतस्य विकारायोगात् तस्माद् द्वयथासंयोगो व्यवयव्येकदेशसमवेतः परंपरया निरवयव परमानुसं
योगपरः सरः तथा निरवयवपरिणामपुरः सरो वयविपरिणाम इति।। सवक्तव्यः कोपयारिणाम
तिपादिता वत्स्वावयवातां पूर्वसंयोगात् संयोगांतरापत्त्या वयववांतरत संयोगेन वा संमूर्छि

नायवयवं चेपरिणमे॥ न तर्हि निरवयवपरिणामः अवयवाभावान्निरवयवस्य तदवयवानां संयोगान्तरेण संमू
र्छितत्वमंतरेणावयविपारिणामो वस्थांतरं वान्यथाभावो वा निरूपायेत् केशाकं तेन चवस्तुनो वस्त्वंतरसंयोगो वा रे
पापरिस्पंदो वा गुणांतरोदयो वा परिणामः ब्रह्मणि तेषामभाव्यदाकाशे वस्त्वंतरसंयोगिनि परिस्पंदमानेव
भ्रमरे त्वौ हि स्योदयेन्य घटे इष्येपरिणामध्यभावात् अथ तदनुरक्तः इष्यांतरोत्पत्तिपरिणाम इति तत्र किं हेमा
वयवानो नुवकरूपेणैव परिमाणः किं द्रव्यांतररूपेणावतावत द्यांतरपेण तत्र नुवकव्यतिरिक्ता यंद्रव्याद
र्शनात् नापि रुवकाकरिणैव तस्या वगविपरिणमत्वादवयवानां रुनुवकानुगमस्य नुवकानुगता वयव्यनु
गमेनेवान्यथासिद्धत्वात् न च तुवकावस्था व्यतिरेकेणा हेमावयवानां अवस्थांतराणि दृश्यंते येन परि १८९
णामभेदः स्यान्न च संयोगभेद एवावयवपरिणाम इत्युक्तं नेवावयविद्रव्ये विनाश्य हेमावयवानुचर्ककारे

पा परिणामे न इति प्युक्तं आरंभवादप्रसंगात् अथा द्रूर्या म्यानोयवयवपरिणामो वयविपरिणामानुपपत्या कल्प्य
ते आश्रयविकारमंतरेणाश्रितविकारानुपपत्तिः नैतत्सारमवयविजन्मनिनाशयोरवयवानामपितनं
त्रणां जन्मविनाशप्रसंगात्॥ अवयविगमने अवयवानां गमनवत् परिणामो भविष्यतीति चेत्॥ न अवयवि
नि घटत्वजातिसमवायिन्यवयवानां घटत्वजातिर्गुणीदय न्यथाभावविरहिष्वपि इष्यादिपरिणा
मवदिति वदामः॥ न हि द्रव्यास्य विस्थांतरद्यांतरत्वापत्ति वन्नेसांगुणांतरमापद्यते वरथांतरं वा न चा
वयवविकर्षवार्तिरके णावयवाणां कार्यं दृश्यते इति युक्तं न हि पटे कार्यांतरावभासे पितंतवो तेत्यात्म
नावभासंते पटकार्यितंत्वानुगमः स्वानुगतानुगमादन्यथा सिद्ध इत्युक्तं॥ किं वावयविपरिणामोपाधा
केवायवपरिणामो दृष्टइति न निरूपाधिकनिरवयवाज्मपरिणामसिद्धिः यत्तु निरवयवसंयोगव

पं०वि०
१९०

तत्परिणाम इति तत्रापि दृश्यमानो वयवविसंयोगो न परमाणावुपसमवेतः तद्रूपादिवत्प्रत्यक्षत्व
प्रसंगात् नाप्यवयवैकदेशसंयोगेन निरवयवाणुसंयोगः कल्पयितुं शक्यते अवयवत्वेव जा
तिसमवायवदवयवसंयोगमंतरेणापि निरवयविष्वेव संयोगोपपत्तेः अवयवानां संयोगानुगमस्या
वयव्यनुगमेनान्यथासिद्धत्वात् अवयवेष्वेव संयोगो नावयवीनीति चेत् ॥ न ॥ अवयविभ्यां संयुक्ताभ्यां का
र्यनिरारंभप्रसंगात् तस्मादवयविष्वेव संयोगो नावयवेष्ववयविसमवायेसंयोगिके स्ववतिनो संयोग
स्य प्राप्नोतीति चेत् तर्हि निरवयवसंयोगोपि केन दृष्टेः प्रवयाभावप्रसंगः कथं पुनः ब्रह्मणो निरवयवत्व
लाभ उच्यते ॥ अवयवावयविनोः स्वयंप्रकाशात्मैकसत्तीतरभेदाविषयत्वान्नसावयवत्वं ब्रह्मणा
स्वात्मन्यनुभवितुं शक्यं अन्यतरस्यास्वयंप्रकाशत्वेन्यतरेणावेद्यत्वात् घटात्मनोरिव नांशांशिभा

व सिद्धेः श्रुतिश्च निष्कलं निष्क्रियं शांतमिति क्रियावयवशून्यतामाह नित्यत्वादि क्रियापि श्रू
यत इति चेत् तर्हि परस्परविरोधे सति मायया तत्तान्तव्यवस्था कल्पनीया मायाभिः पुरुरूप ईय
ते इति मंत्रे तेन शरीरेव मयानिबंधनत्वश्रवणा चेतनस्यानित्यापि पारस्य सुक्रमे पुरुषार्थत्वाद्वाग्मात्रं ब्रह्म
णः प्रवृत्तिप्रयोजनताभावाद्वा विपरीतस्वरूपात्परिस्यारोत्र विपरीतकार्योपकश्च विवर्ततेत्यवइति सिद्धं ॥ न
नु जनाद्युत्पत्त्यादिकारणत्वं सिद्धवत् ब्रह्मलक्षणत्वेनोपादानुपाश्रयभूते पंचकस्य कार्यत्वासिद्धेर्भौति
कानां च भूतोपादानत्वासिद्धेरिति चोदयति ननु श्रुतिनिर्दिष्टग्रहणादुत्पादिनोऽउच्यत इत्यादेः परिहारस्याय
मर्थः ॥ पृथिव्यप्तेजोवायवोऽपि वादयदा निजन्मविनाशवंतः पृथिव्यसनावायुकुद्धिगोचरत्वा न देकदे
श पृथिव्यस्तेजो वायुवदिति ॥ ननु प्रत्यनुमायनमसि पृथिव्यादयो च जायते महाभूतत्वादाकाशवदाक

DR BHAU DAJI

पं०वि०
१९३

शश्चन जायते नित्यपदद्रव्यत्वादात्मवदिति सत्यं महाभूतत्वादिति सामान्यतोदृशनात् पृथिवी बुद्धिगो
चरत्वात्तदेकदेशावदिति विशेषतोदृशनमेव वल्मीकइत्येनवेद्य नयाक्तविशेषणस्येत्यादिभाष्यस्य
तात्पर्यमाह श्रुतिरपि ब्रह्मस्वरूपब्रह्मरूपनिर्णयायेत्यादिना स्वजगत इति भाष्यं व्याचष्टे नान्यतः स्पर
पतिरिक्ता॥ स्पितात्प्रधानादित्ययमर्थः॥ सर्वे च बाह्याध्यात्मिका भावाः सुखदुःखमोहसामान्यप्रकृ
तिःरकाः सुखदुःखमोहसामान्येनानियमोतान्वितस्वभावत्वात् येविकारायदन्वितस्वभावास्तेनत
प्रकृतिका दृष्टा यथा मृदन्विताः शरावाद्यस्तथा सर्वे विकाराअविभक्ताएकप्रकृतिकाः परिमिता
नेकविकारत्वात् रूपपरिमितानेकविकारास्ते विभक्तैकप्रकृतिका यथा मृत्पिंडप्रकृतिकाः शरावा १९३
दयइति जगन्मूलकारणं प्रधानमनुमिमते सांख्याः॥ तथा राज्यादिनश्वानुमिमते स कार्यद्र

व्यं॥ ल्पपरिमाणाद्वाद्गुत रपरपरिमाणसंयोगस विवसमानजातीयानेकद्रव्यारब्धं कार्यत्वात् यत्कार्यद्रव्यं तत्तथा
यथानेकद्रव्यारब्धः पटइति निरवयवापरिमाणुपर्यन्तमनुमानप्रवृत्तेः परमाणवो मूलकारणं इति तथा शू
न्यवादिनश्च सर्वं कार्यमभावपुरःसरं भवितुमर्हति योग्यलेमत्यनुपलभ्यमानेपूर्वावस्थत्वात् यद
भावपुरःसरं न भवति न तद्योग्यत्वे सत्यनुपलभ्यमानपूर्वावस्थं यथा परपरिकल्पित आत्मेति भूस्पा
कवनत्वं सवर्त्रवदंति योगाः शैवाश्च हिरण्यगर्भपशुपतिवागमसामर्थ्यात् जगत्कारणं कल्पयंति
॥८ तान्प्रत्याख्यावर्तयति नान्यतः परपरिकल्पितादित्यादिना तत्र प्रथमं तावत्प्रमाणदूषणं संभावय
प्रचेतनात्वादित्यतः प्राक्तेनेनत्रा कथं सांख्यानुमाने तावत्सुखदुःखमोहान्वयो भावनामसंप्र
तिप्रतीतं बहिर्भावेनोपलब्धे॥ स्यादेतत् सर्वे विकाराः सुखदुःखमोहात्मकाः विविज्ञोपरक्तत्वे सतितत्र
तदाकारप्रतिभासहेतुत्वाद्दर्पणोपरक्तनया मुखाकारप्रतिभासहेतुर्विदिति भावानां सुखदुःखमोह

पं०वि०
१९२ त्वयोनुमार्यत इति नांतर्वेर्हिर्भावविभेदप्रत्यक्षविरोधादेकं च शरीरं बहुमुल्लाभमानानां प्रत्येकं सुखदुःख
मोहविनयोपलंभप्रसंगाद्दृष्टेन च न तु सामर्थ्यनियमायोगादनोसिद्धो हेतुरनैकांतिकश्च गुणसामा
न्येरथ प्रकृतिभिर्द्व्यणांसमन्वया ये तु परिमितत्वादिति तत्रापि वस्तुतः पारि[illegible]ति चेदेनोः गुणेषु
रुषेष्वनैकांतिकतो दर्शि कालयमिरिनत्वे घटइति हिमकरकादिषु प्रत्यक्षादिदृष्टभिन्नप्रकृतिष्व
नैकांतिकाः विशेषिकानुमानेपि स्वपरिमाणादराउरपरिमाणारंभत्वेदि॥ घविस्तिरोटकूले॥
क्रियमाणारज्जुद्रव्यनोत्स्वहस्वस्यापि कार्यत्वाद्दर्शनादनैकांतो हेतुः॥ प्रत्यनुमानदूषचने किंचिदपि
कार्यद्रव्यं निरवयवद्रव्यसंयोगपुरःसरं भयात्मकत्वाघत्स्वपात्मकं न तत्र निरवयवद्रव्यसंयोगपुरः १९२
सरं यथा घटशून्यानुन्यानेपि घटस्यश्रूर्खावस्छाप्रत्यक्षदृष्टामदिस्यनुपलभ्यमानपूर्वावस्थ

स्यादिन्यासिद्धो हेतुरिति॥ इदानीमर्थदूषणमभिप्रेत्याह अचेतनता तावदचेतनत्वोदेवेत्यादिना॥ माभू
त्रिरीश्वरस्तावधीना हि विचित्रकार्यरचनापरमाणुवादेषु पुनरधिष्ठातुरीश्वरेस्य विद्यमानत्वात् तद्धि
सामर्थ्यादेव विचित्रतु कार्यस्य नामभविष्यती त्याशंक्याह चेतनारूपीति॥ अयमर्थः॥ कुलालादि
दृष्टांतेनानुमीयमानस्येश्वरस्य शरीराद्यपरिछिन्नतानशक्तित्वात्तेनैव दृष्टांतेन परिछिन्नतानश
क्तेश्च जगद्रचनानुपपत्तिरिति घटादिषु च कर्तृव्यप्रसंगान्मूलकारणेपि तदनुमानमिति यत्तु
शून्यालंबनेन जगदिति तत्राहभावात्तुनरिति॥ नव निरूपाख्योपादानता जागतः सदन्वयादिति
किंत्वनिरूपाख्यस्य कारणत्वे पूर्वकल्पस्य निरवयवविनाशसंस्काराभावात् पुनः सजातीय
कार्योदयानियामकाभावाद्विशिष्टसंस्थानपश्वादिकामियोतेनु ष्टिनेकर्मणां कल्यांतरितथा

पं०वि० विषयश्चाप्रत्युत्पत्तेः शब्दार्थसंबंधतद्व्यवहारिणां चानादिकस्य दृष्टे तं कालं दिविकार्क इवसेव ते ततः
१९३ कृतयुगस्यादौ ब्रह्मभूतो महापशः सर्वज्ञो ध्यातिमानात् ऋषिः पुनरावायते स्म रात्रिस्यादिश्रुतिप्रतिप
न्नानां निरन्वयविनाशात्वेऽन्तरे पूर्वव्यवहारानुसंधानेन व्यवहारप्रवृत्त्यभावादपूर्वसंकेतेव धर्मस्य प्रमा
णांतरागोचरत्वात् क्षेपदार्थस्यापूर्वस्यापूर्वसाधनत्वं प्रमापयतगोशब्दं प्रयुज्य नवायनेतविवाक्यरचना
नुपपत्तेः अकर्मतत्वफलत्वाप्रामाणो व्यवहारो छोदइत्याहेनीतकल्पसंस्काराभावादित्यादिना ॥ अत्र स्वभा
ववादिकल्पितेन कारणानामसापेक्षा निदत्युत्पत्तौ न तु स्वयमेव स्वस्य निमित्तमित्यक्रंभवतिकिं वा नि
निमित्तमुत्पत्तन्नदतिनिमित्तमिति ब्रूमः न तु न हि घटस्य भावा भावौ युगपत्तस्य तत्क्रमं कारिनिमित्तनिर १९३
पेक्षत्वादुत्पते ॥ कारणास्य मैके कारित्वं स्वाभाविके चेत् स्वभाववादप्रसंग निमित्तांतरसापेक्षत्वेनवस्था

यातं कालभेदेन क्रमकार्यव्यवस्थेति चेत् ॥ सकालक्रमः स्वाभाविकश्चेत् स्वभाववादः निमित्तांतरापेक्षत्वे नवस्था तस्मात्स
र्वं कार्यं विचित्रक्रमवन्निवयाथादर्शनं स्वभावेनैव जायत इति तत्राह न च स्वभाव इत्यादिना स्वतः सिद्धसामर्थ्यानामपि भा
वानां परस्परेण कार्योपकारकभावः प्रत्यक्षसिद्ध इत्यर्थः ॥ अनइस्कयसंहारः न त्वनुमानेनैव यथोक्तविशेषणमीश्वरं नाभि
का व्यवस्थापयति किं फक्ति सहितेनागमेनेत्येतआह तदत्रानुमानमित्यादिना फक्ति हि संभावनाबुद्धिमात्रं फल्यादय
ति अक्रमानं पुनरर्थं निश्चाययति व्याख्यातेनैव स्याभासोदाहरणमात्रदर्शनं युक्तिनव्य निचारिणी च व्याप्तिरनुमान
मन्कुलालादिदृष्टांतेः संभावयितुं शक्यते युक्तेरेवैषां तत्रागतानादर्थनिश्चायकानतं मानं मन्यत इति किं तदनुमानमि
त्युच्यते सर्वकार्यस्वरूपोपादानोपकारणसंप्रदानप्रयोजनसामर्थ्यविषयविज्ञानवत्कर्तृकं विविधविन्यासकार्यत्वा
त् घटादिवदिति विशेषकानुमानं ॥ संव्ययोगास्तेनैश्वर्यादिशक्तयः समनोक्रमप्रमाणाश्च चित्सर्वविषयज्ञानैश्वर्यशा
क्तिमिति पर्यवशक्तितरतमतभावेनोत्कृष्णमाणा धर्मत्वात् परिमाणावदित्यनभिमतेनैयायिकादयस्तु सर्वकर्मफल
दातकमतसफलनदोकदेशाकलादिविषयज्ञानवताप्रदीयमानं व्यवहितं कर्मफलत्वात्सेवादिकर्मफलवदिति

पं.वि. कामिमतेन त्रवेशेषिकानुमाने जगतो बहुकर्तृकत्वपरिच्छिन्नज्ञानैश्वर्यादिमत्त्वत्वानुमानेऽनुदाहरणसंभवाद्युक्ति
१५४ मात्रमेतत् योगानुमानेऽपि ज्ञानैश्वर्यशक्तीनां कचित्काष्ठाप्रतिमात्रत्वेनानुमीयमाने लक्षपदार्थविषयज्ञानादिषु पर्यव
सानसिद्धेः कुतः सर्वज्ञत्वादिसिद्धिः सर्वविषयज्ञानानामनुमाने गुरुत्वरागद्वेषवत्त्वाभ्यां त्यादिश्वनेकांतिकत्वे
ति युक्तिमात्रमेतत् नैयायिकानुमानेऽपि कर्मफलस्य शरीरेंद्रियादिमद्बुद्धिमत्त्वदर्शनादेकेश्वरासिद्धेः श्रुतिप्र
सिद्धसर्वकारणसर्वज्ञसर्वेश्वरसर्वकर्मफलदातृद्वितीयब्रह्मप्रतिपत्तिया नानुदाहरणमात्रेण संभावनाबुद्धिहेतुत्वा युक्ति
मात्रमित्युक्तानां निश्चायकमनुमानमन्यते॥ ननु वाक्येषु सत्सु किमित्यनुमानमपेक्ष्यते ननु सूत्रेऽप्येतान्येवानुमानानि निबद्धा
नानि स्वातंत्र्येणार्थनिश्चायकत्वेन सूत्रेतानि तर्करूपमागमस्य गुणाभूतयं युक्तिरिति चोदयति नान्विहापि तद्
वापि न्यस्तमित्यादिना यदिहरातनवेदांतवाक्यस्य धनार्थत्वादि त्यादिना किं वानुमानमात्रात्कारणासद्भा १५४
वमात्रं सिध्यति नाधिकमिह तु सत्यज्ञानं दानेन सर्वज्ञसर्वगात्मभूतब्रह्मावगतिर्विवक्षिता न च योग
मनेरणासामान्यमात्रविषयानुमानादेव विशिष्टार्थसिद्धिरित्याह समन्वयसूत्रप्रमत्वोपात्ते इत्यादिना न

नाहं युक्तिरत्र सूत्रितागमेनैव विशिष्टार्थसिद्धिरित्यत आह सिद्धिरिति लमर्थजिज्ञासायामित्यादि स्पष्टार्थः॥ श्रुतिः
पदांतरनिरपेक्षः शब्दो लिंगं श्रुतस्यार्थस्यार्थान्तरेणाविनाभावोऽनेकपदसामर्थ्यं वाक्यं वाक्यद्वयसामर्थ्यमा
कांक्ष्याधीनविश्वपंप्रकरणं क्रमवर्तिनां पदार्थानां क्रमवर्तिभिः पदैर्यथाक्रमसंबंधः स्थानं संज्ञासामान्यं समाख्या
॥ ननु शब्देन ब्रह्मस्वरूपेऽवधारितेऽनानुभवेन कृत्यमस्ति नव शब्दप्रमेयमनुभवितुं शक्यमिति तत्रानुभवावसानत्वा
दित्यादिना॥ ननु धर्मजिज्ञासायामित्यादिः स्पष्टार्थः॥ किमिति धर्मस्यानुभवानपेक्षेति चोदयति कथमिति॥
धर्मस्यानुभवायोग्यत्वादनपेक्षत्वानुभवत्वाच्च न शब्दादन्यापेक्षेति दर्शयति॥ कर्तव्यं हीत्यादिना॥ ननु सि
द्धस्वभावयानुभवयोग्यत्वेऽपि दिक्षिमिलनुभवोऽपेक्ष्यत इति तत्राह इह तु सिद्धस्य॥ ननु वेदप्रमेयत्वाविशे
षात् ब्रह्मवन्निःसनाकमवेऽपि धर्मब्रह्मणोरुपाधिमाभूदयेक्षा ब्रह्मवद्धर्ममपि स्यादपेक्षेत्यत आह॥ न हि कर्त
व्यसिद्धार्थनिष्ठपो हीति॥ अस्मत्परुषेच्छावशात् निर्वर्त्यत्वमिति तत्राह॥ ततो विधिप्रतिषेधेति यजेत न भीत

पं.सि.
७
३९५ येदि तिवच्छब्दनो विधेयत्वं प्रतिषेधत्वं चेत्यर्थः॥ विकल्पइति। व्रीहिभिर्यवैर्वेति व्रह्मवत्स्वा। उवैती याविकल्पः॥ समुच्चयइतिपूर्व्व
गसमुच्चयवच्छब्दसमुच्चये सर्थः॥ उत्सर्गोपवादइति। नहिंस्यात्सर्वाभूतानि अग्नीषोमीयं पशुमालभेत इत्युत्सर्गापवादौ इत्यर्थः इति यदक्तं
होनितिब्रह्मसामान्यप्रतिपन्नब्रह्मणो विशेषापवादः बाधासमुच्चय इति प्रकृते निर्दिष्टानामविष्टपवनानां वेलते स्थाने संपादी
विसानस्थानवद्ब्रह्मणीपनिर्दिष्टस्योपविष्टवस्य मोविसानुष्ठानमभ्युच्चयः अयोहितविकल्पइति उदितपक्षुदोषमनुदि
नुदोषीति शाखाभेदेन व्यवस्थावत्कविद्वत्त भवतिनो वतीति यवस्थाखेवधर्मस्य मंबलनाइति वेने साहनवस्तुनो
नि॥ तदेवपंचयति काचित्कस्मिन्निति परः परिबोदयति सनःप्राकृतः स्पष्टार्थोपुनः स्तुमानवादिनश्चोदयतिननुभवति
प्रपंचइति नत्वनुमानमत्रवनुपरं सूत्रं पनेरति भातीति नत्राहप्रत्युत्पत्तेणोति ज्ञानानंदप्रसक्तभूनश्रवणश्चानुगदिता
सामान्यमात्रविषयानुमानेश्व भवतत्सृत्वेपितानुभवः कर्तुं शक्यत इति पुरिहरतिनेद्रिया विषयत्व इत्यादिना अस्य
तदुक्तम्यसत्तारः॥ नन्वेवं सतीति स्पष्टार्थोव्यतरमाहिपरिहारस्याय मर्थः॥ ज्ञानानंदं सर्वज्ञप्रसंगात्मक्लान्ता ३९५
श्चार्यकिंतु मसमर्थोश्च पिपुनरुक्तः शब्दावगतेब्रह्मणि सामान्यद्वारेण संभावनाविद्धिदेनवोभवतीकथंजगदुपादा

तेद्विनीयैश्चाव्यगतेब्रह्मणोमृदादिदृष्टांतेरुपादानव्यतिरेकेणाकार्यस्यानिरूपणाद्वितियता संभाव्यति स्पष्टिकलो
हित्यप्रतिविंबरज्जुसर्पघटाकाशदृष्टांतेरात्मनिकर्त्तृत्वादेरारोपितत्वं जीवब्रह्मैक्यं ब्रह्मव्यतिरेकप्रपंचस्यातंआभावोत्स्व
गाद्वारेणाविशुद्धाद्वितीयप्रत्यगात्मता संभाव्यते॥ तत्र स्वरश्रृंदृष्टांतेन जीवब्रह्मैक्यसतासंभाव्यतइत्यादि किंफलमस्ति देवा
त्यमितिभाष्यस्याक्षेपार्थमाह॥ सर्वत्रवेदांतवाक्येब्रह्मपदस्येत्यादिनायेषांचेदांतवाक्यानामित्यादेः परिहारस्यायमर्थः
॥ सत्यज्ञानानंदप्रत्यगर्थब्रह्मपदावेप्रसिद्धेपिवृहत्वमात्रस्य प्रसिद्धत्वात्तदनुवादेन संनिहितपदार्थसंसर्गसामर्थ्या
द्विशिष्टब्रह्मप्रतिपत्तुं शक्यत इति प्रतिपादनमरंसंस्यादिवाक्यं अर्थतदेवत्तलक्षणमितिनरसत्यज्ञानंदब्रह्मस्वरू
पलक्षणस्यसिद्धानुवादप्रसंगइति॥ नन्वस्वाध्यायपाठक्रमेणानार्थप्रतिपत्तिः॥ किंतंवेपरीत्येनप्रसिद्धानुवादेनाप्रसि
द्धप्रतिपाद्यतइतिन्यायात्तथा चकारणास्यप्रसिद्धत्वाद्यस्मादाकाशः संभूतःसआत्मासत्यंज्ञानमनंतंब्रह्मेतिवाक्य
मष्टेनितथायस्मादेतद्ब्रह्मनामरूपमन्नंवजायतेससर्वज्ञःसर्वविदिति॥ तथायस्मात्प्राणादितायतेसदिव्योह्यमूर्तःफल
इत्यादे॥ तथाभूतयोनिः॥ तददेश्यमग्राह्यमित्यादियस्मात्तेजोवन्नानकनमकारणोकचेपुरुसेकदाभाकदे

पं·वि·

१९६ निश्चीयते तत्सदद्वितीयमपि मानत्वमसीत्यादि कारणमात्रानुवादेन तद्विशेषप्रतिपादकत्वादिति ॥ सत्यमधिकारिज्ञानकर्तृ
ताब्रह्मप्रतिपादनानार्कममभिप्रेयमुक्तं तदाह तथैवोदाहरणमिति ननु जगत्कारणो नानात्वस्यापि प्रतिपत्तेः कथं नु
स्त्ववादेऽनेन ब्रह्मप्रतिपादनमिति बोधयति कथमिति ॥ परिहरति पूर्वोक्तेनेत्यादिना यमर्थः जगत्कारणमात्रानुवादे
ऽपि तस्य तात्त्वाशेषोक्तापायत्वादसेकत्वनिर्देशादेकत्वमपि प्रमीयते न च तदुद्देश्यप्रमितिन ननु पयप्रानवजगत्कारणो वृत्वपुरो
वादाभावादस्वभावाद सामर्थ्यादेवैकत्वं प्रमीयते अथानुवादवैयर्थ्यमनवेकत्वे ब्रह्मलक्षणे च प्रमीयमाणे वाक्यवैद
पात्रे कृत्वस्य प्रसोऽप्रतिपत्ति गुणभूततयैकवाक्यत्वादर्थैकत्वमपि लक्ष्यान्तर्गतमेव भवति न लक्षणान्तर्गतं तथाहि
जगत्कारणमात्रोऽनुवादेनैकं ब्रह्म विधीयत इति ततः किमायातमिति तदाह यथा सर्वज्ञमिति न संज्ञासंज्ञिसंबंधपरं
वाक्यं किं तत्वप्रतिपादनपरमार्थकत्वं संज्ञासंज्ञिसंबंधपरत्वादयमस्याद्विजस्नाम सेत्यादि एवं सर्वज्ञं सर्वशक्ति सर्वेश्व १९६
ज्ञानादिर्जगत्कारणं तज्ञप्रक्षा विधेयमित्यर्थः नच निरुपाधिकस्वरूपकथनमन्तरेण सोपाधिकानां सर्वज्ञत्वादी
नां कृत्यविदृप्तानयाप्रतिपत्तिरपि तस्मात्तत्र पक्षपितरादिकाशपेहरपकाशप्रहस्ता दिवत्स्वरूपलक्षणा

मेव किंचिदुक्तव्यं ॥ ब्रह्मशब्दाभिधेयमेव स्वरूपलक्षणामिति तच्चेत् ॥ ननु जगत्वधर्ममात्राभिधानीयथामहानघटस्येह्
स्यनिरुपाधिघटोऽयमिति तथामतीयते तथेहापि वैवक्ष्यं सच्छब्दाभिधेयं लक्षणामिति चेत् नमहासामान्यमात्राभिधाने
निरूक्ते घटइत्यपांतरसामान्यव्यक्तिमहासामान्यपर्यवसानत्वेनापेक्षतेत थेहाप्यवांतरसामान्यव्यक्तिर्वक्तव्या ॥ वि
ज्ञानमेवदेहत्वसर्वज्ञत्वादिधर्मवत्तया निरुपाधिब्रह्मस्वरूपलक्षणामिति चेत् ॥ नातस्य सुखदुःखरागद्वेषादिम
हासामान्यत्वात् तस्याप्येवमपरसामान्यव्यक्तिपर्यवसानं वक्तव्यमिति तदाह तस्यचनिर्णायवाक्यमानंदाद्येवेति आनंदएव
हि केवलस्वसर्वज्ञत्वे कारकारणत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपं तिर्णीयते ॥ तथाधि ॥ यत्र नान्यत्स्वरूपतो सारभ्य
योविभूसान्तरे सुखमित्युक्तस्वस्यैव बृहत्वं धर्मवतामहयितानंतहि निरुपाधिकब्रह्मगुणयादिति किंविज्ञानानानंदयोः
सामानाधिकरण्यं नीलोत्पलवद्गुणगुणिभावा किंवा द्रव्यं घटइतिवत्परापरसामान्यभावान्न तावद्गुणगुणिभावो
साक्षात्विनाकेयत्तो निर्गुणाश्चेतिश्रुतेरकथंवाकल्यने हनास्ति इति गुणागुणभावभेदप्रतिषेधात्गुणस्य गुणिस्व

पं॰वि॰ १९८

ज्ञानस्यज्ञानत्वत्वाभ्यांनिरूपणादत्रसर्वसंकल्पादाननिर्गुणंद्रव्यमस्तीतिजल्पति।।माभूत्त्रिगुणंइत्यत्रब्रह्मनतुद्रव्यंप्र
माभावात्समवायिकारणमितिचेत्आरंभवादानभ्युपगमादुपादानकारणत्वात्तद्द्रव्यमितिचेत्।।नगुणादीनामपि
परिणामित्वादिधर्मउपादानत्वात्रत्रिगुणंवस्त्वितिवदत्सगुणोपनेकांतःतस्मात्तचंदनप्रदर्शनप्रद्वेषमात्रमेतत्रत्रिगुणं
ब्रह्मेतितस्माद्द्रव्यंघटःसद्ब्रह्मेतिवत्सतापरसामान्यनिबंधनेविज्ञानमानंदमितिसामानाधिकरण्यपनस्माद्धि
ज्ञानसामान्यात्मकत्वनमापरसामान्यनिबंधनंविज्ञानमानंदमितिसामानाधिकरण्यंतस्माद्धिज्ञानसामान्यात्म
कत्वमानंदविशेषोब्रह्मेतितत्रसर्वज्ञादिनीयत्वादिधर्माणेप्रपंचोपाधितयानिर्वचनीयत्वात्तैर्ब्रह्मसगुण
सद्वितीयंवाभवति।।विज्ञानसामान्यमपिदुःखरागादिप्रपंचोपाधितयानिर्वचनीयंसद्ब्रह्मणिविज्ञानाशब्दप्रवृ
त्तिमात्रहेतुर्भवतिविज्ञानगुणत्वाभावेनविज्ञानंब्रह्मेतिचेत्।।नापिज्ञानसामान्यात्मकत्वनस्यविज्ञानव्यवहा १९८
रगोचरत्वाद्धिज्ञानप्रयुक्तार्थक्रियाकारित्वात्सामान्यस्याभासत्वात्तदात्मकत्वंब्रह्मेतिमिथ्याज्ञानमिति

चेन्नकस्यसामान्यांतराभावादस्यैवकरव्यत्वात्तस्माद्धिज्ञानस्वभावआनंदोब्रह्मेत्यानंदस्यैवब्रह्मत्वंप्रतिपादयतिप्रसिद्ध
वद्योतकेनेत्यादिनातस्मात्सर्वेषुवेदांतवाक्येषुपाठव्यत्यासेनजगत्कारणमात्रानुवादेनतस्यब्रह्मत्वंप्रतिपाद्य
तदेकरूपसंहरतितस्माद्ब्रह्मपदमिति।। ।। ।।इतिश्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्यप्रका
शात्मभगवतःकृतौपंचपादिकाविवरणेपंचमवर्णकं।। ।। ।।शास्त्रयोनित्वात्।।शब्दोपादानभावाद्धविगत
विषयवेतनाभ्रान्तयोमूर्ताब्रह्मरूपेवास्फुरत्येविषयविषयीणोदीपशक्तिःस्वमूर्त्तेवैशश्च ज्ञानशक्तिर्नतुनकार
णताकिंतद्दीप्त्यभावात्।।संप्रत्युक्तयोतनेनैवेत्यपरप्रिफनेसाध्यतेसर्वविच्च ब्रह्मणोलक्षणादूयाभिधानपरे
विस्तृतेसर्वज्ञत्वप्रधानाधिकरणावेलक्षेरापस्यसिद्धयेजगद्विरवनोपपत्तेपेचश्रुतियुक्तिभ्यांप्राधान्येनप्रद
र्शितं।।मदेवहेतंनरेणासाधयतिप्राधान्यादथवासर्वजगत्कारणत्वेतत्सर्वज्ञत्वंनसंभवतिवेदानामकर्तृत्वादित्या
शंकासंबंधमाहाययथरइतिवेदस्यतावत्सर्वविषसामर्थ्यंदर्शयतितदुपादानतयाब्रह्मणोपितद्दर्शितकमनेकनाना
विधविषयविद्यास्थानउतिनुनास्तिवेदस्यसर्वज्ञतार्थज्ञानकरणतयायोगादितिसत्यमतएकस्यप्रत्ययइत्याहके

प्रयोगस्मिन्नकेवेदस्यसर्वज्ञत्वसामर्थ्येपिब्रह्मणःकथंसर्वज्ञत्वमित्यत्रआह॥ततश्चतस्यकारणमितिदर्पणइत्यादिदृष्टां
तोपंचप्रयोगोवेदःस्वविषयादधिकतरविज्ञानवत्स्यणीनोभवतुमहत्त्विवाक्यप्रामाणवात्स्यापिस्यादिशावदिति॥नेनिक
मत्रानुमानेनप्रसाध्यतेयदितावदुपाध्यायस्याध्यायनोवारणवच्छास्त्रेदृष्टोपलक्षितानांसर्वेषांशास्त्राणांब्रह्मणःपृथक्
रणासाध्यतेतदानोपाध्यायवत्सर्वज्ञंब्रह्मविद्यतिअथसकलवाक्यार्थप्रमाणांतरेणोपलभ्यतइतिपक्षस्तदर्थयुरस्य
वाक्यंविस्वयत्विप्रातंनहिपौरुषेयत्वंनलक्षणत्वात्पुरुषवचसामितिचोदयतिनत्वेवंसतीत्यत्रकेचित्परिहारमाहुरेचस्मृतस्य
माणांतरेणार्थमुपलभ्यविवक्षितत्वापरस्यैवविरचितःशब्दःपौरुषेयइत्युच्यते॥तत्रेदमतेनकर्तव्यमितिवक्तुरभिप्रायभेदाद्रा
गःपुरुषवचसामर्थ्यः॥द्विविधेश्वरणोनित्यश्चानित्यश्च॥तत्रानीश्वरणमभिलषितज्ञानस्यानित्यत्वात्जन्यरागस्याप्यनि
त्यत्वात्द्विषयाणांपुरुषवचसांप्रमाणांतरसापेक्षतयापौरुषेयत्वंसंगीयतेईश्वरस्यपुनर्निखिलेश्वरसाधनविषयज्ञानानांनित्य
यत्वान्तत्कृतरागस्यापिनित्यत्वादीश्वरप्रणीतानामपिवैदिकवचसांनित्यरागविषयवचनपौरुषेयत्वानभ्युपगच्छेतइतिनेतत्सारंईश्वरस्यकि
वा२ कामिकोपितसाधनज्ञानस्यनित्यस्वरूपत्वाभावाद्वाक्यमानानांवातदेवेश्वरत्वस्यदर्शितत्वाच्छब्दइतिचेतन्नेतरत्वतदाश्रयात्रित्यज्ञानमूलकेश्व १९८
रागजन्यतेशब्दस्यातेपक्षंप्रमाणप्रमितेपक्षेचशब्दनित्यज्ञानसिद्धिरितिरागश्चानित्योनित्याभिलषितसाधनज्ञानमूलइतिचवाहुर्यतो॥

न्नुतंश्चेदंलक्ष्वंनित्यानित्यानित्याभेदेनपुरुषवचसामपिसतांसापेक्षत्वानपेक्षत्वविभागोविघतइतिचपरूपाभिप्रायःशब्दार्थइतिवक्ष्यतेतस्मादस्मं
समेतदन्येरुसंगिरतेव्यासादभिप्रायभेदतात्पर्यवत्ताभारतादिवचसमिदानीतनवाचकरध्ययनविधितात्पर्यवत्तामेववेदानांसृष्टिकाले
मक्षारणमीश्वरस्यवेदप्रणयनंमततश्चरागभेदतात्पर्याभावाद्दृष्टप्रामाण्यमीश्वरस्यसर्वज्ञताचेतितत्रवयंदृष्टामःस्रष्टिसमयेवि
प्रमाणांतरेणार्थमुपलभ्यवेदवाक्यंव्यनक्तियाथपाणिन्यादिराहोस्विदुपाध्यायवत्पूर्वसिद्धवाक्यंसमुच्चारयतितत्रपूर्वस्मिन्कल्पे
पौरुषेयतापत्तिरुत्तरस्मिन्नुपाध्यायवदध्यासर्वज्ञतापत्तिरभिप्रायतात्पर्याभावादपौरुषेयतेतिचेदुपलभ्यरचनापातुतोरागतात्पर्याभा
वः॥पूर्वमेवविधितात्पर्यादितिचेन्नतथापीतरन्नविहन्यतेतेनचोभयत्रतात्पर्यमुपपद्यतेसत्यपिविधितात्पर्येवगम्यार्थस्यनैवसापेक्षत्वं
निमित्तंसमधिगतंनवोपलभ्यरचनायांविधितात्पर्यमुपपद्यतेइतितस्मात्पक्षोविदेततः॥अपरेत्वनुमन्यंतेनविकल्पकज्ञानपूर्व
कानिकिलवेदवाक्यानिनसापेक्षत्वदोषमश्नुवतेब्रह्मरूपज्ञानस्यनिर्विकल्पकत्वात्लौकिकवचसांसविकल्पकज्ञानपू
र्वकत्वात्सापेक्षतेनायमपिविभागःसिध्यतउपलभ्यरचनायांसापेक्षत्वनिमित्तत्वात्स्वरूपज्ञानस्याप्यभिलषितसाधनोप
साधनोपरागेसविकल्पकत्वात्तस्मान्नैवपरिहाराःस्फुटः॥स्यातहिवेदानांपौरुषेयत्वमपौरुषेयोवेदःव्यवहाराविच्छेदेसति
स्मर्यमाणकर्तृत्वादादित्यवदितिपौरुषेयतानुमीयतइतितत्रविरक्तेषपीदानीमनुमानप्रमीयमाणाकर्तृत्वेपुनैकांति

पं॰वि॰ कृत्वादेशानां च कर्तुरनुमानागमाभ्यां प्रमीयमाणत्वात् तथा हि विशिष्टबहुतरपुरुषप्रणीतो वेदः बह्वर्थविषयवाक्यप्रमाणत्वाद्भारतवदि
१९९ दसंवमिस्त्रेनतस्त्रु चो वन्तुषिसामानी आगमः ॥ तस्मात्पौरुषेयो वेद इत्यत्र पृच्छामः कथं पौरुषेये वेदप्रामाण्यं लभ्यते कपिलकणादा
क्षपादानामिति सर्वज्ञप्रणीतत्वेनेति चेन्न तावदनुमेयः सर्वज्ञ इत्युक्तं प्राक् आगमाच्चेत् ॥ सिद्धिर्नेतरेतराश्रयात्सर्वज्ञसिद्धेतत्प्रणी
ततया वेदप्रामाण्यं ततश्च सर्वज्ञसिद्धिरिति ॥ स्यादेतत् न महाजनपरिग्रहाद्वेदप्रामाण्यमिति न सुगतनाथ्यनुसारिणामेव देशविशेषेषा
अर्थश्रवणाश्रवदेशास्त्रमभाव च द्वारा देशकालादीनां महाजनपरिगृहीतानां प्रामाण्यं दृश्यते न च महाजनपरिग्रहः प्रा
माणपक्षपतीतस्मात्प्रामाण्यपलाभः किं त्वं पौरुषेयोक्तेन प्रमाणेनोपलभ्य धर्माधर्मौ वेदवाक्यं विरचयेन्न
तावदिन्द्रियेण चक्षुषा नक्षत्ररसगंधस्पर्शशब्दवत्तस्य धर्मे तत्तद्विषयाद्यादि वार्तमानग्रहणाय मात्रं धर्मस्य चक्षुः
अयत्वात्र तत्समवायी धर्मस्तदा केवलतेनेन चक्षुषा तथा मनसैव चक्षुरादिना वा गृह्येत इति किमिति
तस्मिन्न ग्रहणीमः न वा विशेषः फलेषु गृह्यते तदिन्द्रियाणामप्यदृश्यत्वात् ॥ योगजधर्मसामर्थ्याद्विशिष्टानि १९९
न्द्रियाणीति चेत्तथापि ज्ञानादिदृष्टिवत्स्वे विषये तिमेशमात्रं स्पृहयुनाविषये धर्मदिव्यं च चक्षुरिदं

स्पृहं प्रादात्तेषां स भगवान् दिव्यं चक्षुः जनार्दन इति स्मरणादस्ति योगीनां दिव्यं चक्षुरिति चेन्न तस्यापि विश्व
रूपादिस्वविषयातिशयदर्शित्वात् तत्समवेतमपेतत्वापि धर्मो वर्तमानो भवतीति येन प्रत्यक्षः स्यात् कस्यां त
रायोऽनुष्ठितो धर्मोऽस्मिन् कल्पादौ वर्तत इति चेत् न कल्पान्तरीयधर्मोपदेशाद्योगान्नेतोपि कल्पान्तरानुष्ठित
धर्मप्रत्यक्षेणोपलभ्योपदिशतीति चेदं धर्यवरास्यात्तस्मात्र प्रत्यक्षमूलो वेदः ॥ नापि शब्दमूलोऽनवस्थाना
तस्मात्प्रामाण्यपूहानान्नपौरुषेयो वेद इति मा भूत्प्रामाण्यमिति स्मृगताईनास्वैरिदं वक्तव्यं प्रत्यक्षा
नुमाने हि दृष्टव्यतिरेकः कमफक संबंधो विघतेन वेति विद्धाते चेत्कथं प्रपौरुषेयागमान्तरेण तस्य सिद्धिः सर्व
ज्ञसकलनप्रणीतागमादिति चेत् किं किंपिलादयः सन्तोऽपि तमं वति सर्वे तीर्थः सर्वज्ञा इति चेत् ॥ तर्हि धर्मा
धर्मयोर्विवादः कथं स्यात् नैकः सर्वज्ञोऽनेतर इति प्रामाणमस्ति न च सर्वे सर्वज्ञप्रणीताः धर्मं एवेति यु

पं·वि०
२००

नं अन्योन्यधर्मनिराकरणात्रपौरुषेय एव सङ्गतावागमा इति युक्तमन्यस्मर्यमाणकर्तृकत्वादपौरुषेयत्वे वा मीकि
वृदामः ॥ उदितानुदितहोमवत् व्यवस्थोपपत्तेरा हलौकायतः मा भूत् प्रत्यक्षदृष्टारिति त्वकमफलसंबंधः
पौरुषेयतानुवेदस्यानुबोदृतरसिद्धा न निवार्यत इति स वक्तव्यः किं लौकिकवचांसि प्रमाणानि न वेति न वेत्त
मपाते विवादो युक्तः शब्दैरेव परस्परविरुद्धार्थमतिपादानरूपत्वादस्य अथ लौकिकवचांसि प्रमाणा
नि वेद [illegible] वचोभिस्तर्हि किमपराद्धं वत्तनु पौरुषेयत्वानुमानात्तस्तच मूलप्रमाणाभावादप्रामाण्यं युक्त
न स्वाभा[illegible]विकत्वाच्छब्दानामर्थावबोधसामर्थ्यस्य पुरुषप्रत्ययानुसारित्वाभावादान्यथा संगरं विवक्ष
न मेरुशब्दः रूपात् स्वभावसिद्धः शब्दसामर्थ्यानुसारेणाहि लौकिकाः शब्दं प्रयुजते सत्यं कदाचित्संबंध
प्रानसंकेतसामर्थ्यादिदानीं व्यवस्थयाभिधानमिति चेत्तत्र विवादगोचरापन्नः पूर्वतनशब्दार्थसंबंधव्य

२२

वहारस्तथाविधपूर्वपूर्वव्यवहारपरंपरानिबंधनोऽभिधानाभिधेयव्यवहारत्वादिदानींतनतद्व्यवहारवदित्यना
दित्वानुमानात्सांकेतिकशब्देष्वनैकांतिक इति चेन्नाभिधानभिधेयविषयत्वादनुमानस्य जातिमात्राभि
धायिनो वा सर्वदेशेष्वभिधानतया संप्रतिपन्ना वायस्मिंस्तु स्पद्यमाने क्वचित्कुहचिन्न संबंधाएवोपरसं
तेशब्दः ॥ तानि चाभिधानिनैवं सांकेतिकशब्दा इति माभूत्तह्यभिधानसंकेतो वेदवाक्यरचनानुपुरु
षनिबंधनैवेत्यत आह न स्याद्धस्तवदनादित्वादिति वृचादगोवरपत्रं स्तस्छिकान्नीनं वेदाध्ययनं पूर्वपूर्वं तथा
विधवेदाध्ययनानुस्मृतिनिबंधनं न विरूमर्हति ॥ वेदाध्यनेयत्वादिदानींतनवेदाध्ययनवादिति विशे
षतोऽप्यनुमानेन वाक्यत्वाद्भारतवदिति सामान्यतादर्शनाद्बलीयसो वेदस्यानादित्वासिद्धेरतः पौरुषेयतो
ननु सर्वेष्वपि ग्रंथेष्विदमनादित्वानुमानमनुविशातिन नैरेव ग्रंथस्तच्कदृणाप्रतिपादनात्तदागम

MEMORIAL

१०वि०
२०१

विरोधादिहापि श्रुतेर्वेदस्य कर्तृप्रतिपादकत्वमिति चेन्न तावत् तया वाचा इदं सर्वमसृजत नक्रवो यजूंषि सामानीति
श्रुतिः प्रत्यक्षादिविषया सन्नीतस्य प्रमाणान्तरेणार्थमनुपलभ्य शब्दरचनां ब्रवीति यो ब्रह्माणं विदधाति पूर्वं यो
वै वेदांश्च प्रहिणोति तस्माद् ऋतिश्रुतौ प्रागेव वेदसृष्टावागमात् ॥ अस्य महतो भूतस्य निःश्वसितं श्वरादि
ष्यापि सतो प्रकारणासामर्थ्यं दूरे यादानत्वमेव ब्रवीति ॥ किं च वेदं पौरुषेयत्वं साध्यते यदि तावत् पुरुषनिर्वर्त्यमात्रं संप्रति
पत्रमेव तत्कथं विशिष्टानामेव वर्णानां वेदशब्दाजन्यत्वात् पूर्वमभिधेयत्वात् क्रमस्य तु उच्चारणो ... वोरन्यतरगतस्य प्रति
क्षणं निर्वर्त्यत्वात् द्विशिष्टवर्णानामपि प्रत्युच्चारणं जन्यत्वात् पूर्वपूर्वक्रमानुस्मरणेन तत्सदृशोत्तरोत्तरक्रमनिर्वर्तनात् तु
क्रमसादृश्यपरं परयाश्वानिदं प्रथमतया तद्विशिष्टस्य नित्यत्वावधिधानाद् अथ वेदः स्वार्थप्रवृत्तप्रमाणान्तरजन्य २०१
त्पौरुषेय इति ॥ तत्र प्रत्यनुमानमुच्यते वेदः स्वार्थप्रवृत्तप्रमाणान्तरजन्यो न भवत्यसर्वज्ञवचनत्वाभावे सति धर्मा

धर्मप्रतिप्रमाणत्वात् परपरिकल्पितेश्वरबुद्धिवदिति अथाध्ययनपरस्येदं प्रथमतावेदस्य पौरुषेयतेति नाध्ययनस्या
नादित्वानुमानस्य दर्शितत्वात् तस्मान्नास्ति वेदस्य पौरुषेयत्वमिति नन्वाप्तेन प्रामाणान्तरेणार्थमनुपलभ्यापि
प्रतिपन्नये तत्र प्रयुज्यमानः शब्दः प्रामाण्यमवलित तद्भावनाप्रवाक्यवदप्रमाणं वेदः प्रसज्यते न त्वनाप्त
ममांसाउत्प्रेक्षया वार्थभावमप्यवगम्य परप्रतिपत्तये तत्र प्रयुज्यमानः शब्दः प्रामाण्यमापत्स्यते हि नेत
दभावादाप्तवाक्यवद्वेदः प्रमाणं किं न स्यात् नन्वाप्तवाक्यमनाप्तप्रणीतत्वाभावात् प्रमाणं किं वास
प्रणीतत्वादिति विवेक्तव्यं नोभयथापीति ब्रूमः कथं शब्दानां तावत् संसृष्टार्थबोधसामर्थ्यं स्वाभावसि
कमेवमध्यमवृद्धप्रयोगप्रत्यक्षाभ्यामाप्तानामसयव्यतिरेकेणावगतं तत्रानाप्तस्य भ्रान्त्या अपेक्षा ज्ञानेतन्मू
ले विरवितथशब्दस्य कारणदोषतया शब्दे पि दोषप्रसंजयतः तत्र दुष्टकारणजन्यं विज्ञानमयथा

पं·चि· र्थंनप्रमाणमितिस्वतःसिद्धशब्दसामर्थ्यप्रयुक्तप्रामाण्यस्यप्रतिबंधक[illegible]तयानासत्तानमवतिष्ठते॥आप्त
२०२ मानंचप्रतिबंधभ्रांत्यप्रेक्षादिदोषनिरासितयासंपद्यते॥ततश्चाप्तत्वानंनशब्दप्रामाण्यहेतुः वेदेनुपु
रुषसंबंधाभावान्नप्रतिबंधतन्निरासापेक्षेतिनामप्रणीतत्वमत्रोपयुज्यते॥नन्वाप्तप्रयोगानुपेक्षत्वेपि
पर्वतत्त्वसंबंधशब्देषुस्मर्यमाणेषुतेभ्यएवाग्निमान्पर्वतइतिप्रमितिरुत्पद्यतेनतस्यपर्वतस्याग्निमत्तामात्रंप्र
मीयतएव॥पुरोवर्तिनितुप्रमाणांतराविरोधात्प्रमीयतइतिअथवाद्विविधःप्रयोगःप्रामाण्यहेतुरर्थेवि
लक्षणनिबंधनःपौरुषेयेपूर्वप्रयोगानुस्मृतिनिमित्तोवेदेतदुभयाभावात्तस्मादिवाक्येष्वप्रामाण्यप
मितिअथवातात्पर्याभावात्केवलेभ्यःशब्देभ्योनार्थप्रमितिःवेदेपुनरध्ययनविधितात्पर्यावधारणमप्रयो २०२
गाभावेपिप्रमितिरनुत्पद्यतेध्ययनविधिवाक्यस्यापिस्वेनैवतात्पर्यसिद्धिरतोनादिर्वेदइति॥अनादि

त्वेपिपुराणवाक्यवदन्यथान्यथासन्निवेशेनप्रणयनमाशंक्याहकूटस्थनित्यत्वादितिआनादेर्वेदस्यकथंब्र
ह्मकारणतेतिशंकतेकथंपुनरितिअत्रशास्त्राशयोपलक्षितंसर्वशब्दानांवर्णानामेकपदार्थबुध्यवछेद
कवर्णनियामकक्रमविशिष्टपदानांवाक्यार्थबुध्यवछेदकपदनियामकक्रमविशिष्टानांमहावाक्या
र्थबुध्यवछेदकवाक्यनियामकक्रमविशिष्टप्रकरणानांपरिपूर्णपुरुषार्थसाधनबुध्यवछेदकानेक
प्रकरणनियामकक्रमविशिष्टशास्त्राणांवप्रवाहरूपेणब्रह्मोपादानतयाकार्यत्वमस्तीत्याहतत्परंतत्र
त्यादित्यादिनानुरज्जुसर्पवदितिवेदस्यामिथ्यात्वंकथंनिर्दिश्यतेननुकोयंवेदोनामनतावद्वर्णमा
त्रमविशेषेषवर्णेवर्णाइतिवेत्रास्तिदेशकालनिबंधनोवर्णक्रमःनित्यतयासर्वगतत्वान्नापिवस्तुनिबंध
नक्रमोविरोधात्नलोकदेवाराजाजारेतितत्कारस्पर्शफास्पूर्वापरीभावोनुरक्तः॥उच्चारणासमवेतएव

पं·वि·
२०३

क्रमो वर्णेषूपरज्यत इति चेन्नाप्रत्यक्षत्वादुच्चारणात्तस्यैव तत्क्रमयोः प्रत्यक्षत्वे क्रमविशिष्टवर्णात्मा वेदः अथोपलब्धिक्र
मवन्तो वर्णा वेद इत्युच्यत इति नान्यधर्मस्य क्रमस्यान्यधर्मत्वानुपपत्तेः ॥ अथोपलब्धिधर्म एव क्रमो वर्णेषु समारो
प्यत इति चेन्न हि ख्यातिवादिनः क्रममात्रस्य वा वर्णमात्रस्य वा वेदशब्दार्हत्वादृष्टेः प्रत्ययाभावाद विवेक
मात्रमेव वेद इत्यर्थावबोधो न स्यादन्यथाख्याते पुनर्विशिष्टप्रत्ययमात्रत्वात् विशिष्टार्थाभावादृष्टानातिरिक्ते
